PG SK S1 02 (DSC)

द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच. एन. इ. पि. २०२० अनुसारम्)

प्रथमषाण्मासिकः

नाटकम्

संस्कृतम्

पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्
कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

विषयविशेषज्ञाः

१) आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी

२) अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

३) प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटी विश्वविद्यालयः

पाठ्यक्रम-समन्वयकाः : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः।
लीना ओजाँ, शैक्षिक-परामर्शदाता, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः॥

पाठ्यक्रम- प्रस्तुतकर्तारः

अध्यायाः	**प्रस्तुतकर्तारः**
१-६	लीना ओजाँ, शैक्षिक-परामर्शदाता, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः।
७-८	बरषा पाटगिरिः शोधच्छात्रा, संस्कृत-विभागः गुवाहाटी-विश्वविद्यालयः, गुवाहाटी।
९-१३	लीना ओजाँ, शैक्षिक-परामर्शदाता, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः।
१४	बरषा पाटगिरिः शोधच्छात्रा, संस्कृत-विभागः गुवाहाटी-विश्वविद्यालयः, गुवाहाटी।

सम्पादनसमितिः

विषयवस्तु-सम्पादना : डॉ. कमल लोचन आत्रेयः सहकारी अध्यापकः, संस्कृतसाहित्यविभागः, कुमार भास्कर वर्म संस्कृत पुरातनाध्ययन विश्वविद्यालयः (१, २, ३, ४, ५, ६, ७)
डॉ. गायत्री शर्मा, सहाचार्या, संस्कृतविभागः, सन्दिकै-बालिका- महाविद्यालयः, गुवाहाटी (८)
प्रो. मुक्ता विश्वास। अवसरप्राप्ता अध्यापिका, संस्कृत-विभागः गुवाहाटी विश्वविद्यालयः, गुवाहाटी (९)
डॉ. गायत्री शर्मा, सहाचार्या, संस्कृतविभागः, सन्दिकै-बालिका-महाविद्यालयः, गुवाहाटी (१० -१४)

प्रारूप-सम्पादना : लीना ओजाँ, शैक्षिक-परामर्शदाता, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः
डॉ. इन्द्रानी डेका, सहायकाचार्या, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

प्रथमप्रकाशः - मार्च, 2025

ISBN :978-93-7839-710-3

This Self Learning Material (SLM) of the Krishna Kanta Handiqui State University is made available under a Creative Commons Attribution-Non Commercial-ShareAlike4.0 License (International) : http.//creativecommons.org/licenses/by-nc-sa/4.0

Printed and published by Registrar on behalf of the Krishna Kanta Handiqui State Open University.

Headquarters: Patgaon, Rani Gate, Guwahati-781017
City Office: NH 37, Resham Nagar, Khanapara, Guwahati-781022 Web: www.kkhsou.in

विषयपरिकल्पनम्

पृष्ठासंख्या

अध्यायः १ स्वप्नवासवदत्तम् (परिचयः) ७-२५

'स्वप्नवासवदत्तम्' नाटकस्य संक्षिप्तसारः, नाटकस्य परिचयः, शीर्षकस्य तात्पर्यम्, नाटके व्यवहृता रसः अलंकाराश्च, नाट्यकारभासस्य परिचयः, भासस्य रचनावल्याः तथा तेषां स्रोताः, त्रिवान्द्रम् ग्रन्थमालायां भासस्य मान्यता, भासस्य कालः, भासस्य लेखनशैल्याःविशेषता, 'स्वप्नवासवदत्तम्' नाटकस्य अङ्कानां सारांशः, नाटकस्य प्रमुख-पात्राणां चरित्रचित्रणम्, अध्यायस्य असमीयाभाषायाम् सारांशः।

अध्यायः २ स्वप्नवासवदत्तम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्) २६-४२

प्रथमाङ्कस्य निर्वाचितदृश्यानां मूल-संस्कृत-पाठः, ब्रह्मचारी-चरित्रस्य प्रवेशात् पूर्वदृश्यानां मूल-संस्कृत-पाठः, ब्रह्मचारी-चरित्रस्य प्रवेशादारभ्य दृश्यानां मूल-संस्कृत-पाठः, उक्तसंस्कृत-पाठयोः असमीयानुवादः, ब्रह्मचारी-चरित्रस्य प्रवेशस्य पूर्वम्, ब्रह्मचारी-चरित्रस्य प्रवेशात्, ब्रह्मचारी-चरित्रस्य प्रवेशस्य तात्पर्य-व्याख्या, कतिपयविशेष-श्लोकानां व्याख्यानम्।

अध्यायः ३ स्वप्नवासवदत्तम् (द्वितीयतृतीयाङ्कयोः पाठ्यात्मकाध्ययनम्) ४३-५३

द्वितीयाङ्कस्य मूलसंस्कृतपाठः, उक्तसंस्कृतपाठस्य असमीयानुवादः, तृतीयाङ्कस्य मूलसंस्कृतपाठः, उक्तसंस्कृतपाठस्य असमीयानुवादः, नाटके द्वितीयाङ्कस्य महत्वम्, नाटके तृतीयाङ्कस्य महत्वम्।

अध्यायः ४ स्वप्नवासवदत्तम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्) ५४-६२

चतुर्थाङ्कस्य निर्वाचितांशस्य संस्कृतपाठः, प्रवेशकादनन्तरं राज्ञःतथा विदूषकस्य आगमनपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः, राज्ञः तथा विदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः, उक्तसंस्कृतपाठयोः असमीयानुवादः, प्रवेशकादनन्तरं राज्ञःतथा विदूषकस्य आगमनपर्यन्तम्, राज्ञः तथा विदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तम्, चतुर्थाङ्कस्य कतिपयश्लोकानां व्याख्याः।

अध्यायः ५ स्वप्नवासवदत्तम् (पञ्चमाङ्कस्य पाठ्यात्मकाध्ययनम्) ६३-७६

पञ्चमाङ्कस्य निर्वाचितांशस्य मूलसंस्कृतपाठः, प्रवेशकानन्तरं समूद्रगृहात् विदूषकस्य निर्गमनपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः, वासवदत्ताचेट्योः प्रवेशात्काञ्चुकीयस्य प्रवेशपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः, संस्कृतपाठस्य असमीयानुवादः, प्रवेशकस्य अनन्तरं समुद्रगृहात् विदूषकस्य निर्गमपर्यन्तं, वासवदत्तायाः चेट्याश्च प्रवेशात् काञ्चुकीयस्य प्रवेशपूर्वंपर्यन्तं, स्वप्न-दृश्यस्य वर्णनम्, नाटके पञ्चमाङ्कस्य महत्त्वम्, कतिपयविशेष-श्लोकानां व्याख्यानम्।

अध्यायः ६ स्वप्नवासवदत्तम् (षष्ठाङ्कस्य पाठ्यात्मकाध्ययनम्) ७७-८९

षष्ठाङ्कस्य निर्वाचितांशस्य मूलसंस्कृतपाठः, काञ्चुकीयस्य धात्राः प्रतिहार्याः च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः, द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तं दृश्यांशस्य

मूलसंस्कृतपाठः, उक्तसंस्कृतपाठस्य असमीयानुवादः, काञ्चुकीयस्यधात्राः प्रतिहार्याः च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तम् अनुवादः, द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तम् अनुवादः, उदयनवासवदत्तयोः पुनर्मिलनस्य दृश्यवर्णनम्, नाटके षष्ठाङ्कस्य महत्त्वम्।

अध्यायः ७ अभिज्ञानशाकुन्तलम्-नाट्यकारकालिदासस्य परिचयः ९०-१०५

महाकविकालिदासस्य जीवनवृत्तम्, कालिदासस्य कृतयः, तेषाम् उत्साः च, कालिदासस्य शास्त्रवैदग्ध्यम् लेखनवैशिष्ट्यम् च, कालिदासकाव्येषु सौन्दर्यतत्त्वम्।

अध्यायः ८ अभिज्ञानशाकुन्तलम् (सामान्याध्ययनम्) १०६-१२४

महाकविकालिदासस्य जीवनवृत्तम्, कालिदासस्य कृतयः, अभिज्ञानशाकुन्तलम् इति नाटकस्य आभासः, नाटकस्य परिचयः, नाटकस्य नामकरणस्य तात्पर्यम्, नाटके प्रयुक्तः रसः, अभिज्ञानशाकुन्तलनाटकस्य अङ्कानां सारांशः।

अध्यायः ९ अभिज्ञानशाकुन्तलम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्) १२४-१४७

अभिज्ञानशाकुन्तलम् नाटकस्य प्रथम अङ्कस्य मूल संस्कृत पाठः, प्रथम अङ्कस्य मूल संस्कृत पाठ्यांशस्य असमीया अनुवादः, व्याकरणटिप्पणी, श्लोकानां संस्कृतव्याख्या।

अध्यायः १० अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कस्य पाठ्यात्मकाध्ययनम्) १४८-१६०

अभिज्ञानशाकुन्तलम् नाटकस्य द्वितीयाङ्कस्य मूलसंस्कृतपाठः, द्वितीयाङ्कस्य मूलसंस्कृतपाठ्यांशस्य असमीयानुवादः, व्याकरणटिप्पणी, श्लोकानां संस्कृतव्याख्या।

अध्यायः ११ अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्) १६१-१७६

अभिज्ञानशाकुन्तलम् नाटकस्य चतुर्थ अङ्कस्य मूल संस्कृत पाठः, व्याकरणटिप्पणी, श्लोकानां संस्कृतव्याख्या।

अध्यायः १२ अभिज्ञानशाकुन्तलम् (सप्तमाङ्कस्य पाठ्यात्मकाध्ययनम्) १७७-१९८

अभिज्ञानशाकुन्तलम् नाटकस्य सप्तमाङ्कस्य मूलसंस्कृतपाठः, सप्तमाङ्कस्यमूल संस्कृत पाठ्यांशस्य असमीया अनुवादः, व्याकरणटिप्पणी, श्लोकानां संस्कृतव्याख्या।

अध्यायः १३ वेणीसंहारः (भट्टनारायणः, नाटककर्त्ता) १९९-२११

भट्टनारायणस्य जीवनवृत्तम्, भट्टनारायणस्य समयः, भट्टनारायणस्य धार्मिकविश्वासः, भट्टनारायणस्य पाण्डित्यम्, भट्टनारायणस्य रचनाशैली, संस्कृतनाट्यसाहित्ये भट्टनारायणस्य स्थानम्।

अध्यायः १४ वेणीसंहारः (नाटकस्य सामान्याध्ययनम्) २१२-२२७

कवेः भट्टनारयणस्य परिचयः, वेणीसंहार-नाटकस्य आलोचनम्, नाटकस्य रसः, नाटकस्य नायकः, वेणीसंहारनाटकस्य अङ्कानां सारांशः, वेणीसंहारनाटकस्य प्रधानचरित्राणां परिचयः।

पाठ्यविषयस्य परिचयः : नाटकम्

कृष्ण कान्त सन्दिकै राज्यिक मुक्त विश्वविद्यालयेनगृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य द्वितीयषाण्मासिके प्रथमपत्ररूपेण नाटकम् इति पाठ्यविषयः प्रस्तूयते। अस्मिन् पाठ्यविषये नाटकम् सन्दर्भे आलोच्यते। तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'नाटकम्' इति। पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति। ते अध्यायाः क्रमपूर्वकं यथा-

अध्याय १ स्वप्नवासवदत्तम् (परिचयः)
अध्याय २ स्वप्नवासवदत्तम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय ३ स्वप्नवासवदत्तम् (द्वितीयतृतीयाङ्कयोः पाठ्यात्मकाध्ययनम्)
अध्याय ४ स्वप्नवासवदत्तम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय ५ स्वप्नवासवदत्तम् (पञ्चमाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय ६ स्वप्नवासवदत्तम् (षष्ठाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय ७ अभिज्ञानशाकुन्तलम्-नाट्यकारकालिदासस्य परिचयः
अध्याय ८ अभिज्ञानशाकुन्तलम् (सामान्याध्ययनम्)
अध्याय ९ अभिज्ञानशाकुन्तलम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय १० अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय ११ अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय १२ अभिज्ञानशाकुन्तलम् (सप्तमाङ्कस्य पाठ्यात्मकाध्ययनम्)
अध्याय १३ वेणीसंहारः (भट्टनारायणः, नाटककर्त्ता)
अध्याय १४ वेणीसंहारः (नाटकस्य सामान्याध्ययनम्)

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते। ते विषयाः मूलपाठेषु उल्लिखिताः महत्त्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति। 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्त्वपूर्णानां तथ्यानां वर्णनं प्राप्यते। प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति। अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः 'अग्रगत्याः निरूपणम्' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति। अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय 'अधिकं ज्ञातुम्' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः भविष्यन्ति। अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते। अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते। तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते। यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातु मिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति।

अध्यायः १ : स्वप्नवासवदत्तम् (परिचयः)

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ 'स्वप्नवासवदत्तम्' नाटकस्य संक्षिप्तसारः

- १.३.१ नाटकस्य परिचयः
- १.३.२ शीर्षकस्य तात्पर्यम्
- १.३.३ नाटके व्यवहृता रसः अलंकाराश्च

१.४ नाट्यकारभासस्य परिचयः

- १.४.१ भासस्य रचनावल्याः तथा तेषां स्रोताः
- १.४.२ त्रिवान्द्रम् ग्रन्थमालायां भासस्य मान्यता
- १.४.३ भासस्य कालः
- १.४.४ भासस्य लेखनशैल्याःविशेषता

१.५ 'स्वप्नवासवदत्तम्' नाटकस्य अङ्कानां सारांशः

१.६ नाटकस्य प्रमुख-पात्राणां चरित्रचित्रणम्

१.७ अध्यायस्य असमीयाभाषायां सारांशः

१.८ अध्यायात् किम् अवगतम्

१.९ ज्ञानाधिक्यम्

१.१० अग्रगत्याः निरीक्षणम्

१.११ अग्रगत्याः निरूपणम्

१.१२ अभ्यासप्रश्नाः

१.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भबान् -

- 'स्वप्नवासवदत्तम्'- नाटकस्य संक्षिप्तपरिचयम् प्राप्स्यति।
- महाकविभासस्य कृतिविषये तथा लेखनकौशलविषये सम्यग् ज्ञानं लभते।
- नाटकस्य अङ्कानां प्रतिपाद्यविषयाणां सारः बोधिष्यति।
- नाटकस्य मुख्यपात्राणां विशेषतां ज्ञास्यति।

१.२ परिचयः

संस्कृतसाहित्ये द्विविधे काव्ये दृश्येते— श्रव्यकाव्यं दृश्यकाव्यञ्च। यत् अभिनयेन दर्शयितुं शक्यते, तत् दृश्यकाव्यं कथ्यते। दृश्यकाव्यं पुनः द्वि प्रकारकं यथा रूपकम् उपरूपकञ्च। तयोः

रूपकम् दशप्रकारकम्उपरूपकमपि अष्टादशप्रकारकम् भवति। दशप्रकाराणां रूपकानां नामानि एतानि - १) नाटकम्, २) प्रकरणम्, ३) भाणः, ४) व्यायोगः, ५) समवकारः, ६) डिमः, ७) ईहामृगः, ८) अङ्कः, ९) वीथी च १०) प्रहसनम्। अत्र दृश्यते यत् रूपकस्य प्रथमः तथा प्रमुखप्रकारोऽस्ति नाटकमिति।

संस्कृतनाट्यकाराः नाटकानि रचयित्वा नाट्यकाव्यस्य भंडारं समृद्धम् कृतवन्तः। तेषु उत्कृष्टनाटकेषु प्रमुखं भवति नाट्यकारभासेन विरचितम् 'स्वप्नवासवदत्तम्' इति नाटकम्।

अस्मिन् अध्याये 'स्वप्नवासवदत्तम्' नाटकस्य एका साधारणसमालोचना प्रदास्यते। अनेन भवन्तः 'स्वप्नवासवदत्तम्' नाटकस्य उत्पत्तिं, विषयवस्तु, शिर्षकस्य तात्पर्यं च ज्ञातुम् अर्हन्ति। अपि च महाकविभासस्य अपरनाटकानां विषयेऽपि साधारणज्ञानं प्राप्नुवन्ति। स्वप्नवासवदत्तनाटकस्य प्रत्येकाङ्कस्य विषयवस्तु, नाटकीयपात्राणां वैशिष्टम् च अस्मिन्नेव अध्याये प्राप्स्यन्ति।

१.३ 'स्वप्नवासवदत्तम्' नाटकस्य संक्षिप्तसारः

अस्मिन् अंशे भवान् स्वप्नवासवदत्तनाटकस्य परिचयं, शीर्षकस्य तात्पर्यं, नाटके व्याप्तरसं तथा अलङ्कारान् ज्ञातुं शक्नोति।

१.३.१ नाटकस्य परिचयः

अस्य नाटकस्य नायको वत्पराज उदयनः। तस्य राज्यं कौशाम्बीशत्रुराजारुणिना अधिकृतं भवति। दैवज्ञाः भविष्यवाणीं कृतवन्तः यत् यदि उदयनः मगधराजकुमारीं पद्मावतीं विवाहयेत्, तर्हि सः हृतराज्यं पुनः प्राप्नोति। अतः महामन्त्री यौगन्धरायणः तस्य हृतराज्यं कथं पुनः प्राप्तुं शक्यते इति विचारयितुं आरब्धवान्। सः जानाति यत् वासवदत्तायां जीविते उदयनः अन्यनारीं न विवाहं करिष्यति।

तस्मात् सः एका योजना कृतवान् येन इदं प्रचारितं जातं यत् योगन्धरायणः वासवदत्ता च उभौ अग्निदग्धौ मृतौ। वासवदत्तायाः मृत्युवृत्तं श्रुत्वा उदयनः शोकविह्वलोऽभवत्। अपरत्र, यौगन्धरायणः आत्मनः परिचयं अप्रकाश्य वासवदत्तां पद्मावत्याः समीपे न्यासरूपेण स्थापयामास।

यदा वासवदत्ता पद्मावत्याः समीपे वसति, तस्मिन् काले एव वत्सराजः उदयनः पद्मावतीं विवाहयति। मगधराजस्य साहाय्येन उदयनः स्वस्य हृतराज्यं पुनः प्राप्नोति। तत्पश्चात् यौगन्धरायणः वासवदत्तया सह सर्वेषां पुरतः आत्मप्रकाशं करोति तथा च उदयनस्य समीपे क्षमायाचनं अपि करोति।

अन्ते राजा उदयनः तस्य पूर्वपत्न्य वासवदत्तया सह पुनर्मिलति। एवं प्रकारेण नाटकस्य समापनं भवति।

अङ्कः- नाटकस्य कश्चन अध्यायः।

धीरललित नायकः- उद्वेगरहितः, मृदुप्रकृतिः, कलाचर्चायां निमग्नः नायकः।

१.३.२ शीर्षकस्य तात्पर्यम्-

'स्वप्नवासवदत्तम्' नाटकस्य संक्षिप्तपरिचयम् प्राप्य अधुना भवन्तः अस्य शीर्षकस्य तात्पर्यं ज्ञातुं शक्नुवन्ति। संस्कृतस्य अलङ्कारशास्त्रे निर्दिष्टानां नियमानां अनुसारं नाट्यकाराः सामान्यतः तेषां नाटकानां प्रमुखचरित्रेण, विशेषघटनया, वा उभयसम्बन्धेन वा नामकरणं कुर्वन्ति। अस्मिन् विषये साहित्यदर्पणकारेण विश्वनाथेनोक्तम्—

नाम कार्यं नाटकस्य गर्वितार्थप्रकाशकम्।

अर्थात् नाटकस्य नाम एवंकार्यम् यत्र नाटकीयाख्यानस्य मूलभावः प्रकट्यते। तदनुसारं नाट्यकारेण भासेन अपि स्वप्नवासवदत्तं इति विशिष्टं शीर्षकं स्वीकृतम्। 'स्वप्नवासवदत्तम्' इत्येतस्य नाम्नः विश्लेषणं एवं कर्तुं शक्यते -

स्वप्ने दृष्टा वासवदत्ता स्वप्नवासवदत्ता। सा एव अभेदोपचारात् स्वप्नवासवदत्तम्।

अर्थात् स्वप्ने दर्शनं प्राप्ता वासवदत्ता, सा स्वप्नवासवदत्ता। अस्य नाटकस्य प्रमुखविषयेण सह सा अभिन्नरूपेण कल्पिता अस्ति। अतः नाटकं स्वप्नवासवदत्तम् इति नाम्ना निर्दिष्टम्।

अस्य नाटकस्य पञ्चमे अङ्के नायकः वत्सराजः उदयनः तस्य निद्रायाम् स्वप्नाविष्ट एव वासवदत्तया सह संवादं कृतवान्। एतामेव उपघटनामाश्रित्य नाटकस्य नाम स्वप्नवासवदत्तम् इति निश्चितम्। शीर्षके उल्लिखितस्वप्नदृश्येन सह नाटकस्य प्रमुखघटनाया गाढः सम्बन्धः अस्ति। अतएव एतत् शीर्षकं सार्थकं तथा तात्पर्यपूर्णं मन्यते।

अलङ्कारशास्त्रम्- काव्यस्य विभिन्नादिशां सम्यक् विचारविषयको ग्रन्थः।

अलङ्कारः - काव्यस्य सौन्दर्यवर्धकः अस्थिरधर्मः।

१.३.३ नाटके व्यवहृता रसाः अलंकाराश्च

इदानीं भवान् 'स्वप्नवासवदत्तम्' नाटके व्यवहृतरसानाम् च अलङ्काराणां च विषये ज्ञातुं शक्नोति। संस्कृतालङ्कारशास्त्रे रसः काव्यस्य आत्मा इति उच्यते। रसं विना काव्यस्य किंचिदऽपि अस्तित्वं नास्ति। संस्कृतालङ्कारशास्त्रस्य नियमानुसारं नाटके श्रृंगारः वीरः वा रसः अङ्गिरसः भवितव्यः। करुणः, हास्यः, रौद्र इत्यादयः रसाः प्रधानरसस्य सहायकाःभवन्ति। स्वप्नवासवदत्तम्- नाटके प्रधानः रसः विप्रलम्भश्रृंगारः अस्ति। अस्य नाटकस्य तृतीयाङ्के नायकः वत्सराजः उदयनेन सह पद्मावत्याः विवाहार्थं मालागुञ्जनस्य दायित्वं उदयनस्य प्रथमात्रयै वासवदत्तायै अर्पयति। इदं विप्रलम्भस्य उत्कृष्ट-उदाहरणं अस्ति।

अस्मिन् नाटके सुन्दराणां अलङ्काराणां प्रयोगेन नाटकं अधिकं मनोग्राहिभवति। अस्मिन् 'स्वप्नवासवदत्तम्' नाटके उपमा, उत्प्रेक्षा, दृष्टान्त, अर्थान्तरनासः, अपह्नुतिः, स्वभावोक्तिः, काव्यलिङ्ग इत्यादयः उपयुक्ताः अलङ्काराः सन्ति।



ज्ञातव्यम्

१) संस्कृतसाहित्यस्य नाटकेषु चत्वारः प्रकारका नायकाः विद्यन्ते। ते सन्ति – धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तः च।

२) रसं विना कापि रचना काव्यत्वं प्राप्नोति न। एते रसाः नव प्रकारकाः। ते सन्ति – शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः। तेषु शृङ्गाररसः पुनः द्विविधे विभज्यते – सम्भोगशृङ्गारः तथा विप्रलम्थशृङ्गारः।

१.४ नाट्यकारभासस्य परिचयः

स्वप्नवासवदत्तमनाटकस्य नाट्यकारः भासः भारतीयनाट्यसाहित्यस्य पुरोधा इति कथ्यते। भासः पूर्णाङ्गस्य तथा बहुचरित्रयुक्तनाटकस्य प्रथमः रचयिता अस्ति।

१.४.१ भासस्य रचनावली तथा ताषां स्रोताः –

अधुना भवन्तः भासस्य नाटकानि तेषां स्रोतान् च ज्ञातुं समर्थाः भविष्यन्ति। महाकवि भासः त्रयोदशनाटकानि रचितवान्। एतानि नाटकानि सन्ति – १) मध्यमव्यायोगः, २) पञ्चरात्रम्, ३) दूतवाक्यम्, ४) दूतघटोत्कचम्, ५) कर्णभारम्, ६) उरुभङ्गम्, ७) बालचरितम्, ८) अभिषेकनाटकम्, ९) प्रतिमानाटकम्, १०) प्रतिज्ञायोगन्धरायणम्, ११) स्वप्नवासवदत्तम्, १२) चारुदत्तम्, १३) अविमारकम् चेति । एतेषु मध्यमव्यायोगः, पञ्चरात्रम्, दूतवाक्यम्, दूतघटोत्कचम्, कर्णभारम्, उरुभङ्गम् इति महाभारतस्य आधारेण रचितानि सन्ति। 'प्रतिमानाटकम्', 'अभिषेकनाटकम्' चेति द्वयं रामायणाश्रितम् अस्ति। बालचरितस्य स्रोतः 'हरिवंशः' अस्ति। 'स्वप्नवासवदत्तम्' 'प्रतिज्ञायौगन्धरायणम्' च बृहत्कथायां वर्णितं उदनकथाधारितं भवति। 'अविमारकम्' 'चारुदत्तम्' च इत्यनयोः विषयवस्तुनां स्रोतः इतसम्प्रत्यपि अनिश्चितं, तथापि एते नाटके लोककथाश्रिते इति गण्येते।

१.४.२ त्रिवान्द्रमग्रन्थमालायां भासस्य मान्यता

अत्र भवता ज्ञातव्यम् यत् भासकृतानि नाटकानि कियत्कालपर्यन्तं लोकदृष्टेः लुप्तानि एव आसन्। किन्तु सौभाग्यवशात् १९०९ तमे वर्षे महामहोपाध्यायगणपतिशास्त्रिणा केरलराज्यस्य त्रिवेन्द्रमनामके स्थले एतानि नाटकानि ३०० वर्षाणां पुरातनपाण्डुलिप्यां समुद्धृतानि। किन्तु एषु नाटकेसु कुत्रापि नाटककर्तुः नाम नासीत्। पण्डितगणपतिशास्त्रिणा एषां ग्रन्थानां समीक्षात्मकं परीक्षणं कृत्वा एतत् निर्णयं प्राप्तमासीत् यत् एतानि त्रयोदशनाटकानि एकेन एव कविना विरचितानि, स च कविः महाकविः भासः।

एषु नाटकेषु बहूनि साम्यानि दृश्यन्ते। तद् अत्र निर्दिष्टानि सन्ति-

१) भासस्य प्रतिनाटकं 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इति वाक्येन आरभ्यते। सामान्यतः संस्कृतनाटकानि नान्द्या श्लोकेन एव आरभ्यन्ते।

२) 'कर्णभारम्' व्यतिरिक्तं अन्येषु नाटकेषु 'स्थापना' शब्दः प्रस्तावनारूपेण प्रयुक्तः अस्ति। सामान्यतः संस्कृतनाटकेषु तस्य स्थाने 'प्रस्तावना' इति कथ्यते।

३) नाटकेषु कुत्रापि नाटककर्तुः नामोल्लिखितम् नास्ति। नाटककर्तुः नाम वंशः परिचयश्च सामान्यसंस्कृतनाटकानाम् एकं लक्षणीयं वैशिष्ट्यम् अस्ति।

४) भासस्य अनेकनाटकानां प्रथमश्लोके तस्यनाटकस्य प्रमुखचरित्राणां नामानि उल्लिखितानि सन्ति। तद् मुद्रालंकार इति कथ्यते।

५) एतेषां नाटकानां भरतवाक्येषु पर्याप्तं साम्यम् दृश्यते ।

६) एषु नाटकेषु केचन शब्दाः दृष्टाः ये यथाशास्त्रं न सन्ति। तदतिरिक्तं अनेके आर्षप्रयोगाः अपि दृश्यन्ते।

७) एषु नाटकेषुबहुषु स्थलेषु नाट्यशास्त्रस्य नियमाः न दृश्यन्ते । नाट्यशास्त्रानुसारं मञ्चे दूराह्वानम्, मरणम्, शयनं, वधः, च न प्रदर्शनीयाः, किन्तु 'पञ्चरात्रे' दूराह्वानस्य, 'प्रतिमा' तथा 'उरुभङ्ग' इति नाटकयोः मरणस्य, 'बालचरिते' वधस्य च दृश्योपस्थापना कृता अस्ति।

८) अत्र अनेकनाटकेषु समाननामयुक्तानि चरित्राणि विद्यमानानि। यथा- महिलाद्वाररक्षकस्य नाम विजया, कञ्चुकीयस्य नाम बादरायण इत्यादि।

इत्थम् उक्तनाटकानि एकस्य एव रचयितुः कृतयः इत्येतत् अनुमातुं शक्यते। तेन एतेषां रचयिता महाकविः भासः एव इति निरूप्यते।

महाकविः बाणभट्टः तस्य रचिते हर्षचरिते भासस्य विषये एवम् अवदत्-

सूत्रधारकृतारम्भैर्नाटकैः बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव।

अत्र उक्तं यत् भासस्य रचनासु त्रीणि वैशिष्ट्यानि लक्षितानि। तानि यथा- सूत्रधारस्य प्रवेशेन आरम्भः, अनेकचरित्राणां समावेशः तथा उपकथायाः अधिकता। यतः लब्धानि त्रयोदशनाटकानि अपि एतै विशेषणैः युक्तानि। अतः एतानि सन्देहं विना भासेन रचितानि इति वक्तुं शक्यते।

इतोऽपि यशस्विकविः राजशेखरः भासस्य नाटकानां मध्ये 'स्वप्नवासवदत्तम्' इति नाटकस्य विषये विशेषतया एवं निरूपितवान्यत् एतत् नाटकं अग्निरपि दग्धं कर्तुं अशक्तोऽभवत्। तेन एवं कथ्यते -

'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।'

राजशेखरेणापि 'स्वप्नवासवदत्तम्' नाटकं भासस्य कृतिः इति व्यक्तम्। यतः

नान्दीः - नाटकस्य आरम्भे स्थितं आशिर्वादवचनयुक्तं स्तुतिगीतम्।
भरतवाक्यम् - नाटकस्य समापने अभिनेतृभिः मंगलकामनायै गीतं श्लोकम्।
आर्षप्रयोगः - ऋषिणा उक्तशब्दप्रयोगः। अत्र ऋषिशब्देन प्राचीनपण्डिताः सूच्यन्ते।
नाट्यशास्त्रम् - भरतमुनिना प्रणीतं मूलतः नाट्यसम्बद्धचिन्तनविषयकः प्राचीनग्रन्थः।

अन्यानि नाटकानि अपि 'स्वप्नवासवदत्तम्' नाटकेन सह एकजातीयानि, तस्मात् एतानि त्रयोदश नाटकानि सर्वाणि अपि भासस्य कृतय इति प्रमाणितम् अस्ति।

१.४.३ भासस्य कालः

कतिपयान् विदुषः विहाय अधिकांशाः संस्कृत कवयः स्वविषये किमपि न लिखितवन्तः। फलतः तेषां कालनिर्धारणं इतिहासकाराणाम् कृते कठिनं कार्यम् अभवत्। महाकवि भासोऽपि स्वस्य कालस्य वंशावलीविषये च मौनम् तिष्ठति। किञ्चित् प्रमाणं गृहीत्वा विद्वद्भिः भासस्य समयनिर्धारणाय प्रयत्नः कृतः, येषु केचन यथा–

(१) निःसंदिग्धं यत् भासः कालिदासस्य पूर्ववर्ती अस्ति यतः च कालिदासः 'मालविकाग्निमित्र' नामककाव्ये भासस्य आदरपूर्वकं नामोल्लेखं कृतवान् – 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं परिषदो बहुमानः'। प्रथितयशसां इत्यस्मिन् पदे ज्ञायते यत् कालिदासस्य समये भासः पर्याप्तं प्रसिद्धिम् लब्धवान् आसीत्। कालिदासस्य कालः प्रथमे शताब्दे ई०पू० इति निश्चितः, अतः भासस्य कालः ई०पू०तः शतं वर्षाणि पूर्वं इति मन्यते।

(२) कौटिल्यः भासकृत प्रतिज्ञायोगन्धरायणस्य एकं 'नवशराबसलिलैः' इति श्लोकं स्वस्य अर्थशास्त्रे उद्धृतवान् चाणक्यः चन्द्रगुप्तस्य मौर्यस्य मन्त्री आसीत्। चन्द्रगुप्तः ३२१ तमे संवत्परे सिंहासनारूढः अभवत्। भासस्य कालः चाणक्यतः न्यूनातिन्यूनं ५० संवत्सरान् पूर्वं गृहीतो भवेत्। अतः भासस्य कालः ३७० ईसापूर्वात् परं स्वीकर्तुं शक्यते।

(३) शूद्रकस्य 'मृच्छकटिकं नामकं नाटकं' चारुदत्तस्य नाटकस्य परिवर्धितंरूपं अस्ति। शूद्रकस्य कालः २२०–१९६ ईसापूर्वे निश्चितः अभवत्। अतः भासस्य स्थितिः २२० ईसापूर्वात् पूर्वं निश्चेतुं शक्यते।

४) भासस्य 'स्वप्नवासवदत्तम्' तथा 'प्रतिज्ञायौगन्धरायणम्' इत्येतयोः द्वयोः इतिहासमूलकयोः नाटकयोः प्रद्योतः, उदयनः दर्शकःच एते त्रयः राजानः उल्लिखिताः सन्ति। पण्डितानां मतानुसारं राज्ञः दर्शकस्य तस्य उत्तराधिकारिणः च कालः क्रमेण ईसापूर्वं ४७५ तथा ईसापूर्वं ४५० इति निर्दिष्टः अस्ति। अतः दर्शकः, उदयनः, प्रद्योतः च ईसापूर्वं ४७५ तः ईसापूर्वं ४५० पर्यन्तं आसन्।

उपयुक्तचर्चायाः निष्कर्षरुपेण एतद् वक्तुं शक्यते यत् भासस्य कालस्य उच्चतमा सीमा ईसापूर्वं ४५० तथा न्यूनतमा सीमा ईसापूर्वं ३७० इति।

१.४.४ भासस्य लेखनशैल्याःविशेषता

भासस्य कालं ज्ञात्वा, अधुना भवन्तः भासस्य लेखनशैली-विशेषताविषये ज्ञातुं शक्नुवन्ति।

भासस्य नाटकेषु भाषाशैली अति सरलास्ति। तस्य रचनासु दीर्घसमासयुक्तानां शब्दानां उपयोगो न दृश्यते। तस्य रचनाविधिः अति स्वाभाविकः, यत्र कृत्रिमतायाः किमपि स्थानं नास्ति। तथैव, तस्य वर्णनानां वास्तविकता नाटकेषु आकर्षणं संवहति। यद्यपि तस्य रचनासु काऽपि जटिलता नास्ति, तथापि कतिपयस्थलेषु तस्य लेखनं किंचित् अस्पष्टं भवति। भासस्य रचनासु केचन शब्दाः दृष्टिगोचराः भवन्ति, ये परवर्तिसंस्कृतसाहित्ये सामान्यतः न दृश्यन्ते। एते शब्दाः अतीव प्राचीनाः सन्ति तथा च ते व्याकरणसम्मताः न भवन्ति। अनेन ज्ञायते यत् भासः महाकाव्यरीत्या प्रेरितः आसीत्।

भासस्य यथार्थदृष्टिः तस्य नाटकीयपात्रेषु स्पष्टतया प्रतिबिम्बिता भवति। तस्य पात्राणि लौकीकगुणसम्पन्नानि भवन्ति, येन पाठका दर्शकाः वा सहजतया तैः पात्रैः सह आत्मीयतां प्राप्य तेषां जीवनस्य उत्थानपतनयोः समभावमनुभवन्ति।

भासस्य नाटकानां प्रमुखविशेषता संलापानां औचित्यम् अस्ति। तस्य नाट्यकृतेः संलापाः स्वाभाविकाः, यथार्थानुगताः परिपक्वतया युक्ताः च सन्ति।

तस्य नाटकेषु अलंकाराणां सूक्ष्मः उपयोगः स्फुटं दृश्यते। सामान्यतः सरलालंकाराः यथा उपमा, रूपकम्, उत्क्रान्तिः, अर्थान्तरन्यासः, अनुमितिः इत्यादयः अत्र अधिकं प्राधान्यं लभन्ते।

भासस्य नाटके विविधरसानां प्रयोगंद्रष्टुं शक्यते। वीरः-वात्पल्यः-हास्यः-अद्भुतः-रौद्रः- करुणरसेषु कवेः विशेषः प्रीतिः दृश्यते। सामान्यतः शृंगाररसस्य श्रेष्ठत्वं मन्यते, किन्तु भासस्य नाट्यकृतौ एषा धारणा नाङ्गीकृता। केवलं स्वप्नवासवदत्ते तथा अविमारकनाटके एव शृंगाररसस्य विशेषं स्थानं दृश्यते।

भासस्य नाटकानां श्लोकेषु नानाविधानां छन्दसां सुन्दरः प्रयोगः दृश्यते। छन्दसां क्षेत्रे सः कठोरतया छन्दशास्त्रस्य नियमानुगमनं कृतवान्। तस्य सर्वेषु नाटकेषु वसन्ततिलका, उपजातिः, तथा शार्दूलविक्रीडितं छन्दांसि नियमितरूपेण दृश्यन्ते। एतेभ्योऽतिरिक्तं भासस्य नाटकेषु विशेषप्राधान्यं प्राप्तानि छन्दांसि सन्ति - मालिनी-शालिनी-पुष्पिताग्रा-प्रहर्षिणी-शिखरिणी-आर्या इत्यादीनि।



छन्दःशास्त्रम् - छन्दसां विषये सम्यक् ज्ञानं प्रददाति यत् शास्त्रं तत्।

१.५ स्वप्नवासवदत्तम् नाटकस्य अङ्कानां सारांशः

अधुना भवान् नाटकस्य अङ्कानां प्रतिपाद्यविषयाणां सारः ज्ञास्यति

प्रथमाङ्कः - प्रथमाङ्के वत्सराजस्योदयनस्य प्रधान अमात्यो यौगन्धरायणः स्वयं परिव्राजकवेषं विधाय अवन्तिकावेशधारिणीवासवदत्तया सह तपोवनमागच्छति। अस्मिन्नेव समये

महाराजदर्शकस्य भगिनी पद्मावती तपोवननिवासिनीं निजमातरं द्रष्टुं तपोवनमगच्छतीति कारणात् भटाः सामान्यजनान् मार्गादुत्पारयन्ति। अवन्तिकावेषधारिणी वासवदत्तापरिव्राजकवेषधारी यौगन्धरायणश्च भटैरुत्पारणमवलोक्य खिन्नौ भवतः। इत्यवलोक्य काञ्चुकीयः भटान् वारयति यौगन्धरायणं उत्पारणकारणं निर्दिशति च। ततः पद्मावत्याज्ञया तस्याः काञ्चुकीयः उद्घोषयति यत् यो यद् वाञ्छेद् कलशं, वस्त्रं, द्रव्यादिकं स अत्रागच्छेद राजकुमारीं प्रति याचनां कुर्याच्च। उद्घोषणां कृत्वा यौगन्धरायणो वासवदत्तया सहागत्य पद्मावत्याः समक्षे अवन्तिकावेषधारिण्याः वासवदत्तायाः परिचयं स्वभगिनीरूपेण प्रकटयति। स प्रोषितभर्तृकाया अवन्तिकावासवदत्तायाः संरक्षणार्थं किञ्चित् कालपर्यन्तं स्ववासस्थाने स्थापयितुं च पद्मावतीं प्रति प्रार्थयति। पद्मावती काञ्चुकीयकथनानन्तरं यौगन्धरायणस्य प्रार्थनां स्वीकरोति। अतो, परिव्राजकवेशधारियौगन्धरायणः स्वकृतज्ञतां प्रकटयति। अस्मिन्नवसरे एको ब्रह्मचारी तपोवनं प्रविशति। यौगन्धरायणस्तस्यागमनप्रयोजनं पृच्छति। सः कथयति यत् 'लावाणकग्रामादहं समागतोऽस्मि। लावाणकग्रामेऽधुनाऽतिभीषणा विपत्तिः समुपस्थिता। तत्रोदयनो नाम राजा प्रतिवसति। तस्य वासवदत्तानाम्नी प्रियतमा भार्याऽऽसीत्। तदनन्तरं तस्मिन्नृपतौ मृगयार्थं निर्गत लावाणकग्रामस्य दाहेन सा दग्धा। तदनन्तरमग्निदाहव्यसनाद्वासवदत्तामुद्धर्तुं यौगन्धरायणनामधेयो सचिवस्तत्रैव वह्नावात्मानमपातयत्।' वृत्तान्तमिदमाकर्ण्य राजा भृशं दुःखितो जातः। तेन राज्ञः स्वास्थ्यलाभप्रयत्नविषये मन्त्रिणो रुमण्वतोऽपि प्रशंसा कृता। वासवदत्ता तस्य कथनमाकर्ण्य सुखमनुभूतवती –'दिष्ट्या सुनिक्षिप्त इदानीमार्यपुत्र' इति।

तदनन्तरं ब्रह्मचारी गच्छति। लब्ध्वानुमतिं यौगन्धरायणोऽपि प्रस्थानं करोति । तापस्या आशीर्वादवचनं गृहीत्वा पद्मावतीवासवदत्ते च सन्ध्यासमयं ज्ञात्वा पर्णशालायां प्रविशतः।

द्वितीयाङ्कः – द्वितीयाङ्कस्य प्रवेशके चेटी रङ्गभूमिं प्रविश्य पद्मावत्याः कन्दुकक्रीडनस्य वृत्तान्तं सूचयति। परं कन्दुकेन क्रीडन्ती पद्मावती वासवदत्तया सह प्रविशति। ततः वासवदत्तायाः पद्मावत्याश्च परिहासपूर्णो वार्तालापो वर्तते। तस्मिन्नेव काले धात्री आगत्य शुभसमाचारं सूचयति यत् 'राज्ञा उदयनेन सह पद्मावत्या विवाहो निश्चितः।' तत् श्रुत्वा वासवदत्ता दुःखं प्रकटयति। यदा दुःखस्य कारणं धात्री पृच्छति तदा चातुर्येण रहस्यगोपनं कर्तुकामा वासवदत्ता कथयति यत्– 'तथा नाम सन्तप्योदासीनो भवतीति।' तदा धात्री समाधानं करोति 'आगमप्रधानानि सुलभपर्यवस्थानि महापुरुषहृदयानि भवन्ति।' तदानीमेव एकापरा चेटी आगत्य पद्मावतीं कौतुकमङ्गलशुभारम्भं सूचयति वासवदत्तां च मङ्गलस्थानाय शीघ्रं गन्तुं कथयति। ततः सर्वे पात्राः निष्क्रान्ताः।

तृतीयाङ्कः – तृतीयाङ्के उदयनेन सह पद्मावत्या विवाहवृत्तान्तेन ईषदुःखी वासवदत्ता प्रमदवने स्वमनः सान्त्वयन्ती प्रविशति। तदानीमेवैका चेटी पुष्पं गृहीत्वा रङ्गभूमिमागच्छति। सा चेटी पद्मावत्याः विवाहार्थं कौतुकमालां ग्रथितुं वासवदत्तां प्रति निवेदयति। विविधौषधिनाम पृच्छन्ती वासवदत्ता मनोहरां कौतुकमालां गुम्फति। किन्तु चातुर्येण कारणं निरूपयन्ती सा मालायां सपत्नीमर्दनमौषधं न ग्रथ्नाति।

झटित्येव अपरा चेटी आगत्य तां मालां गृहीत्वा शीघ्रं गृहाभ्यन्तरं व्रजति। इतस्तु अनेन

विवाहवृत्तान्तेन भृशं दुःखिता वासवदत्ता दुःखं विनोदयितुं शयितुमिच्छति।

चतुर्थाङ्कः- चतुर्थाङ्कस्य प्रवेशके राजोदयनस्य विवाहविषये प्रसन्नतां प्रकटयन् च स्वस्थतां प्रति चिन्तित उदयनमित्रो विदूषकः प्रविशति। तस्मिन्नेव काले एवैका चेटी तमन्वेषयन्ती तत्रागच्छति। सा विदूषकं पृच्छति यत् जामात्रा स्नानं कृतं न वेति। विदूषकः उदयनस्नानं कथयित्वा भोजनं विहाय विलेपनद्रव्यमानेतुं तामादिशति। ततः उभौ गच्छतः। अङ्कस्य प्रारम्भे पद्मावती, वासवदत्ता, चेटी च प्रमदवने दृश्यन्ते। तत्र पद्मावत्या वासवदत्तायश्च वार्तालापे उदयनं प्रति पद्मावती-वासवदत्तयोः प्रेमातिशयः प्रकटी भवति। अनन्तरन्तत्र राजाविदूषकौ समायातौ। दृष्ट्वैव वासवदत्तां निगूहयितुं पद्मावती माधवीलतामण्डपं प्रविशति, राजाविदूषकावपि सूर्यतापं वारयितुं तन्मण्डपं प्रवेष्टुमिच्छतः। तदा चेटी भ्रमरयुक्तां लतामेकावधूय तदागमनं वारयति। राजाविदूषकौ लतामण्डपात् बहिरेव उपविशतः। वासवदत्ता स्वपतिमुदयनमवलोक्यप्रसन्नतामनुभवति। कथयत्यात्मानं - 'दिष्टया प्रकृतिस्थशरीर आर्यपुत्रः।' किन्तु सा पद्मावत्या सह परिणयं कृतवानस्तीति विचार्य रोदिति। यदा चेटी साश्रुपातमुखं वासवदत्ताया पश्यति, तदा सा अश्रुपातस्य वास्तविकं कारणं कथयितुं न शक्नोति अतःकथयति - 'एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः'।

विदूषको राजानं प्रति पृच्छति - वासवदत्तापद्मावत्योश्च का प्रियातिशयेन। राजा प्रथमं नैव किमपि वदति किन्तु पौनः पुन्येन पृच्छति सति कथयति -

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति।।

प्रच्छन्नीभूता पद्मावती तयोर्वार्तां शृणोति। श्रुत्वेमां वार्तां पद्मावती राजानं प्रशंसति, वासवदत्ता चाऽऽत्मतुष्टिं लभते। पुनः राजापि तमेव प्रश्नं विदूषकं प्रति पृच्छति। विदूषकोऽपि वासवदत्तां स्वसम्मानस्य पात्रमभिधाति पद्मावत्याः गुणानाञ्च प्रशंसा करोति। अतः राजा कथयति-- 'सर्वं खलु निवेदयिष्यामि देव्यै वासवदत्तायै।' विदूषको राजानं स्मारयति यद्वासवदत्ता उपरता। अनन्तरं राजा 'अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया। ततो वाणी तथैवेयं पूर्वाभ्यासेन निःसृता।।' इत्युक्त्वा नेत्राभ्यां वारीणि विमुञ्चति। विदूषकः तस्य मुखप्रक्षालनार्थं जलमानेतुं बहिर्गच्छति। अवसरं प्राप्य वासवदत्ता लतामण्डपात् गच्छति। किन्तु गमनात्प्रागेव पद्मावती राजासमक्षे गन्तुमियेष। अस्मिन्नेव काले विदूषको जलं गृहीत्वा समायाति। इतः पद्मावती अप्यागत्य उदयनस्य नेत्रयोरश्रुबिन्दूनां कारणं पृच्छति। 'काशकुसुमरेणुना राज्ञो मुखं साश्रुपातमिति' विदूषको भणति पुनश्च राजाऽपि तथैव समर्थयति। राज्ञो मुखे प्रक्षालिते विदूषकः स्मारयति राजानं यदपराह्णकाले मगधराजो भवता सह निजमित्राणि द्रष्टुमिच्छति। अतो भवता शीघ्रं प्रस्तुतेन भाव्यम्। इत्युक्त्वा सर्वे गच्छन्ति।

पञ्चमाङ्कः- पञ्चमाङ्कस्य प्रवेशके पद्मिनिकामधुरिके रङ्गभूमिं प्रविशतः। तयोर्वार्तालापेनावगम्यते यत् पद्मावती शीर्षवेदनया पीडिता वर्तते। समुद्रगृहके तस्याः कृते शय्यास्तीर्णा। पद्मिनिका मधुरिकाम्प्रति कथयति - गच्छ, वासवदत्तां शब्दायस्व, सा मधुराभिः कथाभिः पद्मावत्याः शिरोवेदनां दूरीकरिष्यति। मधुरिका वासवदत्तामानेतुं गच्छति। पद्मिनिका

विदूषकञ्चान्वेषयति। तदनन्तरं पद्मिनिका वसन्तकमन्विष्य तं पद्मावत्या शिरोवेदनावृत्तान्तं श्रावयति, राजानं प्रति निवेदयितुं कथयति च। तदनन्तरं पद्मिनिका शीर्षानुलेपनमानेतुं गच्छति। विदूषकश्च पद्मावत्याः वृत्तान्तं श्रावयितुं गच्छति।

अङ्कस्य प्रारम्भे वासवदत्तावियोगदुःखदुःखितो राजा रङ्गमञ्चम् प्रविशति। तदानीमेव विदूषकः आगत्य पद्मावत्याः शिरोवेदनावृत्तान्तं निवेदयति। पद्मावतीमपि वासवदत्तामिव चिन्तयन् राजा विदुषकेन सह पद्मावतीं द्रष्टुं समुद्रगृहं गच्छति। नास्ति तत्र पद्मावती। अतस्तत्र पद्मावतीमलब्ध्वा तत्प्रतीक्षाभिप्रायेण पद्मावती कृते आस्तीर्ण शय्यामधिशेते राजा। विदूषकः तत्मनोरञ्जनाय कथां कथयति। अस्मिन्नेव समये राजा सुप्तः। सुप्तं तं ज्ञात्वा विदूषकोऽपि शीतमपवारयितुं वस्त्रग्रहणाय गच्छति।

अस्मिन् समयेऽवन्तिकावेशधारिणीवासवदत्ता चेट्या निर्दिश्यमाना तत्रागच्छति। अनन्तर चेटी वासवदत्तां समुद्रगृहं गमनायोक्त्वा शीर्षानुलेपमानेतुं गच्छति, इत; वासवदत्तापि समुद्रगृहे प्रविशति। तत्र स्वपन्तं राजानं सा पद्मावतीति मन्यमाना तस्या पार्श्वे तस्मिन्नेव पर्यङ्के स्वपिति। राजा स्वप्ने 'हा वासवदत्ते' इति भणति। तदा वासवदत्ता जानाति यद् राजा शय्यायां स्वपिति, न तु पद्मावतीति विज्ञायोत्तिष्ठति। राजा पुनः स्वप्न एव 'हा प्रिये! हा प्रियशिष्ये! देहि मे प्रतिबचनम्' इति कथयति। वासवदत्तापि 'आलपामिभर्तः! आलपामी त्युक्त्योत्तरं ददाति। किञ्चित्कालान्तरे राज्ञोऽवलम्बमानं हस्तं शय्योपरिनिधायापरदर्शनशङ्कया ततो वहिर्गच्छति। तत् स्पर्शसुखमनुभूय राजा त्वरितमुत्थाय कातर स्वरेण शब्दं कुर्वन्तामनुसरति। किन्तु द्वारपक्षेण ताडितो भूत्वा विरमति। अस्मिन्नेवावसरे विदूषकस्तत्रागच्छति। तं राजा कथयति- 'वयस्य! प्रियमावेदये, प्राणान् धरते खलु वासवदत्ता।' परन्तु विदूषको वासवदत्तायाः जीवनस्य सम्थावनामपि न स्वीकरोति। तदा राजा पुनः कथयति - वयस्य! मा मैवम्,

शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता।।

परन्तु विदूषकः राजानं सान्त्वयन् कथयति यत् 'सा स्वप्ने दृष्टा भवेत्।' अनन्तरं राजा विदूषकौ चतुःशालाभ्यन्तरे ब्रजतः। तदानीमेव काञ्चुकीय आगत्य राजानं महाराजदर्शकवृत्तान्तं सूचयति यत् भवदीयं शत्रुमारुणिमाक्रमितुं भवतोऽमात्यो रुमण्वान् महासैन्यसमूहेन समागतोस्ति, अस्माकमपि चतुरङ्गिणी सेना सन्नद्धा। अतः शत्रुविनाशाय प्रयाणं कुरु। तदनन्तरं राजा प्रयाणं करोति।

षष्ठाङ्कः -षष्ठाऽङ्कस्य मिश्रविष्कम्भके काञ्चुकीयो रङ्गभूमिमागत्यप्रतीहारीम्प्रति आदिशति यत् महाराजमुदयनं सूचय - 'वासवदत्तायाः पितुः महाराजप्रद्योतसकाशाद् रैभ्यसगोत्रः काञ्चुकीयः, तस्य मात्रा अङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री राज्ञः प्रतीहारमुपस्थितौ।' प्रतीहारी सन्देशं श्रावयितुमसमर्थतां प्रकटयति। सा कथयति - घोषवतीवीणाभिगमनादधुना राज्ञो वासवदत्तासम्बन्धिदुःखं नूतनज्ञातमतोऽधुना तत् समीपं गमनस्य समयो नास्ति। पुनः काञ्चुकीयो गदति- 'निवेदयतु यः सन्देशोऽस्माभिरुक्तः, स एव तत्सम्बन्धी यतः त्वं गच्छ। प्रतीहारी कथयति

यत् विदूषकेन सह राजा दूत एवागच्छति, अत्रैव तस्मै निवेदयिष्यामि। अतः प्रतीक्षमाणौ तौ तत्र तिष्ठतः।

अग्रेऽङ्के वासवदत्तावियोगेन विलपन् राजा घोषवतीमङ्के निधाय तामुपालभमानः रङ्गमञ्चम् प्रविशति। विदूषकः आगत्य तं सम्बोधयति। तदा राजा घोषवतीवीणायाः शुद्धयर्थं विदूषकं प्रेषयति। विदूषके गते सति प्रतीहारी राजानं प्रद्योतकाञ्चुकीयस्य वासवदत्ताधात्रीवसुन्धरायाश्चागमनं निवेदयति। पद्मावतीमाहूय तौ सादरमुपस्थापयितुं राजा प्रतीहारीमादिशति। उभौ चागत्य राजानं महासेनस्य सन्देशं श्रावयतः – 'आवाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः। एषा चित्रफलका तव सकाशं प्रेषिता।' एवमुक्त्वा ताभ्यां चित्रफलका राज्ञे दत्ता। वासवदत्तायाश्चित्रं दृष्ट्वा पद्मावती राजानमुक्तवती – 'एतादृशी रूपवती एका स्त्री अत्रैव निवसति।' राजा तामानेतुमाज्ञापयति। अस्मिन्नेवावसरे परिव्राजकवेषधारी यौगन्धरायणः निजभगिनीम् अवन्तिकां याचते। पद्मावती अवन्तिकावेषधारिणीं वासवदत्तामानयति। धात्री वसुन्धरा तां वनितां पश्यति परिचिनोति च। झटित्येव यौगन्धरायणोऽपि परिब्राजकवेषं परित्यज्य स्वं प्रकटयति। अन्ततोगत्वा सर्वत्रानन्दो भवति, नाटकं सुखान्तं भवति।

१.६ नाटकस्य पात्राणां चरित्रचित्रणम्

चरित्रचित्रणस्य उपरि एकस्य नाटकस्य सफलताऽधिति निर्भरकम्। नाटककर्ता भासेन अत्यन्तं निपुणतया तस्य 'स्वप्नवासवदत्तम्' इतिनाटकस्य चरित्राणि अंकितानि। अस्मिन् अङ्शे भवान् नाटकस्य नायकः उदयनः, नायिका वासवदत्ता तथा पद्मावतीति चरित्राणां परिचयं प्राप्नोति।

उदयनः – राजोदयनो वत्पदेशस्य नृपः नाटकस्यास्य नायकश्च अस्ति। नाटकेऽस्मिनअसौधीरललितनायकरूपेण प्रसिद्धोऽस्ति। स कलाप्रियः मृदुः, दर्शनीयः, विलासप्रियश्चनस्ति। एभिर्गुणैः 'स धीरललितो नायक' इति प्रमाणितो भवति। साहित्यदर्पणे धीरललितनायकस्य लक्षणमुक्तम्– 'निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्।' इति उदयनचारित्रिकविश्लेषणे सति निम्नाङ्कितानि वैशिष्ट्यानि दृश्यन्ते। स निश्चिन्तः, तस्य निश्चिन्तता प्रकारेणानेन प्रमाणिता भवति यद् राज्यभारं मन्त्रिषु निक्षिप्याखेटं करोति वीणां वादयति च। वीणावादनं तस्य कलाप्रियतायाः प्रमाणम्। वीणावादनेऽयमतीव कुशलः। अनेनैव वासवदत्ता वीणावाद्यस्य शिक्षया शिक्षिता। नाटकेऽस्मिन् तस्य कोपस्य दर्शनमपि न भवति, अतस्तस्मिन् मृदुता वर्तत एव।

अयमाकृत्या चात्यन्तरूपवानस्ति। तस्य रूपं सर्वे प्रशंसन्ति। नाटकस्य द्वितीयाङ्के वासवदत्ता उदयनम्प्रति कथयति – 'नहि नहि दर्शनीय एव।' तृतीयाङ्के चेटी राजानं शरचापहीनं कामदेवं कथयति– 'शक्यं भणितुं शरचापहीनः कामदेव इति।' अयं मृगयाविषयेऽपि प्रशंसनीयः। तस्याखेटप्रियता प्रथमाङ्के ब्रह्मचारिणः उक्त्वा प्रमाणिता भवति; ब्रह्मचारी कथयति– 'तस्मिन् मृगयानिष्क्रान्ते राजनि.....।' तस्य प्रेम वासवदत्तायामत्युदात्तमस्ति। प्रथमाङ्के ब्रह्मचारिणाऽवगम्यते यत्– 'ततः प्रतिनिवृत्तो राजा तद्वृतान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान्

परित्यक्तुकामाऽमात्यैर्महता यत्नेन वारितः।' पद्मावत्या सह अस्य परिणये सम्पादितेऽपि अयं तस्यां न रमते। चतुर्थाङ्के पद्मावती कथयति- 'तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणतया ममाग्रतो न रोदिति।' वासवदत्तावियुक्त; सः पदे-पदे तं स्मरति। चतुर्थाङ्के वारं वारं विदूषकेन 'का भवतः प्रिया' इति पृष्ठे उदयनः कथयति -

पद्मावती बहुमता यद्यपि रूपशीलमाधुर्यैः।
वासवदत्ता बद्धं तावन्मे मनो हरति।।

दक्षिणतया स वासवदत्ताम्प्रति निजप्रेम्णः अपि न व्यक्तिं करोति। अनेन ज्ञायते स दाक्षिण्यगुणयुक्तः नायकः। पद्मावत्या सह परिणये जातेऽपि उदयनस्य कान्ता-पदस्य पूर्तिः न भवति - 'वयमिव कान्तावियुक्ताः स्युः' इत्यनेन स्पष्टं ज्ञायते। प्रथमाङ्के उदयनप्रेम प्रशंसन् ब्रह्मचारी स्वयं कथयति - नैवेदानीं तादृशाञ्श्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः। धन्या सा स्त्री यां तथावेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा।' स स्वप्नेपि वासवदत्तामेलनं सबहुमानं पश्यति। यथा पञ्चमाङ्के स स्वयं विदूषकं कथयति-

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद्विभ्रमो ह्यस्तु मे चिरम्।।

इत्थमत्रोदयनः प्रेम्णः आदर्शः इति कथने नातिशयोक्तिः।

अयमुदयनोऽस्ति धृतिमान्। यथा चतुर्थाऽङ्के चेटी कथयति -'आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।' उदयने मनसि सानुक्रोशत्वं वर्तते। वासवदत्ता तद्गुणं प्रशंसति - 'जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।' चतुर्थाङ्के यदा विदूषको माधवीलतामण्डपं प्रवेष्टुं भ्रमरसन्त्रासमुत्पादयितुं प्रयतते तदा वारयति उदयनस्तम् - 'मा मा भवानेयम्।' इत्याद्युक्तिभिः। अस्य हृदये गुरुजनानां कृते अत्यादरभावो वर्तते। सः 'मम प्रवासदुःखार्ता माता कुशलिनी ननु' इत्यादिकथनेन वासवदत्ताधात्रीम्प्रति वासवदत्तामातुरङ्गात्याः कुशलं पृच्छति। आर्यावसुन्धराकाञ्चुकीययोः मुखात् प्रद्योतसन्देशं श्रोतुमासनादुत्तिष्ठते। तस्येदमाचरणं गुरुजनान् प्रति तस्य श्रद्धां प्रकटयति। स षष्ठाङ्के एवमपि कथयति -

भाग्यैश्चलैर्महदवाप्तगुणोपघातः।
पुत्रः पितुर्जनितरोष इवास्मि भीतः।।

इदं कथनमपि गुरुजनान् प्रति तस्य श्रद्धां सूचयति।

स गुणी गुणज्ञश्चास्ति। महासेनप्रद्योतस्य सन्देशे तस्य वीरतायाः प्रशंसा कृता, किन्तूदयनः युद्धे विजयस्य श्रेयः महासेनप्रद्योतस्य, यौगन्धरायणस्य, रुमण्वतश्चेति मन्यते। तस्येदं निरहङ्कारभावस्य गुणज्ञतायाश्च परिचायकम्।

स महान् वीरः। यदा स दर्शकस्य सैन्यबलसहायतया आरुणिमाक्रमितुं सन्नद्धस्तदा तस्य शौर्यस्य ओजस्विताया: परिचयः मिलति। उदयने सौन्दर्य, विद्वत्ता, कुलीनता, आयुः, शीलता चेत्येते गुणाः वर्तन्तेः येन प्रभावितः सन् महाराजदर्शकस्तस्मै स्वभगिनीं पद्मावतीं दातुमैच्छत्। यथा द्वितीयाङ्के चेटी कथयति - 'अभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव दत्ता।' यद्यपि उदयने

केचित् मानवसुलभाः दोषास्तदपि बहवो गुणा अपि वर्तन्ते। यद्वापरशब्दे ये महापुरुषाः भवन्ति तेषां दोषा अपि गुणा एव भवन्ति। अनेन कारणेन एव पथिकाः तं प्रशंसन्ति। यथा – 'स खलु गुणवान् नाम राजा च आगन्तुकेनाप्यनेन प्रशंस्यते।' प्रकारेणानेन प्रस्तुतनाटके उदयनः धीरललितनायकरूपेण वर्तत इति।

वासवदत्ता– नाट्यशास्त्रदृष्ट्या प्रस्तुतनाटकस्य प्रधाननायिका वासवदत्ता स्वीया मध्या नायिकास्ति। साहित्यदर्पणे स्वीयानायिकायाः लक्षणमुक्तम्– 'विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।' मध्यमायाः नायिकायाः लक्षणंयथा तत्रैव – 'मध्या विचित्रसुरता प्ररूढस्मरयौवना। ईषत्प्रगभ्भवचना मध्यमव्रीडिता मता।' वासवदत्ता उज्जयिन्याः राज्ञः प्रद्योतमहासेनस्य सुतासीत्। वत्सराजेनोदयनेन सह वासवदत्तायाः गान्धर्वविवाहो विहितः। तस्मिन्काले क्षत्रियेष्विदं कार्यमुचितमेवासीत्। वासवदत्तायाः चारित्रिकविश्लेषणे वैशिष्ट्यानि यानि दृश्यन्ते तानि अधोलिखितानि –

नाटकस्य अध्ययनेन ज्ञायते यत् वासवदत्तायाः उदयने अति स्नेहः अस्ति। किन्तु वासवदत्तायाः स्नेहे त्यागस्य भावना वर्तते। वासवदत्ता स्वपत्युदयनस्य प्रतिष्ठासमृद्ध्यर्थमेव पतिवियोगमङ्गीकृत्य यौगन्धरायणनीत्यनुरूपं गच्छति। सा कथयति – 'भवतु अविचार्य कर्म न करिष्यति।' अस्ति वासवदत्तायां स्वोच्चकुलाभिमानम्। प्रथमाङ्के तपोवने राजभटैरुत्मारणं श्रुत्वा खेदमनुभवन्ती सा कथयति यत्– 'तथा परिश्रमः परिखेदं नोत्पादयति यथाऽयं परिभवः। सा गुणग्राहिणी वर्तते, अपराणां गुणानियं श्लाघयति यथा प्रथमाङ्के सा पद्मावतीमवलोक्य 'अभिजनानुरूपं खल्वस्या रूपमिति' कथयति। वासवदत्तायाः विश्वासे मूलमस्ति उदयनप्रेम एव। पत्युः उदयनस्य अभ्युदयार्थे सा अनेकान् क्लेशान् सहते। राजा निजमपहृतं राज्यं पुनः प्राप्नुयात् – इत्युद्देशेन सा यौगन्धरायणस्य योजनां सफलयितुं प्रयत्नं करोति। पञ्चमाङ्के समुद्रगृहके च सा भणति – 'किं नु खलु दृष्टास्मि? महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः।' सा स्वभावेन धीरवर्गस्य नायिका; यौगन्धरायणवदेव स्वकार्यसाधने धैर्यं वहति। पद्मावती सपत्नी भविष्यतीति ज्ञात्वापि पत्युर्लाभाय उदयनस्य अभ्युदयार्थेंच सा सर्वं कष्टं सहते। स्वकीयान् वियोगदिवसान् यापयन्ती सा भणति – 'आर्यपुत्रं पश्यामीत्यनेन मनोरथेन जीवामि मन्दभागा।'

वासवदत्ता स्वभावेन सरला निष्कपटपूर्णा च नायिकाऽस्ति। यद्यपि पद्मावत्या सह उदयनस्य विवाहेन तस्याः स्वभावतः दुःखं भवति। दुःखातिशयेन सा निद्रामपि न लभते। तदानीं तयोक्तं वाक्यमिदं कीदृशं मार्मिकं वर्तते – 'अहमपि शय्यायां दुःखं विनोदयामि यदि निद्रां लभे।' किन्तु सा सपत्नीं पद्मावतीं दृष्ट्वास्पर्धां न करोति, किन्तु वासवदत्तया पद्मावतीं प्रति स्नेहः क्रियते। पञ्चमाङ्के पद्मावत्याः शिरोव्यथां श्रुत्वा सा अतीव खिन्ना भवति। सखीजनव्यवहारार्थं क्षमायाचमानायां पद्मावत्यां स्नेहं वितरन्ती सा कथयति – 'आर्थिस्वं नामः शरीरमपराध्यति।' अस्यां स्वसौन्दर्यानुसारमेव कुलीनताप्यस्ति। प्रथमाङ्के तापसी तां दृष्ट्वा, कथयति – 'यदीदृशी अस्या आकृतिरियमपि राजदारिकेति तर्कयामि।' अस्याः पद्मावत्यां भगिनीस्नेहोवर्तते। तद्यथा– 'राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते।' अयमपि अस्याः निष्कपटमनसः परिचयोऽस्ति।

समस्तयोजनाचक्रसञ्चालकं यौगन्धरायणं प्रति कदापि कटुवचनं नाचरति, अतस्तस्मिन् मृदुता सरलता च वर्तत एव। महाराजदर्शकपत्न्यपि अस्या विषये चेटीमुखात् कथयति तृतीयाङ्के – 'महाकुलप्रसूता स्निग्धा इमां तावत् कौतुकमालां गुम्फत्वार्या' इति। अयमपि अस्याः कुलीनतायाः परिचयोऽस्ति।

इयमस्ति एका सतीसाध्वी पतिपरायणा नायिका। सा पतिव्रतधर्मं जानाति प्रोषितभर्तृकाया आचरणमाचरति। यदा प्रथमाङ्के ब्रह्मचारी तपोवनम् प्रविशति तदा वासवदत्ता लज्जते, तदा पद्मावती कथयति 'अम्मो! परपुरुषदर्शनं परिहरत्यार्या। सुपरिपालनीयः खलु मन्त्रन्यासः।' राजा स्वप्नावस्थायां वासवदत्तादर्शनानन्तरं विदूषकम्प्रति कथयति –

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ।।

वासवदत्ताया मनसि राजानम्प्रति श्रद्धा वर्तते। यदा प्रथमाङ्के ब्रह्मचारिमुखात् सा शृणोति यद् 'राजा मोहमुपगतः।' तदा सा दुःखिता भवति रोदिति च। स्वविरहावस्थायां प्रथमेऽवसरे चतुर्थाङ्के दृष्ट्वा सा कथयति – 'दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः'। यदा चतुर्थाङ्के विदूषकस्मारितां वासवदत्तां स्मृत्वा राजा साश्रुपातः सन्तिष्ठते, तदा सा तु बहिर्गच्छति किन्तु पद्मावतीं पत्युदयनस्य समीपे प्रेषयति। तृतीयाङ्के कौतुकमालागुम्फनसमयेऽविधवाकरणकमौषधं वारं वारं गुम्फति कथयति चात्मगतम् – 'इदं बहुशो गुम्फितव्यंमया च पद्मावत्यै च। तदानीमपि तस्या पतिपरायणतायाः परिचयो मिलति। राजा मुखात् स्वविषयकं प्रेमालापं श्रुत्वा सानन्दं वियोगजनितदुःखं सहते। यथा चतुर्थाङ्के – 'पद्मावती बहुमता यद्यपि रूपशीलमाधुर्यैः। वासवदत्ताबद्धं न तु तावन्मे मनो हरति।' इति श्रुत्वाकथयति सा– 'भवतु भवत् दत्तं वेतनमस्य अहो! अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते।' स्नेहोऽप्यस्यां प्राचुर्येणावलोक्यते तथा चतुर्थाङ्के पद्मावती स्वयमेव गदति– 'यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति।' यद्यपि बहुषु स्थलेषु पतिपक्षपातं कृत्वा प्रोषितभर्तृकायाः धर्ममुल्लङ्घयति, तथापि अतिचातुर्येण कथनेन रहस्योद्भेदनं न करोति। तद्यथा–'आर्यपुत्रपक्षपातेनातिक्रान्तः अस्तु दृष्ट उपायः।' अनेन प्रकारेण 'सा प्रत्युत्पन्नमतिः' इति परिचयोऽपि मिलति।

इत्थं कविना वासवदत्तायाः चरित्रं त्यागपूर्णादर्शनारीरूपेण चित्रितम्। वासवदत्तायां सच्चरित्रता, सरलता, मृदुता, दयालुता, बुद्धिमत्ता, पतिपरायणता, त्यागभावनादयः गुणाश्च वर्तन्ते। अतएव राजा ताम्प्रति कथयति – 'कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि।' इति ।

पद्मावती – वत्सराजस्योदयनस्य द्वितीया भामिनी पद्मावती मगधराजस्य दर्शकस्य भगिनी अस्ति। नाटकेऽस्मिन् कविना पद्मावती स्वीया मुग्धा नायिकारूपेण चित्रिता। साहित्यदर्पणे स्वीयानायिकायाः लक्षणमुक्तम् – 'विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।' मुग्धायाः नायिकायाः लक्षणं यथा तत्रैवं –

प्रथमाऽतीर्णयौवनमदनविकारतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा।।

पद्मावत्याः चारित्रिक विश्लेषणे निम्नाङ्कितानि वैशिष्ट्यानि प्राप्यन्ते –पद्मावती

रूपयौवनसम्पन्ना नायिका, प्रथमाङ्कस्य प्रारम्भे एवास्याः दर्शनं भवति। एनां पश्यन्ती एव वासवदत्ता गदति- 'अभिजनानुरूपं खल्वस्याः रूपमिति।' यस्याः पद्मावत्याः व्यवहारेण या वासवदत्ता परिखिन्नाऽसीत्, सा वारम्बारं तस्याः प्रशंसां करोति। तद्यथा- 'न हि रूपमेव वागपि खल्वस्याः मधुरा' इति। इयमतीव मनोहरा सर्वाङ्गसुन्दरी चास्ति। द्वितीयाङ्के पद्मावतीमवलोक्य चेट्याः 'इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायामञ्जातस्वेदविन्दुविचित्रतेन परिश्रान्तर-मणीयदर्शनेन मुखेन (परिलक्षिता) कन्दुकेन क्रीडन्तीत एवागच्छति इत्युक्त्या एतस्या अद्भुतं सौन्दर्यंकाशयति चतुर्थाङ्के राजापि पद्मावतीरूपं प्रशंसति। यथा स कथयति-

रूपश्रिया समुदितां गुणतश्च युक्ताम्।
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।।

अनेन प्रकारेण पद्मावती न केवल सर्वाङ्गसुन्दरी अपि तु श्रेष्ठराजकुलप्रसूता। अतस्तस्यां कुलीनता, सरलता, दयालुतादयः गुणाश्च वर्तन्ते। यदा चतुर्थाङ्के राजा विदूषकं पृच्छति 'का भवतः प्रिया? वासवदत्ता इदानीं पद्मावती वा।' तदा विदूषकः पद्मावतीं प्रशंसति - 'तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहंकारा मधुरवाक् सदाक्षिण्या' इत्यादि। पद्मावती अति बुद्धिमती। अतः सा वार्ता-रहस्यं शीघ्रं जानाति। द्वितीयाङ्के यदा वासावदत्ता पद्मावतीम्प्रति कथयति -'हला! अतिचिरं कन्दुकेन क्रीडित्वाधिकं सञ्जातरागौ परकीयाविव ते हस्तौ संवृत्तौ' पुनश्चेटी गदति - 'निर्वर्त्यतां तावत् अयं कन्याभावमणीयः कालः।' तदा तत्क्षणं वार्ता-रहस्यं विदित्वा ते वारयति कथयतिच- 'आर्ये! किमिदानीं नापहसितुमिव निध्यायसि?' इति।

धार्मिक प्रवृत्तिशीला चाऽस्ति नायिका पद्मावती। एतस्या धर्मे विशेषाभिरुचिः दृश्यतेयत काञ्चुकीयकथनेन 'धर्मप्रिया नृपसुता नहि धर्मपीडामिच्छेत् तपस्विषु कुलव्रतमेतदस्याः' ज्ञायते। सा दानशीला उदारा चाऽस्ति। यतोहि तपोवने यात्यां सत्यां प्रथमाङ्के कथयति सा काञ्चुकीयं'- 'आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतम्? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति?' दानप्रदानेन तपस्विनां कृपामियं याचते। तद्यथा- 'आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया' इत्यादि। पद्मावत्याः कुलीनता-शालीनता-धर्माभिरुचि-धीरतादिगुणान् दृष्ट्वैव यौगन्धरायण वासवदत्तां अस्या हस्ते न्यासरूपेण निक्षेसुमिच्छति। तद्यथा- 'धीरा कन्येयं दृष्टधर्मप्रचारा शक्ता चारित्रं रक्षितुं मे भगिन्याः।' तपोवने प्रायः याचका न मिलन्ति। अतः यदा एको याचकः दृश्यते तदा सा आत्मानः तपोवनागमनं सफलं मन्यते। यथा- 'दिष्ट्या सफलं मे तपोवनाभिगमनम्' यदा काञ्चुकीयो याचकस्य यौगन्धरायणस्य प्रार्थनां स्वीकर्तु नेच्छति, तदा सा तं कथयति- 'आर्य! प्रथममुद्घोष्य कः किमिच्छतीति अयुक्तिमिदानीं विचारयितुम्।' अनेन वचनेन एतस्याः सत्यवादिता, नीतिज्ञ ताच परिलक्षिता।

पद्मावती दयार्द्रस्वभावा सरला चाऽस्ति, स्याःअस्य युवामनसि उदयनासक्तिः वर्तते। 'राजा मोहमुपगतः' इति ब्रह्मचारिणः कथनं श्रुत्वा शून्यमिव भवति। किन्तु लब्धसंज्ञेति श्रुत्वा 'दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वातस्याः मनः शून्यमिव मे हृदयम्' इति कथयति। अवस्था चेयं पद्मावत्या मनसि उदयनविषयकप्रेमाङ्कुरोत्पत्तिं व्यनक्ति। यदा चेटी कथयति यत्-भर्तृदारिके!

किन्तु खल्वपरा स्त्री तस्य हस्तं गमिष्यति ? तदेयं गदति आत्मगतम्–मम हृदयेनैव सह मन्त्रितम्।' अनेन ज्ञायते यद्यपि उदयनम्प्रति अस्या अनुरक्तिःआसीत् किन्तु शालीनतापिवर्तते।

चतुर्थाङ्के पद्मावती वासवदत्तायाः 'हला! प्रियस्ते भर्ता' प्रश्नस्योत्तरं कुलीनतया गदति– 'आर्ये न जानामि आर्यपुत्रेण विरहिता उत्कण्ठिता भवामि। उदयनस्य वासवदत्ताम्प्रति अत्यधिकामासक्तिं ज्ञात्वा यदा चेटी– 'अदाक्षिण्यः खलु भर्ता' कथयति। तदा पद्मावती उदयनं दाक्षिण्यगुणयुक्तं भणति। तद्यथा– 'हला! मा मैवम्। सदाक्षिण्य एव आर्यपुत्रो य इदानीमपि आर्याया वासवदत्ताया गुणान् स्मरति इत्यादिना।'

पद्मावतीर्ष्याशून्योदारहृदया चाऽस्ति। यतः चतुर्थाङ्के विदूषको यदा राजानाम्प्रति पृच्छति –'का भवतः प्रिया ? तदानीं तत्र भवती वासवदत्ता, इदानी पद्मावती वा।' तदा राज्ञो वासवदत्ताबद्धं न तु तावन्मे मनोहरतीतिप्रत्युत्तरं श्रुत्वापि सा वासवदत्ताम्प्रतीर्ष्यां नैवाकरोत्परञ्च वासवदत्तां स्वयमेव प्रशंसति। पद्मावत्यां धैर्यस्य पराकाष्ठा दृश्यते, स्वयमुदयनोऽप्येनां प्रशंसति –

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।।

इयं गुरुजनानां सम्मानकर्त्री। यथा तापसीम् प्रति प्रथमाङ्के 'आयें वन्दे' इति निगद्य सा वृद्धां तापसीं प्रणमति। वासवदत्तायाः मातृकुलस्य जनागमनावसरे इयं वृत्तान्तश्रवणे दत्तचित्ताऽस्ति। तद्यथा– 'प्रियम्मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम्।' सा वासवदत्तायाः स्वजनान् स्वजनान् मन्यते। पद्मावती तु वासवदत्तायाः पितरं 'तात' इति शब्देन मातरञ्चाम्बापदेनसम्वोधयति। यथा षष्ठाङ्के – 'यदार्यपुत्र आज्ञापयति आर्यपुत्र! तातो वाऽम्बा किन्तु खलु भणिष्यतीत्याविग्नेव संवृता।' चित्रलिखितां वासवदत्तामियं शिरसा अभिवादयति। अवन्तिकैवास्ति वासवदत्तेति ज्ञात्वेवयं क्षमां याचते। सा कथयति–'सखिजनसमुदाचारेणाजानन्त्यातिक्रान्तः समुदाचारः, तच्छीर्षेण प्रसादयामि।'

प्रकारेणानेन महाकविना भासेन पद्मावत्याः चित्रणं अतिमनोयोगेन कृतम्। विषयेऽस्मिन् नास्ति सन्देहः। सामान्यरूपेणेयमुपभार्या राजोदयनस्यास्ति। किन्तु पद्मावती पाणिग्रहणात्पूर्वं 'परकीयाकन्यका' नायिकास्ति। विवाहसंस्कारोत्तरं सा राज्ञः धर्मपत्नी भवति। अस्यामवस्थायां तस्या मुग्धामध्ययोः मिश्रितगुणाः दृश्यन्ते।

१.७ अध्यायस्य असमीया भाषायां सारांशः

সংস্কৃত সাহিত্যৰ উৎকৃষ্ট নাটকসমূহৰ ভিতৰত অন্যতম হৈছে 'স্বপ্নবাসবদত্তম' এই নাটকখন। এই নাটকখনৰ ৰচয়িতা হৈছে নাট্যকাৰ ভাস। নাট্যকাৰ ভাসে সৰ্বমুঠ [illegible] খন নাটক ৰচনা কৰিছিল। এই [illegible] খন নাটক যে নাট্যকাৰ ভাসৰেই ৰচিত সেই বিষয়েও বহুতো যুক্তিতর্ক পোৱা যায়; কিয়নো মহাকবি ভাসে তেওঁৰ দ্বাৰা ৰচিত নাটকসমূহত নিজৰ নাম উল্লেখ কৰা নাছিল। মহাকবি ভাসৰ সময়সীমা সাপেক্ষেও কোনোধৰণৰ নির্দিষ্ট তথ্য পোৱা নায়ায়। তথাপি, বিভিন্ন যুক্তিৰ আলমত পণ্ডিতসকলে ভাসৰ সময় সাপেক্ষে মত পোষণ কৰে যে মহাকবি ভাসৰ

সময়ৰ উচ্চতম সীমা হৈছে খৃঃ পূঃ আৰু ন্যূনতম সীমা খৃঃ পূঃ চন।

স্বপ্নবাসবদত্তম নাটকখনক ভাসৰ ৰচনাসমূহৰ ভিতৰত শ্ৰেষ্ঠ হিচাপে গণ্য কৰা হয়। এই নাটকখনিত সৰ্বমুঠ ছটা অংক আছে। গুণাঢ্যৰ বৃহৎকথাত 'সন্নিবিষ্ট উদয়ন আৰু বাসবদত্তাৰ কাহিনীৰ আধাৰত এই নাটকখনৰ বিষয়বস্তু প্ৰস্তুত কৰা হৈছে। নাটকখনৰ বিষয়বস্তু চমুকৈ এনেধৰণৰ— এই নাটকৰ নায়ক ৰজা উদয়নৰ ৰাজ্য শত্ৰুৰ কবলত পৰে। ভৱিষ্যত বক্তাসকলে ঘোষণা কৰিছিল 'যে মগধ ৰাজকুমাৰী পদ্মাৱতীক বিবাহ কৰালে উদয়নে হেৰোৱা ৰাজ্য ঘূৰাই পাব। সেয়েহে মহামন্ত্ৰী যৌগন্ধৰায়ণে হৃতৰাজ্য উদ্ধাৰৰ উপায় চিন্তিবলৈ ধৰিলে। তেওঁ জানিছিল যে বাসবদত্তাৰ বৰ্তমানত উদয়নে পুনৰ আন এগৰাকী নাৰীক বিবাহ নকৰাব, সেয়েহে, তেওঁ এনে এটি পৰিকল্পনা কৰিলে যাৰ দ্বাৰা এইটো প্ৰচাৰ কৰা হ'ল যে তেওঁৰ আৰু বাসবদত্তাৰ জুইত পৰি মৃত্যু হৈছে। বাসবদত্তাৰ মৃত্যুত ৰজাই শোকত ম্ৰিয়মান হৈ পৰিল। ইপিনে আত্মপৰিচয় গোপনে ৰাখি যৌগন্ধৰায়নে বাসবদত্তাক পদ্মাৱতীৰ ওচৰত ৰাখিলে। বাসবদত্তাই পদ্মাৱতীৰ লগত থকা সময়ছোৱাতেই উদয়নে পদ্মাৱতীক বিবাহ কৰায় আৰু মগধৰাজৰ সহায়ত তেওঁৰ হৃতৰাজ্য ঘূৰাই পায়। শেষত যৌগন্ধৰায়ণ আৰু বাসবদত্তাই সকলোৰে আগত আত্মপ্ৰকাশ কৰে আৰু এনেদৰেই নাটকখনৰ পৰিসমাপ্তি ঘটে।

এই নাটকখনৰ নায়ক হৈছে বৎসৰাজ উদয়ন আৰু নায়িকা হৈছে অবন্তীৰাজ-পুত্ৰী বাসবদত্তা। নাটকখনত উদয়নক ধীৰললিত নায়ক হিচাপে অভিহিত কৰা হৈছে। মহাকবি ভাসে এই নাটকখনিত বিভিন্ন ধৰণৰ ৰস, অলংকাৰ তথা ছন্দ ব্যৱহাৰ কৰিছে। স্বপ্নবাসবদত্তম্ নাটকৰ অঙ্গীৰস বা প্ৰধান ৰস হৈছে কৰুণৰস সম্বলিত বিপ্ৰলম্ভ শৃঙ্গাৰ। নাটকখনত প্ৰয়োগ হোৱা কেইটামান উল্লেখযোগ্য অলংকাৰ হৈছে— উপমা, অৰ্থান্তৰন্যাস, অপহ্নুতি, কাব্যলিঙ্গ স্বভাবোক্তি ইত্যাদি।



अग्रगत्याः निरीक्षणम्

प्रश्न १: 'स्वप्नवासवदत्तम्' नाटकस्य लेखकः कः ?

.....

प्रश्न २: अस्य नाटकस्य नायकस्य तथा नायिकायाः नामानी के ?

.....

प्रश्न ३: यत् उपघटनस्य आलमेन नाटकस्य नामकरणं कृतम्, तत् कस्मिन् अङ्के अन्तर्गतं अस्ति ?

.....

प्रश्न ४: भासस्य नाटकानां प्रारम्भिका वाक्यशृङ्खला का अस्ति ?

.....

प्रश्न ५: अशुद्धं वा शुद्धं- भासस्य नाटकानि सर्वेक्षेत्रे नाट्यशास्त्रस्य व्याकरणस्य च नियमान्पालनं कुर्वन्ति।

.....

प्रश्न ६: भासस्य सर्वेषु नाटकेषु प्रयुक्ते द्वयोछन्दसोः नामानी उल्लिखतु।

.....

प्रश्न ७: उदयनस्य चरित्रस्य द्वे विशेषता उल्लेखयतु।

.....

प्रश्न ८: पद्मावती एका धर्मपरायणा नारी आसीत् इति युक्त्याप्रमाणयतु।

.....



१.८ अध्यायात् किम् अवगतम्

- 'स्वप्नवासवदत्तम्' इति संस्कृतसाहित्यस्य एकं उत्कृष्टं नाटकं वर्तते। अस्य रचयिता महाकविः भासः। अस्य नायकस्य नाम उदयनः, तथा नायिका वासवदत्ता। अस्य नाटकस्य प्रमुखः आधारः गुणाढ्यस्य 'बृहत्तकथा' इति ग्रन्थः अस्ति। स्वप्नवासवदत्तनाटके प्रधानः रसः करुणरसयुक्तं विप्रलम्भ्यश्रृङ्गारः अस्ति।
- महाकविभासः त्रयोदश नाटकानि विरचितवान्। एतानिनाटकानि १९०९ तमे वर्षे त्रिवेन्द्रम्नगर्यां प्राप्यन्ते। विभिन्नैः समालोचनात्मकैः अध्ययनैः एतानिनाटकानि कृतयः इति प्रमाणी।
- भासस्य आविर्भावकालस्योच्चत्तमसीमा ख्रीष्टपूर्वं ४५० तमे वर्षे तथान्यूनतमा च सीमा ख्रीष्टपूर्वं ३७० तमे वर्षे इति मन्यते।
- भासस्य रचनायाः भाषा अत्यन्तं सरला च स्वाभाविका च वर्तते। तस्य रचनायाम् अर्थालंकाराणां प्राधान्यं दृश्यते। वीर-वात्सल्य-हास्य-करुण-अद्भुत- रौद्रादीन् रसान् प्रति भासस्य विशेषप्रीतिः प्रतीयते। नाटकानां विभिन्नेषु स्थलेषु श्लोकेषु विविधानां छन्दसां प्रयोगोदृश्यते।
- 'स्वप्नवासवदत्तम्' इति नाटकस्य मुख्यचरित्राणि स्वस्वगुणैः दीप्तिमन्ति भवन्ति। नाटकस्य उत्कृष्टतां संस्कृतसाहित्ये प्रतिष्ठापयितुं प्रतिपात्रं स्वीयं योगदानं प्रयच्छति।



१.९ ज्ञानाधिक्यम्

१) आयादः, ए. एस. पी. (१९५७) भासः, मद्रासः वी. रामस्वामी संस्कुल एण्ड हाल।

२) कालेः, एम्. आर. (१९८८) स्वप्नवासवदत्तम् और भासः, दिल्लीः मोतीलाल बनारसीदास पब्लिशर्स प्राइवेट लिमिटेड।

३) गुडशालकः, ए. डी. (१९६८), भासः - ए स्टडी, दिल्लीः मुन्सीराम मनोहरलाल

ओरिएण्टल पब्लिशर्स एण्ड बुकसेलर्स।

४) शर्मा, थानेश्वरः (१९९५) संस्कृतसाहित्यस्य इतिहासः, गुवाहाटीः चन्द्रप्रकाशः।



१.१० अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : भासः।

प्रश्नः २ उत्तरम् : नायकः उदयनः, नायिका वासवदत्ता।

प्रश्नः ३ उत्तरम् : पञ्चमे अङ्के।

प्रश्नः ४ उत्तरम् : 'नान्द्यन्ते ततः प्रविशति सूत्रधारः।'

प्रश्नः ५ उत्तरम् : अशुद्धम्।

प्रश्नः ६ उत्तरम् : बसन्ततिलकः उपजातिः च।

प्रश्नः ७ उत्तरम् : राजा उदयनस्य चरित्रस्य द्वे विशेषते।

क) राजा उदयनः जनसाधारणस्य प्रियपात्रम् आसीत्।

ख) सः एकः स्नेहपरायणः विश्वासभाजनः च राजा आसीत्।

प्रश्नः ८ उत्तरम् : तपोवननिवासिनः सर्वे यथा धर्मकार्ये बधिताः न स्युः, पद्मावती तस्मिन् विषये लक्ष्यं कृतवती। एषा तस्य धर्मपरायणतायाः सूचनं करोति।



१.११ अभ्यासप्रश्नाः

क) वस्तुधर्मिणः प्रश्नाः (५० शब्दानां मध्ये उत्तरं लिखतु)

प्रश्नः १: संस्कृतनाटकेषु कति प्रकारकाः नायकाः सन्ति ?

प्रश्नः २: संस्कृतनाटकेषु कतिविधाः रसाः सन्ति ?

ख) लघु प्रश्नाः : (१५० शब्दानां मध्ये उत्तरं लिखतु)

प्रश्नः १: स्वप्नवासवदत्तम्नाटकस्य एकं संक्षिप्ताभासं ददातु।

प्रश्नः २: त्रिवान्द्रमनगर्याम् उद्धृतानां नाटकानां रचकः एक एवं स च भासः इति वचनं युक्तिसहकारेण प्रमाणयतु।

प्रश्नः ३: भासस्य रचनाशिल्पस्य वैशिष्ट्यं किम् किम् अस्ति ?

ग) रचनाधर्मिणः प्रश्नाः : (३००-५०० शब्दानां मध्ये उत्तरं लिखतु)

प्रश्नः १: 'स्वप्नवासवदत्तम्'- नाटकस्य प्रथमाङ्कस्य सारांशं लिखतु।

प्रश्नः २: अत्रोल्लिखितचरित्राणां विशेषतां वर्णयतु - उदयनः, वासवदत्ता, पद्मावती।

*** ***** ***

अध्यायः २ : स्वप्नवासवदत्तम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

२.१ उद्देश्यम्

२.२ परिचयः

२.३ प्रथमाङ्कस्य निर्वाचितदृश्यानां मूल-संस्कृत-पाठः

२.३.१ ब्रह्मचारी-चरित्रस्य प्रवेशात् पूर्वदृश्यानां मूल-संस्कृत-पाठः

२.३.२ ब्रह्मचारी-चरित्रस्य प्रवेशादारभ्य दृश्यानां मूल-संस्कृत-पाठः

२.४ उक्तसंस्कृत-पाठयोः असमीयानुवादः

२.४.१ ब्रह्मचारी-चरित्रस्य प्रवेशस्य पूर्वम्

२.४.२ ब्रह्मचारी-चरित्रस्य प्रवेशात्

२.५ ब्रह्मचारी-चरित्रस्य प्रवेशस्य तात्पर्य-व्याख्या

२.६ कतिपयविशेष-श्लोकानां व्याख्यानम्

२.७ अध्यायात् किमवगतम्

२.८ ज्ञानाधिक्यम्

२.९ अग्रगत्याः निरूपणम्

२.१० अभ्यासप्रश्नाः

२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् -

- स्वप्नवासवदत्तनामकस्य नाटकस्य प्रथमाङ्कस्य विशेष-दृश्येषु संस्कृत-पाठेन सह परिचयं प्राप्नोति।
- नाटकस्य प्रथमाङ्के निर्दिष्टानां संस्कृत-पाठानाम् असमीयानुवादं ग्रहणं कर्तुं शक्नोति।
- अत्रान्तर्गते ब्रह्मचारी-चरित्रस्य प्रवेशस्य तात्पर्यं अपि अवगतुं शक्नोति।
- श्लोकानां व्याख्या केनप्रकारेण क्रियते इति ज्ञातुं शक्नोति।

२.२ परिचयः

पूर्वे भवान् भासेन विरचितस्य स्वप्नवासवदत्तनामकस्य नाटकस्य सामान्य-परिचयं प्राप्तवान्। तस्य नाट्यकारस्य विषये तथा प्रत्येकाङ्कस्य सारांशं विस्तरेण ज्ञातवान्। मुख्य-चरित्राणां लक्षणानि अपि ज्ञातवान्।

अस्मिन् अध्याये स्वप्नवासवदत्तं नामकस्य नाटकस्य प्रथमाङ्कस्य विस्तृत-चर्चा प्रदत्ता अस्ति। अस्याः माध्यमेन भवान् भासस्य नाटकं कथं प्रारभते इति अवगन्तुं शक्नोति। एवं च अङ्के विद्यमानेषु कतिपय मुख्यदृश्येषु उपस्थापितानां संस्कृत-पाठानाम् असमीयानुवादं अपि ज्ञातुं शक्नोति।

विशिष्टदृश्यप्रस्तुतेः तात्पर्यं च ज्ञास्यति। श्लोकानां व्याख्यानं कथं क्रियते इति अपि अस्मिन् अध्याये ज्ञातुं शक्नोष्यति।

२.३ प्रथमाङ्कस्य निर्वाचितदृश्यानां मूल-संस्कृत-पाठः

२.३.१ ब्रह्मचारी-चरित्रस्य प्रवेशात् पूर्वदृश्यानां मूल-संस्कृत-पाठः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः

उदयनवेन्दुसवर्णावासवदत्तावलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि। अये! किन्नुखलु मयि विज्ञापनग्रे शब्द इव श्रूयते।

अङ्ग! पश्यामि।

(नेपथ्ये)

उत्सरतोत्सरतार्याः। उत्सरत।

सूत्रधारः भवतु, विज्ञातम्।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥ २ ॥

(निष्क्रान्तः)

स्थापना।

(प्रविश्य)

भटौ- उत्सरतोत्सरतार्याः! उत्सरत।

(ततः प्रविशति परिव्राजकवेशो यौगन्धरायणः आवन्तिकावेशधारिणी वासवदता च)

यौगन्धरायणः- (कर्णं दत्त्वा) कथमिहाप्युत्सार्यते? कुतः-

धीरस्थाश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥ ३ ॥

वासवदत्ता - आर्य! क एष उत्सारयति।

यौगन्धरायणः- भवति! यो धर्मादात्मानमुत्सारयति।

वासवदत्ता- आर्य! न ह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति।

यौगन्धरायणः - भवति! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते।

वासवदत्ता- आर्य! तथा परिश्रमः परिखेदं नोत्पादयति, यथायं परिभवः।

यौगन्धरायणः - भुक्तोज्झित एष विषयोऽत्रभवत्या। नात्र चिन्ता कार्या। कुतः,

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाह्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥ ४॥

भटौ - उत्सरतार्याः! उत्सर।

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः - सम्भषक! न खलु न खलूत्सारणा कार्या। पश्य,

परिहरतु भवान् नृपापवादं
न परुषमास्त्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति॥ ५॥

उभौ- आर्य तथा!

(निष्क्रान्तौ)

यौगन्धरायणः- हन्त सविज्ञानमस्य दर्शनम्। वत्से! उपसर्पावस्तावदेनम्।

वासवदत्ता- आर्य तथा।

यौगन्धरायणः -(उपसृत्य) भोः! किङ्कृतेयमुत्सारणा?

काञ्चुकीयः - भोस्तपस्विन्।

यौगन्धरायणः -(आत्मगतम्) तपस्विन्निति गुणवान् खल्वयमालापः। अपरिचयात्तु न श्लिष्यते मे मनसि।

काञ्चुकीयः- भोः! श्रूयताम्। एषा खलु गुरुभिरभिहित नामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्रभवत्या राजगृहमेव यास्यति।

तद् अद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः। तद्भवन्तः,

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ ६॥

यौगन्धरायणः-(स्वगतम्) एवम्। एषा सा मगधराजपुत्री पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति। ततः,

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ७॥

वासवदत्ता - (स्वगतम्) राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र संपद्यते।

काञ्चुकीयः - यदभिप्रेतं भवत्या। भो भो आश्रमवासिनस्तपस्विनः।
शृण्वन्तु शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धमर्माभिरामप्रिया
यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥ ८॥

यौगन्धरायणः-(आत्मगतम्) हन्त, दृष्ट उपायः। (प्रकाशम्) भोः! अहमर्थी।

पद्मावती - दिष्ट्या सफलंमे तपोवनाभिगमनम्।

तापसी - सन्तुष्टतपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।

काञ्चुकीयः- भोः! किं क्रियताम्।

यौगन्धरायणः- इयं में स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्रभवत्या - कञ्चित् कालं परिपाल्यमानाम्। कुतः,

कार्यं नैवार्थेर्नापि भोगैर्न वस्त्रै-
र्नाहं काषायं वृत्तिहेतोः प्रपन्नः।
धीरा कन्येयं दृष्टधर्मप्रचार
शक्ता चारित्रं रक्षितुं मे भगिन्याः॥ ९॥

वासवदत्ता- (आत्मगतम्) हम् इह मां निक्षेप्तकाम आर्ययौगन्धरायणः। भवतु, अविचार्य क्रमं न करिष्यति।

काञ्चुकीयः- भवति ! महती स्वल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः। कुतः, सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।

सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥ १०॥

ज्ञातव्यम्



काञ्चुकीयः संस्कृतनाटकेषु प्रमुखं चरित्रं अस्ति। परवर्तीकाले संस्कृतनाटकेषु एतत् चरित्रं काञ्चकीरूपेण निर्दिष्टम्। एषः काञ्चुकीयः वा काच्छुकी राज्ञः अन्तःपुरस्य उत्तरदायित्वं प्राप्नोति। सामान्यतः सः वृद्धः ब्राह्मणः, सज्जनः, गुणवान् च सर्वकार्यार्थे निपुणः पुरुषः भवति। काञ्चुकीयस्य लक्षणं निम्नप्रकारेण निर्दिष्टं अस्ति—

अन्तःपुरचरः वृद्धो विप्रो गुणगणान्वितः।
सर्वकार्यार्थकुशलः काञ्चुकीत्यभिधीयते।।

२.३.२ ब्रह्मचारी-चरित्रस्य प्रवेशादारभ्य दृश्यानां मूल-संस्कृत-पाठः

(ततः प्रविशति ब्रह्मचारी)

ब्रह्मचारी- (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः। दृढमस्मिपरिश्रान्तः।
अथ कस्मिन् प्रदेशे विश्रमयिष्ये (परिक्रम्य)। भवतु, दृष्टम्। अभितस्तपोवनेन भवितव्यम्। तथाहि-

विस्रब्धा हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ॥ १२॥

यावत् प्रविशामि। (प्रविश्य) अये आश्रमविरुद्धः खल्वेष जनः। (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र। निर्दोषमुपसर्पणम्। अये स्त्रीजनः।

काञ्चुकीयः- स्वैरं स्वैरं प्रक्शितु भवान्। सर्वजनसाधारणमा श्रमपदं नाम।

वासवदत्ता-हम्।

पद्मावती - अम्मोपरपुरुषदर्शनं परिहरत्यार्या। भवतु, सुपरिपालनीयः खलु मन्यासः।

काञ्चुकीयः- भोः। पूर्वप्रविष्टाः स्मः। प्रतिगृह्यतामतिथिसत्कारः।

ब्रह्मचारी - (आचम्य) भवतु भवतु। निवृत्तपरिश्रमोऽस्मि।

यौगन्धरायणः - भोः। कुत आगम्यते, क गन्तव्यं क्वाधिष्ठानमार्यस्य ?

ब्रह्मचारी - भोः। श्रूयताम्। राजगृहतोऽस्मि। श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि।

वासवदत्ता - (आत्मगतम्) हा लावाणकं नाम। लावाणकसङ्कीर्तनेन पुनर्नवीकृत इव में सन्तापः।

यौगन्धरायणः - अथ परिसमाप्ता विद्या ?

ब्रह्मचारी - न खलु तावत्।

यौगन्धरायणः - यद्यनवसिता विद्याकिमागमनप्रयोजनम् ?

ब्रह्मचारी - तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।

यौगन्धरायणः- कथमिव ?

ब्रह्मचारी - तत्रोदयनो नाम राजा प्रतिवसति।

यौगन्धरायणः - श्रूयते तत्रभवानुदयनः। किं सः ?

ब्रह्मचारी- तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल ?

यौगन्धरायणः- भवितव्यम्। ततस्ततः ?

ब्रह्मचारी - ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

वासवदत्ता -(आत्मगतम्) अलीकमलीकमेतत्। जीवामि मन्दभागा।

यौगन्धरायणः – ततस्ततः ?

ब्रह्मचारी – ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नामसचिवस्तस्मिन्नेवाग्नौ पतितः।

यौगन्धरायणः – सत्यं पतित इति। ततस्ततः ?

ब्रह्मचारी – ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन् वारितः।

वासवदत्ता – (आत्मगतम्) जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम्।

यौगन्धरायणः – ततस्ततः ?

ब्रह्मचारी – ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः। सर्वे – हा!

वासवदत्ता – (स्वगतम्) सकाम इदानीमार्ययौगन्धरायणो भवतु।

चेटी – भर्तृदारिके। रोदिति खल्वियमार्या।

पद्मावती – सानुक्रोशया भवितव्यम्।

यौगन्धरायणः – अथ किम अथ किम्? प्रकृत्या सानुक्रोशा में भगिनी। ततस्ततः ?

ब्रह्मचारी – ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

पद्मावती – दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्।

यौगन्धरायणः – ततस्ततः ?

ब्रह्मचारी – ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये! इति किमपि किमपि बहु प्रलपितवान्। किं बहुना,

नैवेदानीं तादृशाश्चकवाका
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा॥ १३॥

यौगन्धरायणः – अथ भोः। तं तु पर्यवस्थापयितुं न कशिद् यत्नवानमात्यः ?

ब्रह्मचारी – अस्ति रुमण्वान्नामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम्। स हि अनाहारे तुल्यः प्रततरुदितक्षामवदनः

शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥ १४॥

वासवदत्ता –(स्वगतम्) दिष्टया सुनिक्षिप्त इदानीमार्यपुत्रः।

यौगन्धरायणः –(आत्मगतम्) अहो महद्भारमुद्वहति रुमण्वान्। कुतः,

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥ १५॥

(प्रकाशम्) अथ भोः ! पर्यवस्थापित इदानीं स राजा।

ब्रह्मचारी – तदिदानीं न जाने। 'इह तया सह हसितम्, इह – तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्,' इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वापक्रान्तम्। ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः। ततोऽहमपि निर्गतोऽस्मि।



ज्ञातव्यम्

संस्कृतनाटके पञ्चविधा उक्तयः प्रयुज्यन्ते। १) यां न शृण्वन्ति स्वयमेव आत्मनं वदेत्, सा स्वगता अथवा आत्मगता उक्तिः।

२) या सर्वेण शृण्विता प्रतिपद्यते, सा प्रकाशोक्ति।

३) या दूरं गच्छन्ति गुप्तेन कथिता, सा अपवारिता उक्ति।

४) त्रिपटिका नामकहस्तमुद्रया परस्परेण वयं कथयेमहि, सा जनान्तिका उक्ति।

५) रंगमंचे यत्र उपस्थितो न कोऽपि, तस्य वचनानि श्रुतानि यथावत् 'किम्, किम् कथयति ?' इत्यादि, एवं नाटके प्रयुक्तानि आकाशभाषिता उक्ति इति कथ्यते।

२.४ उक्तं संस्कृत-पाठानां असमीयानुवादः

अधुना भवतः उपरिलिखितं संस्कृतपाठानां असमीयानुवादं पठितुं शक्यते। प्रथमतः ब्रह्मचारिचरित्रस्य प्रवेशपूर्वं असमीयानुवादं पठितुं शक्यते। अनन्तरं ब्रह्मचारिचरित्रस्य प्रवेशोत्तरं असमीयानुवादमपि पठितुं शक्यते।

२.४.१ ब्रह्मचारी-चरित्रस्य प्रवेशात् पूर्वम्

(নান্দীৰ শেষত সূত্রধাৰে প্ৰৰেশ কৰে)

সূত্রধাৰ ঃ

নবোদিত চন্দ্ৰৰ দৰে বৰ্ণধাৰণ কৰা, মদ্যপানৰ দ্বাৰা বলযুক্ত, যি সৌন্দৰ্যৰে পৰিপূৰ্ণ আৰু বসন্তত অধিক ৰমনীয় সেই বলৰামৰ বাহুযুগলে আপোনালোক সকলোকে ৰক্ষা কৰক।

সজ্জনসকল। মই আপোনালোকক জনাবলৈ বিচাৰিছো। আঃ কি হৈছে। সজ্জনসকলক উদ্দেশ্যি ঘোষণা কৰিবলৈ ওলোৱাৰ লগে লগে কিবা শব্দ শুনা গৈছে। ঠিক আছে। মই চাই লওঁ (এয়ানো কি)।

(নেপথ্যত)

সজ্জনসকল। আঁতৰি যাওঁক, আঁতৰি যাওঁক। সূত্রধাৰ- অঃ বুজি পাইছো। ৰাজকুমাৰীৰ অনুসৰণকাৰী মগধাধিপতিৰ বিশ্বস্ত সেৱকসকলৰ দ্বাৰা সকলো তপোবন নিবাসী লোকসকলক ধৃষ্টতাৰে আঁতৰাই পঠিওৱা হৈছে। ।। ।।

(প্রস্থান)

স্থাপনা।

(প্রবেশ কৰি)

ৰক্ষীদ্বয় - আঁতৰি যাওঁক, সজ্জনসকল, আঁতৰি যাওঁক।

(তাৰ পিছত পৰিব্রাজকৰ বেশত যৌগন্ধৰায়নৰ আৰু অবন্তীনিবাসী স্ত্রীৰ ৰূপত বাসবদত্তাৰ প্ৰৱেশ)।

যৌগন্ধৰায়ণ -(শুনি) কেনেকুৱা (কথা), ইয়াতো লোকসকলক আঁতৰি যাবলৈ কোৱা হৈছে। কিয়?

ধৈৰ্যশীল, আশ্রমত নিবাস কৰা, বন্যফলেৰে তৃপ্তি লাভ কৰা, বল্কলবসন পৰিধানকাৰী, সন্মানৰ যোগ্য লোকসকলক ভীতি প্রদর্শন কৰা হৈছে। হেৰা। এয়া কোন উদণ্ড, অবিনীত, অস্থিৰ ভাগাৰ দ্বাৰা গর্বিত পুৰুষ যিয়ে আজ্ঞা প্রদান কৰি এই শান্ত তপোবনক আদেশ প্রদানৰ জৰিয়তে গাঁওলৈ ৰূপান্তৰ কৰিছে।। ।।

বাসৱদত্তা -ডাঙৰীয়া ❋ যিসকলে আঁতৰাই পঠিয়াইছে তেওঁলোকনো কোন?

যৌগন্ধৰায়ন -মহাশয়া ❋ যিসকলে নিজকে ধর্মৰ পৰা আঁতৰাইছে।

বাসৱদত্তা -ডাঙৰীয়া ❋ মই এইটো ক'বলৈ বিচৰা নাই। কি, মোকো আঁতৰাই পঠিওৱা হ'ব নেকি?

যৌগন্ধৰায়ন -মহাশয়া ❋ এনেদৰে পৰিচয় লাভ নকৰিলে এনেকি দেৱতাও অপমানিত হয়।

বাসৱদত্তা -ডাঙৰীয়া ❋ পৰিশ্রমেও মোক তেনে কষ্ট প্রদান কৰা নাই যিটো এই অপমানৰ দ্বাৰা মই পাইছো।

যৌগন্ধৰায়ণ - এই মর্যাদা (সেৱকৰ দ্বাৰা অনুসৰণ পূর্বক গমন) আপুনি (এসময়ত) ভোগ কৰিছিল আৰু তাৰ পিছত এৰিব লগা হৈছিল। গতিকে এই বিষয়ে চিন্তা কৰিব নালাগে।

পূর্বতে আপুনিও এইধৰণে গমন কৰিছিল। পতিৰ বিজয় হ'লে পুনৰ এই প্রশংসনীয় মর্যাদা লাভ কৰিব। পার্থিব জীৱনৰ ভাগ্য চক্র ৰথৰ চকাৰ পংক্তিৰ দৰে ঘুৰে।। ।।

ৰক্ষীদ্বয় - ডাঙৰীয়াসকল। আঁতৰি যাওঁক আঁতৰি যাওঁক।

(কাঞ্চুকীয়ৰ প্রৱেশ)

কাঞ্চুকীয় -সম্ভষক ❋ আঁতৰাই পঠিওৱা কার্য নকৰিবা। চোৱা,

ৰজাৰ অপবাদ পৰিহাৰ কৰা। আশ্রমবাসীসকলৰ প্রতি কঠোৰ ব্যৱহাৰ কৰাটো উচিত নহয়। এই মনস্বীসকলে নগৰৰ অপমানৰ পৰা নিজকে আঁতৰাই ৰাখিবলৈ এই বনত আহি বাস কৰিছে।। ।।

দুয়ো -ডাঙৰীয়া ❋ সেয়ে হওঁক। (প্রস্থান)

যৌগন্ধৰায়ণ - আঃ❋ দেখিবলৈ এওঁক বাস্তব জ্ঞান সম্পন্ন যেন ভাৰ হৈছে। আই❋ আমি তেওঁলোকৰ ওচৰলৈ যাওঁগৈ।

বাসৱদত্তা - ডাঙৰীয়া ঠিক আছে।

যৌগন্ধৰায়ণ -(ওচৰলৈ গৈ) ডাঙৰীয়া❋ কিহৰ বাবে আঁতৰাই পঠিওৱা হৈছে?

কাঞ্চুকীয় -হে তপস্বী❋

যৌগন্ধৰায়ণ -(স্বগত) নিশ্চিতভাৱে এই সম্বোধন সন্মানজনক। কিন্তু (এই সম্বোধনত) অপৰিচিত হোৱা বাবে মোৰ মনত খাপ খুৱাব পৰা নাই।

কাঞ্চুকীয় - ডাঙৰীয়া❋ গুৰুস্থানীয়সকলে যাক দৰ্শক বুলি অভিহিত কৰে আমাৰ সেইগৰাকী মহাৰাজৰ এয়া ভগ্নী যাৰ নাম পদ্মাৱতী। এওঁ আশ্রমবাসিনী মহাৰাজৰ মাতৃ মহাদেৱীক দেখা কৰি সেই পূজ্যাৰ (মাতৃৰ) অনুজ্ঞা লাভ কৰি ৰাজগৃহলৈ যাব। সেয়ে আজি এওঁ এই আশ্রমত থাকিবলৈ ইচ্ছা কৰিছে। সেয়ে আপোনালোকৰ ইচ্ছা অনুসৰি পবিত্র জল, সমিধ, ফুল আৰু কুশ- যিসমূহ তপস্যাৰ সম্পদ (সেইবোৰ) বনৰ পৰা সংগ্রহ কৰক। ধর্মত আগ্রহী ৰাজপুত্রীয়ে তপস্বীসকলৰ ধর্মকার্যত বাধা হোৱাটো কেতিয়াও ইচ্ছা নকৰে। এয়া তেওঁৰ কুলৰ ধর্ম ।। ⏳।।

স্বগত ঃ নাটকত আনে নুশুনাকৈ নিজেই নিজকে কোৱা উক্তি।

যৌগন্ধৰায়ণ- (স্বগত) অঃ❋ এয়াই সেই মগধ ৰাজপুত্রী পদ্মাৱতী যিগৰাকীক পুষ্পক ভদ্র আদি জ্যোতিষীসকলে আমাৰ মহাৰাজৰ পত্নী হ'ব বুলি ভবিষ্যদ্বানী কৰিছিল। সেয়ে-

অধিক দ্বেষ অথবা অধিক আদৰ মনৰ ভাৱনাৰ পৰা উৎপন্ন হয়। তেওঁ আমাৰ মহাৰাজৰ পত্নী হওঁক। মোৰ এই ইচ্ছাৰ বাবে এওঁৰ প্রতি মোৰ আত্মীয়তাৰ ভাব জাগি উঠিছে।

বাসৱদত্তা - (স্বগত) - ৰাজপুত্রী এই কথা শুনি এওঁৰ প্রতি মোৰ ভগ্নীসুলভ স্নেহ জাগি উঠিছে।। ⌨।।

কাঞ্চুকীয় -আপোনাৰ যি ইচ্ছা। হে আশ্রমনিবাসী তপস্বীসকল❋ শুনক❋ শুনক❋ এই সন্মানীয়া মগধ ৰাজপুত্রী আপোনালোকৰ (দ্বাৰা প্রদর্শন কৰা) আস্থাৰ দ্বাৰা উৎসাহিত হৈ ধর্মকার্য অনুষ্ঠানৰ বাবে আপোনালোকৰ অভিলষিত বস্তু গ্রহণ কৰিবলৈ সানুনয়ে প্রার্থনা জনাইছে।

অভীষ্ট ঃ যিটো বাঞ্ছা বা আকাংক্ষা কৰা হয়।

কাক ঘটৰ প্রয়োজন? কোনে পোচাক বিচাৰে? যিয়ে (বেদাধ্যয়নাদি) ব্রত সম্পূর্ণ কৰিছে (তেওঁলোকে) গুৰুক (দক্ষিণাৰূপে) প্রদানৰ বাবে কি বিচাৰে? ধর্মৰ প্রতি অনুৰাগী সেই ৰাজপুত্রীয়ে ইয়াৰ দ্বাৰা নিজেই অনুগৃহীত হ'ব বিচাৰিছে। সেয়ে যাৰ যি অভীষ্ট সেইটো কওঁক- আজি কাক কি দিয়া হ'ব ? ।। ☝।।

যৌগন্ধৰায়ণ - (আত্মগত) আঃ (মোৰ অভীষ্ট লাভৰ) এটা উপায় দেখা গৈছে।

(প্রকাশ কৰি) হেৰা। মই এজন অর্থী।

পদ্মাবতী- সৌভাগ্যক্রমে মোৰ তপোবন যাত্রা সফল হ'ল।

তাপসী- এই আশ্রমত সন্তুষ্ট তপস্বীগণ থাকে। নিশ্চিতভাৱে এওঁ কোনোবা আগন্তুক।

কাঞ্চুকীয়-মহাশয় ❋ (আপোনাৰ বাবে) কি কৰিব লাগিব ?

যৌগন্ধৰায়ণ - এয়া মোৰ ভগ্নী। এওঁৰ পতি দূৰ দেশলৈ গৈছে, কিছুদিনৰ বাবে দেবীয়ে এওঁৰ ৰক্ষণাবেক্ষণ দিয়ক। কাৰণ—

মোক ধনৰ কোনো প্রয়োজন নাই, ভোগ আৰু বস্তুৰো (প্রয়োজন) নাই, মই জীৱিকাৰ বাবে গেৰুৱা বস্ত্র পৰিধান কৰা নাই। যিগৰাকী গাম্ভীর্যপূর্ণা তথা যাৰ ধর্ম আচৰণ সুস্পষ্ট এই কন্যাগৰাকীয়েই মোৰ ভগ্নীৰ চৰিত্রৰ ৰক্ষণাবেক্ষণৰ বাবে সমর্থ। ।। ৭।।

বাসৱদত্তা - (স্বগত) হায় ❋ যৌগন্ধৰায়ণে মোক এইগৰাকীৰ হাতত তুলি দিব বিচাৰিছে। হওঁক। তেওঁ অবিবেচনাৰে কার্য নকৰে।

কাঞ্চুকীয়- দেবী ❋ এওঁৰ প্রার্থনা বৰ ডাঙৰ। কেনেদৰে মঞ্জুৰ কৰিম ?

কাৰণ ধন দিবলৈ সহজ, প্রাণ (দিবলৈও) সহজ, তপস্যা (ৰ ফল ত্যাগ কৰিবলৈও) সহজ, সকলো (বস্তু প্রদান কৰাটো) সহজ (কিন্তু) ন্যাস ৰাখিবলৈ দিয়া বস্তুৰ ৰক্ষণাবেক্ষণ দুঃখজনক।। ।।

২.৪.২ ব্রহ্মচারী-চরিত্রস্য প্रवेशात्

(ইয়াৰ পিছত ব্রহ্মচাৰীৰ প্রবেশ)

ব্রহ্মচাৰী -(ওপৰলৈ চাই) দুপৰীয়া হ'ল। বৰ ভাগৰি পৰিছো। কোন স্থানতনো বিশ্রাম কৰো ? (ঘুৰি লৈ) ঠিক আছে। চাৰিওদিশে এইখন এখন তপোবন যেন লাগিছে।

ঠাইখনৰ বাবে উৎপন্ন হোৱা বিশ্বাসৰ বাবে শংকাৰহিত হৰিণবোৰ আশ্বস্ত হৈ ঘূৰি আছে। ইয়াত সকলো বৃক্ষ ফল-ফুলেৰে সমৃদ্ধ, শাখা যুক্ত (আৰু) দয়াৰ দ্বাৰা সুৰক্ষিত। কপিল বর্ণৰ গোধন বহুল পৰিমাণে আছে। দিশসমূহো ক্ষেত্রবতী নহয়। নিঃসন্দেহে এয়া তপোবন কাৰণ বহু স্থানৰ পৰা ধোৱা উদ্ভূত হৈছে।। ।।

ক্ষেত্রবতী ঃ কৃষি পথাৰ যুক্ত।

যি হওঁক, প্রৰেশ কৰো। (প্রবেশ কৰি) অঃ ❋ এইজন লোক আশ্রম বিৰুদ্ধ। (আনটো ফালে চাই) অথবা তপস্বীসকলো ইয়াত বর্তমান। অ' ❋ স্ত্রীলোক। (আগুৱাই যোৱাত কোনো বাধা নাই)

কাঞ্চুকীয়-দ্বিধাহীনভাৱে আপুনি প্রবেশ কৰক। আশ্রমস্থল সকলো লোকৰ বাবে একে।

বাসৱদত্তা-হুম্।

পদ্মাৱতী- অঃ আর্যাই পৰপুৰুষৰ দর্শনৰ পৰা বিৰত আছে। ঠিক আছে। মোৰ ন্যাস সুপৰিপালনীয়।

কাঞ্চুকীয়-ডাঙৰীয়া। আমি (ইয়াত) আগতে প্রবেশ কৰিছো । সেয়ে (আমাৰ) অতিথি সৎকাৰ গ্রহণ কৰক।

ব্রহ্মচাৰী-(আচমন কৰি) হ'ব হ'ব। ভাগৰ নাইকীয়া হ'ল।

যৌগন্ধৰায়ণ-ডাঙৰীয়া❋ ক'ৰ পৰা আহিছে? ক'লৈ যোৱা হ'ব? ডাঙৰীয়াৰ নিবাস স্থান ক'ত?

ব্রহ্মচাৰী - ডাঙৰীয়া❋ শুনক। ৰাজগৃহৰ পৰা আহিছো। বেদৰ বিশেষ জ্ঞানৰ বাবে বৎসৰাজ্যত থকা লাৱানক গাঁৱত নিবাস কৰিছিলো।

বাসৱদত্তা -(স্বগত) হাঁয় লাৱানক❋ লাৱানকৰ নাম ল'লে মোৰ দুখ আকৌ নতুন হৈ পৰে।

যৌগন্ধৰায়ণ -অধ্যয়ন সমাপন হৈছেনে?

ব্রহ্মচাৰী -নাই হোৱা।

যৌগন্ধৰায়ন -যদি বিদ্যা সমাপ্ত হোৱা নাই তেন্তে গুছি অহাৰ কাৰণ কি?

ব্রহ্মচাৰী -তাত সাংঘাটিক বিপর্যয় হৈছে।

যৌগন্ধৰায়ণ - কেনেকৈ?

ব্রহ্মচাৰী - তাত উদয়ন নামেৰে এজন ৰজা আছিল।

যৌগন্ধৰায়ণ -মহাৰাজ উদয়নৰ বিষয়ে শুনিছো। তেওঁৰ কি হ'ল?

ব্রহ্মচাৰী - অবন্তীৰাজ পুত্রী বাসবদত্তা নামৰ পত্নী তেওঁৰ অতিশয় স্নেহৰ পাত্রী আছিল।

যৌগন্ধৰায়ণ- হোৱাই উচিত। তাৰ পিছত কি হ'ল?

ব্রহ্মচাৰী-তাৰ পিছত সেই ৰজা চিকাৰলৈ যোৱাৰ পিছত গাঁৱত জুই লগাত তেওঁ দগ্ধ হৈ গ'ল।

বাসৱদত্তা- (স্বগত) মিছা কথা। এয়া সম্পূর্ণ মিছা কথা। মই অভাগিনী জীয়াই আছো।

যৌগন্ধৰায়ণ- তাৰ পিছত? তাৰ পিছত কি হ'ল।

ব্রহ্মচাৰী- তাৰ পিছত তেওঁক বচাবলৈ গৈ যৌগন্ধৰায়ণ নামৰ মন্ত্রীজনো সেই জুইত পৰি গ'ল।

যৌগন্ধৰায়ণ- সঁচাকৈয়ে পৰি গ'ল। তাৰ পিছত?

ব্রহ্মক্ষচাৰী- তাৰ পিছত চিকাৰৰ পৰা উভতি অহা ৰজাই সেই বৃত্তান্ত শুনি তেওঁলোক দুয়োৰে পৰা হোৱা বিচ্ছেদৰ বাবে সন্তপ্ত হৈ সেই জুইতেই প্রাণ ত্যাগ কৰিবলৈ ইচ্ছুক হৈছিল আৰু তেতিয়া মন্ত্রীসকলৰ দ্বাৰা অতি যত্নেৰে ৰজাক বিৰত কৰা হ'ল।

বাসবদত্তা- (স্বগত) আর্যপুত্রৰ মোৰ প্রতি যি অনুকম্পা আছে সেয়া মই ভালদৰে জানো।

যৌগন্ধৰায়ণ- তাৰ পিছত?

ব্রহ্মচাৰী- তাৰ পিছত তেওঁৰ শৰীৰত পৰিধান কৰা, পূৰি অবশিষ্ট হিচাপে থকা আভূষণসমূহক আলিঙ্গন কৰি ৰজা মূর্ছিত হৈ গ'ল।

সকলোৱে-হাঁয়❋

বাসৱদত্তা-(স্বগত) এতিয়া আর্য যৌগন্ধৰায়ণৰ কামনা পূর্ণ হ'ল।

চেটী ঃ সেবিকা।

আর্যপুত্র ঃ কোনো স্ত্রীয়ে স্বামীৰ প্রতি কৰা সম্বোধন।

অবন্তিৰাজ পুত্রী ঃ অৱন্তী ৰাজ্যৰ ৰজাৰ কন্যা অর্থাৎ বাসবদত্তা।

চেটী- ৰাজকুমাৰী। এই মহাশয়াই কান্দিছে।

পদ্মাবতী- তেওঁ নিশ্চয় দয়ালু স্বভাৱৰ।

যৌগন্ধৰায়ণ- হয়, সঁচাকৈয়ে। মোৰ ভনীৰ স্বভাৱ দয়ালু। তাৰ পিছত? তাৰ পিছত? ব্রহ্মচাৰী- তাৰ পিছত ৰজাই লাহে লাহে চেতনা ঘুৰাই পালে।

পদ্মাবতী- ভাগ্যক্রমে জীৱিত হৈ আছে। অচেতন হৈ গ'ল এই কথা শুনি মোৰ হৃদয় শূন্য হৈ পৰিছিল।

যৌগন্ধৰায়ণ- তাৰ পিছত তাৰ পিছত।

ব্রহ্মচাৰী- তাৰ পিছত মাটিত পৰি লুটি বাগৰ খোৱা বাবে ধূলিৰে ধূসৰিত শৰীৰযুক্ত ৰজাই অকলে অকলে উঠি হায়, বাসবদত্তা ❋ হায় অবন্তীৰাজ পুত্রী ❋ হায় প্রিয়া ❋ হায় প্রিয়শিষ্যা ❋ এনেদৰে বহু প্রলাপ কৰিছিল। ইয়াতকৈ বেছি আৰু কি কম ❋

এনে (দুঃখাচ্ছন্ন) অবস্থাত চক্রবাক পক্ষী নাইবা নিজৰ পত্নীৰ পৰা বিযুক্ত আন কোনোৱেই তেওঁৰ দৰে নহয়। সেই স্ত্রী ধন্যা যাক পতিয়ে সেই ধৰণে জ্ঞান কৰে। পতিৰ স্নেহৰ বাবে তেওঁ দগ্ধা হৈও অদগ্ধা ।। 🗁🗐।।

যৌগন্ধৰায়ণ- হয় মহাশয়। তেওঁক প্রকৃতিষ্ঠ কৰিবলৈ কোনো মন্ত্রী প্রযত্নবান হোৱা নাইনে?

ব্রহ্মচাৰী- ৰুমন্বান্ নামৰ মন্ত্রীগৰাকীয়ে ৰজাক সুস্থিৰ কৰোৱাত অতি প্রযত্নশীল হৈছে।


ভোজন গ্রহণ নকৰাৰ ক্ষেত্রত তেওঁ ৰজাৰ দৰে একে। অনবৰত কান্দি থকা বাবে মুখমণ্ডল ক্ষীণাই গৈছে। গভীৰ দুখ অনুভব কৰা বাবে ৰজাৰ দৰেই শৰীৰত সংস্কাৰ গ্রহণ কৰিছে, দিনে ৰাতিয়ে ৰজাক যত্নেৰে পৰিচর্যা কৰিছে । যদি ৰজাই মুহূর্ততে প্রাণ ত্যাগ কৰে তেওঁৰো লগে লগে মৃত্যু হ'ব।। 🗁🗐।।

বাসবদত্তা- (স্বগত) সৌভাগ্যক্রমে আয্যপুত্র উপযুক্ত হাততেই আছে ।

যৌগন্ধৰায়ণ- (স্বগত) অঃ ৰুমন্বনে বহু ডাঙৰ বোজা বহন কৰি আছে। মোৰ এই ভাৰ বিশ্রামযুক্ত কিন্তু তেওঁৰ পৰিশ্রম নিৰবচ্ছিন্ন, কাৰণ ৰজা যাৰ (ওপৰত) নির্ভৰশীল হয় সকলো তেওঁৰ ওপৰত নির্ভৰশীল।। 🗁🗐।।

(প্রকাশ কৰি) ঠিক আছে মহোদয়। এতিয়া সেই ৰজা প্রকৃতিষ্ঠ হৈছে নে?

ব্রহ্মচাৰী - মই সেই কথা এতিয়া নাজানো। ইয়াত তেওঁৰ লগত হাঁহিছিলো, ইয়াত তেওঁৰ লগত কথা পাতিছিলো, ইয়াত তেওঁৰ লগত কটাইছিলো, ইয়াত তেওঁৰ ওপৰত অভিমান কৰিছিলো, ইয়াত তেওঁৰ সৈতে শয়ন কৰিছিলো এনেদৰে বিলাপ কৰি থকা সেই ৰজাক বৰ যত্নেৰে মন্ত্রীয়ে সেই গাঁৰৰ পৰা লৈ গুছি গ'ল। ৰজা গুছি যোৱাৰ পিছত সেই গাঁওখন এনেদৰে সৌন্দর্যহীন হৈ পৰিল যেন আকাশত তৰাৰে সৈতে চন্দ্র আঁতৰি গ'ল। তাৰ পিছত মইও ওলাই আহিলো।



अग्रगत्याः निरीक्षणम्

प्रश्न १: यौगन्धरायणः कस्य छद्मवेषं धारयामास ?

.....

प्रश्न २: तपोवननिवासिनः लोकान् कः उत्सरयति स्म ?

.....

प्रश्न ३: मगधराज्यस्य राज्ञः नाम किम् ?

.....

प्रश्न ४: पद्मावती का ?

.....

प्रश्न ५: यौगन्धरायणः वासवदत्तां कस्याः समीपे न्यासरूपेण रक्षितुम् इच्छति ?

.....

प्रश्न ६: ब्रह्मचारिः कुतः आगतः ?

.....

प्रश्न ७: अवन्तीराजपुत्री इति का निर्दिष्टा अस्ति ?

.....

प्रश्न ८: पत्नीदुःखेन दुःखितः उदयनः कस्य मन्त्रिणः प्रशासनस्य अधीन आसीत् ?

.....

२.५ ब्रह्मचारी-चरित्रस्य प्रवेशात् तात्पर्य-व्याख्या

अस्मिन् अंशे भवान् ब्रह्मचारिचरित्रस्य प्रथमाङ्के अवतरणस्य तात्पर्यं ज्ञातुं शक्नोति।

स्वप्नवासवदत्तनाटकस्य प्रथमाङ्कस्य समापनभागे ब्रह्मचारीनामकः कश्चन पात्रः प्रविशति। तस्य चरित्रस्य केवलं एकस्मिन्नेव दृश्ये प्रवेशनं दृश्यते, किन्तु तस्य अवतरणे सम्पूर्णनाटके विशेषतात्पर्यमस्ति।

वासवदत्ता यौगन्धरायणः च लावानकनाम्नः ग्रामात् निष्क्रान्तौ कदाचित्। तयोः निष्क्रमणोत्तरं तत्र स्थिता ग्रामवासिनः प्रतिक्रिया ब्रह्मचारिणः प्रवेशेनैव ज्ञातुं शक्यते। ब्रह्मचारी तदा कथयति यत् राजा उदयनः शिकारार्थं गमनसमये स ग्रामः अग्निना दग्धः अभवत्। तदा तस्य भार्या वासवदत्ता तस्मिन्नेव ज्वालानले भस्मीभूता जाता। ततः यौगन्धरायणः मन्त्रिश्च तां रक्षितुं प्रयत्नं कुर्वन् तत्रैव दग्धः। तदनन्तरं राजा उदयनः प्रत्यागत्य वासवदत्तायाः अर्धदग्धाभरणानि दृष्ट्वा तान्यालिङ्ग्य मूर्च्छितोऽभवत्। एवमेव यौगन्धरायणस्य योजनानुसारमेव घटनाचक्रं प्रवर्तितवतीति ज्ञायते।

अस्य पात्रस्य प्रवेशेन उदयनस्यप्रति पद्मावत्याः मनसि उत्पन्नः स्नेहभावः अपि दर्शकानां संज्ञाने आयाति। वासवदत्तायाः शोकेन म्लानः राजा उदयनः अचेतनः अभवत् इति ब्रह्मचारी

ज्ञापितवान्। एतत् श्रुत्वा पद्मावत्या उक्तं यत् अचेतनजातः इति श्रुत्वा तस्या हृदयं शून्यम् अभवदिति।

उदयनस्य गुणेषु पद्मावती आकृष्टा भूत्वा तेन सह विवाहाय उत्सुकत्वं अपि अनेन ब्रह्मचारिचरित्रेण ज्ञातुं शक्यते। यतो हि, राजा उदयनः द्वितीयविवाहं करिष्यति वा न इति ज्ञातुं पद्मावती उत्सुकाऽभवत्।

ब्रह्मचारिणा एतदपि निवेदितं यत् वासवदत्तायाः अभावे शोकाकुलराजा रूमन्वाननाम्ना मंत्रीणा सेव्यते। एतत् श्रुत्वा वासवदत्ता सम्यक् आश्वस्ताऽभवत्। तया इदमुक्तम् – ''सौभग्यवशात् राजा उदयनः उचितपुरुषेण परिरक्षितः अस्ति।'' राजा सुरक्षित इति समाचारेण तस्याः मनसः चिन्ता शमयति।

एवं ब्रह्मचारिचरित्रस्य प्रवेशः अदृष्टवृत्तान्तस्य विज्ञापनाय नाट्यकथाया गतिप्रदानाय च विशेषतात्पर्यमावहति।

२.६ कतिपय विशेष-श्लोकानां व्याख्यानम्

१)

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥ ४॥

महाकविभासविरचितस्य स्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्के लक्ष्यते अयं श्लोकः। मगधराजस्य दर्शकस्य भगिन्याः पद्मावत्याः आगमनमुद्दिश्य तपोवने भटैःतापसानाम् उत्सारणकाले वासवदत्ता उत्सारिता सती नितराम् आत्मानम् अपमानिताम् अमन्यत्। तदा व्यथितां तां मन्त्री यौगन्धरायणः प्रबोधयन्नाह-पूर्वमिति।

पूर्वं पूर्वस्मिन्काले यदा त्वं राज्ञी आसीः तदा त्वया अपि भवत्याऽपि एवं गतम् एतादृशं भटकर्तृकोत्सारणपूर्वकं गमनं अभिमतम् अभिष्टम् आसीत् अभवत्। पुनः भर्तुःतत्रभवतः उदयनस्य विजयेन स्वराज्यप्राप्तिरूपजयेन श्लाघ्यं परिजनोपेतं यथा तथा सविलासं गमिष्यसि। तदेव सामान्येन समर्थ्यते-जगतः लोकस्य भाग्यपङ्क्तिः दैवविहिता दुःखसुखश्रेणिः कालक्रमेण अनुकूलप्रतिकूलसमयानुसारेण च चक्रारपङ्क्तिः चक्रस्य अराणां दण्डानां पङ्क्तिः इव परिवर्तमाना भ्रमन्ती गच्छति, कदाचिदुच्चैर्गच्छति कदाचिन्नीचैरागच्छति। अतः चक्रनेमिक्रमेण मानवानाम् उन्नतेरवनतेः च अनियतत्वं बोध्यम् इति भावः। अस्यानुरूपो भावो यथा मेघदूते, – ''नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमणेन'', यथा वा शाकुन्तले, –''तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवैष दशान्तरेषु।'' श्लोके अस्मिन् उपमा नाम अर्थालङ्कारः, वसन्ततिलकं च वृत्तम् विद्येते।

२)

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ७॥

महाकविभासविरचितस्य स्वप्नवासवदत्तमिति नाटकस्य प्रथमे अङ्के दृश्यते इदम् पद्यम्। यदा काञ्चुकीयः यौगन्धरायणं अकथयत् यत्, पद्मावती नाम सा महाराजस्य दर्शकस्य भगिनी अतीव धर्मप्रिया, तापसेभ्यश्च धनानि दातुमिच्छति, तदा यौगन्धरायणः विचारयति स्म यत्, इयम् एव पद्मावती पुष्पभद्रादिभिः दैवज्ञैः आदिष्टा यत् महाराजस्य उदयनस्य भार्या भविष्यतीति। अतएव पद्मावतीं प्रति यौगन्धरायणस्य महती आत्मीयता अजायत। इदृशस्य भावोदयस्य कारणविश्लेषणं कुर्वन्नाह यौगन्धरायणः- प्रद्वेष इति।

विद्वेषः घृणा वा बहुमानः सम्मानो वा, संकल्पात् मनोव्यापारात् उपजायते उत्पद्यते। कस्यचिद् जनस्य मनोव्यापारात् एव अनुरागः विरक्तिः वा भवति। अतः भर्तृदाराभिलाषित्वाद् अर्थात् इयं स्वामिनः उदयनस्य दारा पत्नी भवेत् इति ममापि अभिलाष वशात् अस्यां पद्मावत्यां मे मम यौगन्धरायणस्य महती अत्यधिकस्वता आत्मीयता उत्पद्यते इत्यर्थः। अनुरूपोक्तिः दृश्यते शाकुन्तले, - 'कामी स्वतां पश्यति' इति। अर्थान्तरन्यासः काव्यलिङ्गं च। अनुष्टुप् वृत्तम्।

३)

सुखमर्थों भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥ १०॥

महाकविभासकृतस्य 'स्वप्नवासवदत्तम्' नामनाटकस्य प्रथमे अङ्के समुपलभ्यते अयं श्लोकः। राज्ञः उदयनस्य मन्त्री यौगन्धरायणः परिव्राजकस्य छद्मवेषेण तपोवने उपनितः सन् मगधराजस्य तनयायाः पद्मावत्याः हस्ते आवन्तिकावेषधारिणीं वासवदत्तां न्यासरूपेण प्रदातुं ऐच्छत्। तदाकर्ण्य काञ्चुकीयः पद्मावतीमुद्दिश्य एवमवदत्,-

अर्थः धनं सुखम् अक्लेशेन यथा तथा दातुं भवेत्, दातुं शक्योऽस्ति। प्राणाः स्वजीवितम् अपि सुखम् अनायासं दातुं भवेत् शक्यते। तपः तपसः फलम् अपि सुखं दातुं शक्यं भवेत् शक्यम्। अन्यत् अपरं सर्वं सर्ववस्तुजातं सुखं अनायासं दातुं भवेत् शक्यम्। परं तु न्यासस्य निक्षेपस्य वा रक्षणं परिपालनं दुःखं दुःखकारणं दुःसंपाद्यं वा भवति। धनजीवनतपः प्रभृतिदानात् अपि दुष्करतरं न्यासरक्षणम् इति भावः। कष्टार्जितस्य धनस्य त्यागाय कस्यापि इच्छा न प्रायशः भवति, तथापि सदुद्देशे अर्थत्यागः संभवति। प्रियभूतं जीवनं कस्मादपि कारणविशेषात् विसृज्यते। कृच्छ्रसाध्यस्य तपफलस्य विसर्जनं कथमपि संभवति। परं तृ न्यासरक्षणं अतीव कष्टकरम्। सर्वद्रव्यप्रदानं सुखकरं, परं तु न्यासरक्षणं क्लेशदायकम् इति सरलार्थः। अत्र श्लोके अनुष्टुप् वृत्तम्।



१.७ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनात् भवता स्वप्नवासवदत्तम् नामस्य नाटकस्य प्रथमाङ्कस्य महत्त्वपूर्णाः कतिपयांशाः संस्कृतपाठेन सह ज्ञाताः। तदनन्तरं तेषां असमीया-भाषायाः अनुवादम् अपि अवगन्तुं शक्नोति। अनेन नाटके मुख्यपात्राणां यथा - उदयनः, वासवदत्ता, पद्मावती, योगन्धरायणः, ब्रह्मचारी इत्यादीनां परिचयः प्राप्तः। नाटके ब्रह्मचारिणः प्रवेशः केवलं प्रथमाङ्के एकवारं दृश्यते, तस्य आविर्भावस्य तात्पर्यम् अपि ज्ञातम्। श्लोकानां व्याख्या अपि केनप्रकारेण क्रियते तद्विषये अपि अभ्यास व्याख्याद्वारेण अवगन्तुं शक्नोति।



२.८ ज्ञानाधिक्यम्

१) आय्यर ए. एस. पी. (११५७) भासः मद्रासः वि. वामस्वामि सन्स् एण्ड् सन्।
२) काले, एम्. आर. (११८८) स्वप्नवासवदत्तम् ऑफ् भासः, दिल्लीः मोतीलाल बनारसीदास् पब्लिशर्स्प्रा. लि।
३) पुञ्चलकरः ए. डी. (१९९८) भासः - ए स्टडी, दिल्लीः मुनिराम् मनोहरलाल् ओरिएण्टल् पब्लिशर्स् एण्ड् बुकसेलर्स।
४) शर्माः थानेश्वरः (१९९४) संस्कृतसाहित्यस्य इतिवृत्तम्, गुवाहटीः चन्द्रप्रकाशः।



२.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : एकस्य परिव्राजकस्य।
प्रश्नः २ उत्तरम् : मगधाधिपतेः कन्यायाः अनुगमनकर्तारः सेवकाः।
प्रश्नः ३ उत्तरम् : मगधराज्यस्य राज्ञः नाम दर्शकः आसीत्।
प्रश्नः ४ उत्तरम् : पद्मावती मगधराज्यस्य राजकुमारी अस्ति।
प्रश्नः ५ उत्तरम् : मगधराजकुमारी पद्मावत्याः समीपे।
प्रश्नः ६ उत्तरम् : वत्सराजस्य लावाणक इति ग्रामात्।
प्रश्नः ७ उत्तरम् : वासवदत्ता।
प्रश्नः ८ उत्तरम् : रुमन्वान् इति मन्त्रिणः।



२.१० अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नः (५०-शब्देषु उत्तरं लिखतु)

प्रश्नः १: ब्रह्मचारिणः प्रवेशनस्य तात्पर्यम् संक्षेपेण लिखतु।

ख) लघुप्रश्नः (१५०-शब्देषु उत्तरं लिखतु)

प्रश्नः १: प्रथमाङ्कस्य चतुर्थदशमश्लोकयोः व्याख्या कुर्वन्तु।

ग) रचनाधर्मी प्रश्नः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: स्वप्नवासवदत्तम् नाटकस्य ब्रह्मचारिणः प्रवेशात्पूर्वं वृत्तान्तं समासेन उपस्थाप्यताम्।

*** ***** ***

अध्यायः ३ : स्वप्नवासवदत्तम् (द्वितीयतृतीयाङ्कयोः पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

३.१ उद्देश्यम्

३.२ परिचयः

३.३ द्वितीयाङ्कस्य मूलसंस्कृतपाठः

३.४ उक्तसंस्कृतपाठस्य असमीयानुवादः

३.५ तृतीयाङ्कस्य मूलसंस्कृतपाठः

३.६ उक्तसंस्कृतपाठस्य असमीयानुवादः

३.७ नाटके द्वितीयाङ्कस्य महत्वम्।

३.८ नाटके तृतीयाङ्कस्य महत्वम्

३.९ अध्यायात् किमवगतम्

३.१० ज्ञानाधिक्यम्

३.११ अग्रगत्याः निरूपणम्

३.१२ अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- स्वप्नवासवदत्तम् इति नाटकस्य द्वितीयं तथा तृतीयं अङ्कौः संस्कृतमूलपाठेन सह अवगन्तुम् अर्हति।
- उक्तपाठानां असमीयानुवादमपि ज्ञातुं शक्नोति।
- नाटके द्वितीय- तृतीयाङ्कयोः महत्वपूर्णस्थानविषये अपि ज्ञातुम् अर्हति।

३.२ परिचयः

भवान् पूर्वमेव भासकृत स्वप्नवासवदत्तम् इति नाटकस्य प्रथमाङ्कः सम्यक् ज्ञातवान्। उक्ताङ्कस्य केषाञ्चिद् दृश्यानां संस्कृतपाठेण सह तेषां असमीयानुवादान् अपि ज्ञातवान्। श्लोकानां व्याख्या कथं क्रियते इति अपि ज्ञातवान्।

अस्मिन् अध्याये नाटकस्य द्वितीय-तृतीयाङ्कयोः संस्कृतमूलपाठस्य ज्ञानं लभ्यते। तेषां असमीयाभाषायाम् अनुवादाः अपि ज्ञातुं शक्यते। एतौ द्वितीयः तृतीयश्च अङ्कौ नाटके किं महत्वपूर्णं स्थानं धारयतः इति अपि ज्ञातुमर्हति।

३.३ द्वितीयाङ्कस्य मूलसंस्कृतपाठः

(ततः प्रविशति चेटी)

चेटी- कुञ्जरिके कुञ्जरिके। कुत्र कुत्र भर्त्तृदारिका पद्मावती ? किं भणसि एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति ? यावत् भर्तृदारिकामुपसर्पामि। (परिक्रम्यावलोक्य) अम्मो ! इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायामसञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति। यावदुपसप्सर्यामि।

(निष्क्रान्ता)

प्रवेशकः।

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा वासवदत्तया सह)

वासवदत्ता- हला ! एष ते कन्दुकः।

पद्मावती- आर्ये ! भवत्विदानीमेतावत्।

वासवदत्ता- हला ! अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयाविव ते हस्तौ संवृत्तौ।

चेटी - क्रीडतु क्रीडतु तावद् भर्तृदारिका। निर्वत्यतां तावद् अयं कन्याभावरमणीयः कालः।

पद्मावती- आर्ये ! किमिदानीं मामपहसितुमिव निध्यायसि ?

वासवदत्ता- नहि नहि। हला अधिकमद्य शोभसे। अभित इव तेऽद्य वरमुखं पश्यामि।

पद्मावती- अपेहि। मेदानींमामपहस।

वासवदत्ता- एषास्मि तुष्णीका भविष्यन्महासेनबधु।

पद्मावती- क एष महासेनो नाम ?

वासवदत्ता- अस्ति उज्जयिन्या राजा प्रद्योतो नाम। तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेन इति।

चेटी- भर्तृदारिका तेन राज्ञा सह संबन्धं नेच्छति।

वासवदत्ता- अथ केन खल्विदानीमभिलषति ?

चेटी- अस्ति वत्सराज उदयनो नाम। तस्य गुणान् भर्तृदारिकाभिलषति।

वासवदत्ता -(आत्मगतम्)आर्यपुत्रं भर्तारमभिलषति। (प्रकाशम्) केन कारणेन ?

चेटी- सानुक्रोश इति।

वासवदत्ता- (आत्मगतम्) जानामि जानामि। अयमपि जन एवमुन्मादितः।

चेटी- भर्तृदारिके ! यदि स राजा विरूपो भवेत्।

वासवदत्ता -नहि नहि। दर्शनीय एव।

पद्मावती- आर्ये। कथं त्वं जानासि ?

वासवदत्ता- (आत्मगतम्) आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। किमिदानीं करिष्यामि ? भवतुदृष्टम् (प्रकाशम्)। हला। एवमुज्जयिन्या जनोमन्त्रयते।

पद्मावती- युज्यते। न खल्वेष उज्जयिनीदुर्लभः। सर्वजनमनोभिरामं खलु सौभाग्यं नाम।

(ततः प्रविशति धात्री)

धात्री- जयतु भर्तृदारिका। भर्तृदारिके। दत्तासि।

वासवदत्ता- आर्ये! कस्मै?

धात्री- वत्सराजायोदयनाय।

वासवदत्ता -अथ कुशली स राजा?

धात्री - कुशली स इहागतः। तस्य भर्तृदारिका प्रतीष्टा च।

वासवदत्ता- अत्याहितम्।

धात्री- किमत्रात्याहितम्?

वासवदत्ता- न खलु किञ्चित्। तथा नाम सन्तप्योदासीनो भवतीति।

धात्री- आर्ये। आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।

वासवदत्ता- आर्ये। स्वयमेव तेन वरिता।

धात्री- नहि नहि। अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।

वासवदत्ता- (आत्मगतम्) एवम्। अनपराद्ध इदानीमत्रार्यपुत्रः।

(प्रविश्यापरा)

चेटी- त्वरतां त्वरतां तावदार्या। अद्यैव किल शोभनं नक्षत्रम्। अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति।

वासवदत्ता - (आत्मगतम्) यथायथा त्वरते, तथा तथान्धीकरोति में हृदयम्।

धात्री- एत्वेतु भर्तृदारिका।

(निष्क्रान्ताःसर्वे)



ज्ञातव्यम्

संस्कृतनाटकेषु 'प्रवेशकः' पञ्च प्रकाराणां अर्थोपक्षेपकानां मध्ये प्रमुखः। नाटके तेषां घटनानां याः अङ्केषु प्रदर्शयितुं अशक्याः वा याः दीर्घकालं व्याप्नुवन्ति, ताः घटनाः अर्थोपक्षेपकेन सूच्यन्ते। तेषु प्रवेशकनामकः अर्थोपक्षेपकः द्वयोः अङ्कयोः मध्ये उपनिबद्धो भवति। सः भूतभविष्यत्कथानां वर्णनं करोति। तस्य भाषा प्राकृतं, तस्य प्रस्तुतिः च नीचपात्रैः जनैः क्रियते।

३.४ उक्तसंस्कृतपाठस्य असमीयानुवादः

(তাৰ পিছত চেটীৰ প্ৰৱেশ)

চেটী - কুঞ্জৰিকা, অ' কুঞ্জৰিকা।

ৰাজকুমাৰী পদ্মাৱতী ক'ত?



কৌতুক মঙ্গল -মূল বিবাহৰ আগে আগে কন্যাৰ বাওঁহাতৰ মণিবন্ধত সূতা বন্ধা এক অনুষ্ঠান।

কি কৈছা- এই ৰাজকুমাৰীয়ে মাধৱীলতা মণ্ডপৰ ওচৰত কন্দুক খেলি আছে? ঠিক আছে। ৰাজকুমাৰীৰ ওচৰলৈ যাওঁ। (ঘূৰি চাই, দেখি) অঃ কর্ণাভৰণ ওপৰত উঠি থকা, পৰিশ্ৰমৰ বাবে ওলোৱা ঘামৰ বিন্দুৰ দ্বাৰা চিত্ৰিত আৰু ভাগৰ লগা বাবে সুন্দৰ দেখা মুখমণ্ডল যুক্ত ৰাজকুমাৰীয়ে কন্দুক খেলি খেলি এইফালেই আহি আছে। ঠিক আছে। (মইও) তেওঁৰ কাষলৈ যাওঁ।

(ওলাই যায়)

প্ৰৱেশক

(ইয়াৰ পিছত কন্দুক খেলি থকা পদ্মাৱতীৰ দাসী আৰু বাসবদত্তাৰ সৈতে প্ৰৱেশ)



কন্দুক - খেলা বল।
কর্ণাভৰণ- কাণত পিন্ধা অলংকাৰ।

বাসবদত্তা- সখী❋ এয়া তোমাৰ কন্দুক।

পদ্মাবতী- আর্য❋ ইমানতে থাকক।

বাসবদত্তা- সখী❋ বহু সময় কন্দুক খেলি থকা বাবে অধিক ৰঙা বৰণ ধৰা তোমাৰ হাত দুখন আন কাৰোবাৰ হাত যেন লাগিছে।

চেটী- খেলা। (আৰু) খেলা ৰাজকুমাৰী। ৰমনীয় কুমাৰী জীৱনৰ সময়খিনি এনেদৰেই কটোৱা।

পদ্মাবতী- আর্যা❋ মোক পৰিহাস কৰিবলৈকে যেন এনেদৰে চাই আছা।

বাসবদত্তা- নহয়, নহয় সখী। আজি তোমাক বৰ ধুনীয়া লাগিছে। চাৰিও দিশে আজি যেন তোমাৰ সুন্দৰ মুখখন দেখিবলৈ পাইছো। অথবা তোমাৰ বৰৰ মুখ দেখিবলৈ পাইছো।

পদ্মাবতী- আঁতৰি যোৱাচোন। এতিয়া মোক উপহাস নকৰিবা।

বাসবদত্তা- মহাসেনৰ হ'বলগীয়া পুত্ৰবধূ। এয়া মই মৌন হৈ ৰ'লো।

পদ্মাবতী- এই মহাসেননো কোন?

বাসবদত্তা - উজ্জয়িনীৰ ৰজা। তেওঁৰ নাম প্ৰদ্যোত। তেওঁৰ সেনাৰ বিস্তৃতিৰ বাবে তেওঁক মহাসেন বুলি কোৱা হয়।

চেটী- ৰাজকুমাৰীয়ে সেই ৰজাৰ লগত সম্বন্ধ হোৱাটো বিচৰা নাই।

বাসবদত্তা- তেন্তে এতিয়া কাৰ লগত বিচাৰিছে?

চেটী- উদয়ন নামৰ বৎসাধিপতি আছে। তেওঁৰ গুণসমূহৰ প্ৰতি ৰাজকুমাৰী আগ্ৰহান্বিত।

বাসবদত্তা- (স্বগত) আর্যপুত্রক পতিৰূপে পাবলৈ বিচাৰিছে❋ (প্ৰকাশ কৰি) কিহৰ বাবে?

চেটী - (তেওঁ) দয়ালু, সেইবাবে।

বাসবদত্তা- (স্বগত) জানো। জানো। এইজনীকো এইদৰে উন্মত্তা কৰা হৈছিল।

চেটী- ৰাজকুমাৰী❋ যদি সেই ৰজা কুৰূপ হয়?

বাসবদত্তা- নহয়। নহয়। দেখাত সুন্দৰ।

পদ্মাবতী- আর্যা তুমি কিদৰে জানিলা?

বাসবদত্তা- (স্বগত) আর্যপুত্রৰ প্ৰতি থকা পক্ষপাতিত্বৰ কাৰণে আচাৰ উলংঘন কৰা হ'ল।

এতিয়া কি কৰো? ঠিক আছে। (প্ৰকাশ কৰি) সখী, এনেদৰে উজ্জয়িনীৰ লোকসকলে কয়।

পদ্মাবতী- ঠিক আছে। নিশ্চিতভাৱে উজ্জয়িনী নিবাসীসকলৰ বাবে এইটো (উদয়নক দেখাটো) দুৰ্লভ নহ'ল। সেইটোৱেই সৌন্দৰ্য যিয়ে সকলো লোকৰ মনৰ আহ্লাদনকাৰী।

(ইয়াৰ পিছত ধাত্ৰীৰ প্ৰৱেশ)

ধাত্রী- ৰাজকুমাৰীৰ জয় হওঁক — ৰাজকুমাৰী ❋ তোমাক প্ৰদান কৰা হ'ল।

বাসবদত্তা- কালৈ?

ধাত্রী- বৎসৰাজ উদয়নলৈ।

বাসবদত্তা- সেই ৰজা কুশলে আছেনে ?

ধাত্রী- কুশলে আছে। তেওঁ ইয়ালৈ আহিছে আৰু তেওঁ ৰাজকুমাৰীক স্বীকাৰ কৰিছে।

বাসবদত্তা - সৰ্বনাশ।

ধাত্রী- ইয়াত কি অনুচিত হৈছে ?

বাসবদত্তা- নহয় ❋ একো নহয় ❋ সেই ধৰণে সন্তাপ কৰি পুনৰ যেন উদাসীন হৈ নপৰে। সেয়ে (তেনেদৰে কৈছো)।

ধাত্রী - আৰ্যা ❋ মহানলোকৰ হৃদয় শাস্ত্রজ্ঞানপূৰ্ণ, সেয়ে ই সহজেই স্বাভাৱিক অৱস্থালৈ ঘূৰি আহে।

বাসবদত্তা- আৰ্যা ❋ তেওঁ নিজেই বৰণ কৰিছে নেকি?

ধাত্রী- নহয়, নহয়। অইন কোনো প্ৰয়োজনত তেওঁ ইয়ালৈ আহিছিল। সেই ৰজাৰ উচ্চ বংশ, জ্ঞান, বয়স আৰু ৰূপ দেখি স্বয়ং মহাৰাজেই প্ৰদান কৰিছে।

বাসবদত্তা- (স্বগত) ঠিক আছে। তেন্তে আৰ্যপুত্ৰ নিৰপৰাধী।


(আন এজনী প্ৰৱেশ কৰি)

চেটী- আৰ্যা ❋ শীঘ্ৰে কৰা, শীঘ্ৰে কৰা। আজিয়েই শুভ নক্ষত্ৰ। আজিয়েই মাঙ্গলিক কাৰ্য কৰিব লাগিব। এনেদৰে আমাৰ মহাৰাণীয়ে কৈছে।

বাসবদত্তা- (স্বগত) এওঁলোকে যিমানেই শীঘ্ৰতা কৰিছে সিমানেই মোৰ হৃদয় অন্ধকাৰাচ্ছন্ন হৈ পৰিছে।

ধাত্রী- আহা ❋ আহা ❋ ৰাজকুমাৰী।

(আটাইৰে প্ৰস্থান)



अग्रगत्याः निरीक्षणम्

१. प्रश्नः द्वितीयाङ्के पद्मावती किं क्रीडितवती इति उक्तम्?

.....

२. प्रश्नः महासेनः कस्य राज्यस्य राजा आसीत् ?

.....

३. प्रश्नः पद्मावती कं पतिरूपेण प्राप्तुं इच्छति स्म ?

.....

३.५ तृतीयाङ्कस्य मूलसंस्कृतपाठः

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता)

वासवदत्ता- विवाहामोदसङ्कुले अन्तःपुरचतुश्शाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं भागधेयनिर्वृत्तं दुःखं विनोदयामि। (परिक्रम्य) अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। यावद् उपविशामि। धन्या खलु चक्रवाकवधूः,यान्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीति एतेन मनोरथेन जीवामि मन्दभागा।

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी)

चेटी - क्व नु खलु गता आर्यावन्तिका ? (परिक्रम्यावलोक्य) अम्मो इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्ठा। यावदुपसर्पामि। (उपसृत्य) आर्ये! आवन्तिके! कःकालः, त्वामन्विष्यामि ?

वासवदत्ता- किं निमित्तम् ?

चेटी- अस्माकं भट्टिनी भणति महाकुलप्रसूता स्निग्धा निपुणेति तावत् कौतुकमालिकां गुम्फत्वार्या।

वासवदत्ता- अथ कस्मै किल गुम्फितव्यम् ?

चेटी - अस्माकं भर्तृदारिकायै।

वासवदत्ता -(आत्मगतम्) एतदपि मया कर्तव्यमासीत्। अहो अकरुणाः खल्वीश्वराः।

चेटी- आर्ये! मेदानीमन्यच्चिन्तयित्वा। एष जामाता मणिभूम्यां स्नायति। शीघ्रं तावद् गुम्फत्वार्या।

वासवदत्ता- (आत्मगतम्) न शक्नोम्यन्यच्चिन्तयितुम्। (प्रकाशम्) हला। किं दृष्टो जामाता ?

चेटी- आम्। दृष्टो भर्तृदारिकायाः स्नेहेनास्माकं कौतुहलेन च।

वासवदत्ता -कीदृशो जामाता ?

चेटी- आर्ये! भणामि तावद्, नेदृशो दृष्टपूर्वः।

वासवदत्ता- हला! भण भण, किं दर्शनीयः ?

चेटी- शक्यं भणितुं शरचापहीनः कामदेव इति।

वासवदत्ता- भवत्वेतावत्।

चेटी- किं नित्मित्तं वारयसि ?

वासवदत्ता- अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम्।

चेटी- तेन हि गुम्फत्वार्य शीघ्रम्।

वासवदत्ता -इयं गुम्फामि। आनय तावत्।

चेटी- गृह्णात्वार्या।

वासवदत्ता -(वर्जयित्वा विलोक्य) इदं तावदौषधं किं नाम?

चेटी- अविधवाकरणं नाम।

वासवदत्ता -(आत्मगतम्) इदं तावदौषधं किं नाम?

चेटी- सपत्नीमर्दनं नाम।

वासवदत्ता- इदं न गुम्फितव्यम्।

चेटी- कस्मात्?

वासवदत्ता- उपरता तस्य भार्या तन्निष्प्रयोजनमिति।

(प्रविश्य अपरा)

चेटी- त्वरतां त्वरतामार्या। एष जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते।

वासवदत्ता- अयि! वदामि गृहाणैतत्।

चेटी- शोभनम्। आर्ये! गच्छामि तावदहम्।

(उभे निष्क्रान्ते)

वासवदत्ता- गतैषा। अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। अहमपि शय्यायां मम दुःखं विनोदयामियदि निद्रां लभे।

(निष्क्रान्ता)

३.६ उक्तसंस्कृतपाठस्य असमीयानुवादः

(ইয়াৰ পিছত চিন্তিতা বাসবদত্তাৰ প্ৰৱেশ)

বাসবদত্তা - বিবাহৰ আনন্দৰে পৰিপূৰ্ণ অন্তেষপুৰৰ চতুঃশালা ত্যাগ কৰি অন্তেষপুৰৰ উদ্যানলৈ আহিছো। ইয়াতে ভাগ্যৰ দ্বাৰা নিষ্পন্ন দুখ কিছু পাতল কৰি লওঁ। (ঘুৰি লৈ) আঃ বৰ বেয়া হ'ল। আৰ্যপুত্ৰও এতিয়া পৰ হৈ গ'ল। বহিয়েই লওঁ। (বহি লৈ) মাইকী চক্ৰবাক পক্ষীজনী ধন্যা। যিয়ে বিচ্ছেদিতা হৈ জীয়াই নাথাকে। কিন্তু মই প্ৰাণ ত্যাগ নকৰো। আৰ্যপুত্ৰক দৰ্শন কৰিম- এই মনোভিলাষেৰে অভাগিনী জীয়াই আছো।

(ইয়াৰ পাছত ফুল লৈ চেটীৰ প্ৰৱেশ)

চেটী - আৰ্যা আৱন্তিকা ক'লৈ গ'ল ?

(ঘূৰি লৈ, দেখি) অঃ, চিন্তাশূন্য হৃদয়েৰে,

কুঁৱলীৰে আচ্ছাদিত চন্দ্ৰকলাৰ দৰে, আভূষণৰহিত ভদ্ৰ বেশ ধাৰণ কৰি প্ৰিয়াংগু লতাৰ তলত শিলাসনত বহি আছে। ওচৰলৈ যাওঁ। (গৈ) আৰ্যা আবন্তিকা। কিমান সময় ধৰি আপোনাক বিচাৰি আছো।



চতুঃশালা - চাৰিও পিনে গৃহৰে আবৃত স্থান।

বাসবদত্তা — কিয়?

চেটী- আমাৰ ৰাণীয়ে কৈছে- আপুনি মহাকুলপ্রসূতা, স্নেহময়ী আৰু নিপুণা- সেয়ে বিবাহৰ মালা আপুনি গাঁথি দিয়ক।

বাসবদত্তা - বাৰু, কাৰ কাৰণে গাঁথিব লাগিব।

চেটী - আমাৰ ৰাজকুমাৰীৰ বাবে।

বাসবদত্তা- (স্বগত) এয়াও ময়েই কৰিব লগা আছিল। নিশ্চিতভাবে দেৱতা অতি নির্দয়।

চেটী - আর্যা, এতিয়া আন একো চিন্তা নকৰিব। জামাতাই মণিভূমিত স্নান কৰিছে। সেয়ে আর্যা সোনকালে গাঁথক।

বাসবদত্তা- (স্বগত) মই আন একো চিন্তা কৰিব পৰা নাই। (প্রকাশ কৰি) সখি❋ জামাতা দেখিলানে?

চেটী - হয়। ৰাজকুমাৰীৰ প্রতি থকা স্নেহ আৰু নিজৰ কৌতূহলৰ বাবে দেখিলো।

বাসবদত্তা- জামাতা কেনেকুৱা?

চেটী- আর্যা❋ ইমানেই কওঁ যে এনেকুৱা আগতে দেখা নাই।

বাসবদত্তা- সখী❋ কোৱাচোন কোৱা, ধুনীয়া হয়নে?

চেটী- ধনু আৰু বাণবিহীন কামদেৱ- এই বুলি ক'ব পাৰি।

বাসবদত্তা- ঠিক আছে হ'ব।

চেটী- কি কাৰণে বাৰণ কৰিছা?

বাসবদত্তা- পৰপুৰুষৰ প্রশংসা শুনাটো উচিত নহয়।

চেটী- তেনেহ'লে আর্যাই সোনকালে গাঁথা।

বাসবদত্তা- এয়া গাঁথি দিওঁ। আনি দিয়াচোন।

চেটী- লোৱা।

বাসবদত্তা- (আঁতৰাই থৈ, লক্ষ্য কৰি) এই ঔষধি বিধৰ নাম কি?

চেটী - অবিধবাকৰণ।

বাসবদত্তা- (স্বগত) মোৰ বাবে আৰু পদ্মাবতীৰ বাবে এয়া বহু গাঁথিব লাগিব। (প্রকাশ কৰি) আৰু এইবিধ ঔষধি কি ?

চেটী- সপত্নীমর্দন।

বাসবদত্তা- এইবিধ গাঁথিব নালাগে।

চেটী- কিয় ?

বাসবদত্তা- তেওঁৰ পত্নীৰ মৃত্যু হৈছে। সেয়ে ইয়াৰ প্রয়োজন নাই।

(আন এগৰাকীৰ প্রবেশ)

চেটী- আর্যা। শীঘ্রে কৰা, শীঘ্রে কৰা। জামাতাক সধবা নাৰীসকলে ভিতৰৰ চতুঃশালালৈ লৈ গৈ আছে।

অবন্তিৰাজ পুত্রী - অবন্তী ৰাজ্যৰ ৰজাৰ কন্যা অর্থাৎ বাসবদত্তা।

মণিভূমি - চাৰিকোণীয়া স্নানাগাৰ যিটো চাৰিওপিনে চাৰিটা স্তম্ভযুক্ত আৰু যাৰ ভূমিভাগ মণিৰে অলংকৃত।

জামাতা - জোঁৱাই (ইয়াত দৰা অর্থত প্রয়োগ হৈছে।)

চেটী - সেবিকা।

আর্যপুত্র - কোনো স্ত্রীয়ে স্বামীৰ প্রতি কৰা সম্বোধন।


বাসৱদত্তা- হেৰা, কৈছো এয়া লোৱা।

চেটী- সুন্দৰ। আর্যা তেন্তে মই যাওঁ।

(দুয়ো ওলাই যায়)

বাসৱদত্তা- এইজনী গ'লগৈ। আঃ! বৰ বেয়া হ'ল। আর্যপুত্র এতিয়া পৰৰ হৈ গ'ল। ময়ো শয্যাত নিজৰ দুখ লাঘৱ কৰোগৈ- যদিহে টোপনি আহে।

(প্রস্থান কৰে)



अग्रगतिनिरिक्षणम्

प्रश्न: ४: वासवदत्तायाः केषां गुणानां कृते विवाहमालागुञ्जनदायित्वं समर्पितं ?

.....

प्रश्न: ५: चेटी राज्ञ उदयनस्य विषये केन प्रकारेण वर्णयति स्म ?

.....

प्रश्न: ६: वासवदत्ता 'सपत्नीमर्दन' नामक औषधं किं निमित्तं गुम्फितुमिच्छति स्म ?

.....

३.७ नाटके द्वितीयाङ्कस्य महत्त्वम्

द्वितीयाङ्कस्य दृश्यराजौ पद्मावत्याः उदयनं प्रति आकर्षणम् गभीररूपेण प्रदर्शितमस्ति। एतस्मिन्परिप्रेक्ष्ये वासवदत्ता अधिकं दुःखिता भवति। तस्याः पति अन्यां स्त्रियं परिणेतुं समुद्यत इति वार्तया सा अतीव मनोकष्टं प्राप्तवती। केवलम् एकया वाचा सा आश्वासिता अभवत्यद् उदयनः स्वयमेव पद्मावतीं विवाहकर्तुं प्रवृत्तो न अभवत्।

मानवस्य मनोभावी: वासवदत्ता-चरित्रेण नाट्यकारेण अत्र अतीव प्रकटरूपेण प्रदर्शिताः। एष एव अङ्कस्य मुख्याकर्षणम्। वासवदत्ताया अन्तर्वेदना तस्याः एकया उक्त्या सहृदयदर्शका अनुभवितुं शक्नुवन्ति, यत्र सा उक्तवती—

''यथायथा त्वरते, तथा तथान्धीकरोति में हृदयम्।।''

एवंरूपेण द्वितीयाङ्कस्य दृश्यराजिः नाटके विशेषमहत्त्वं वहति।

३.८ नाटके तृतीयाङ्कस्य महत्त्वम्

'स्वप्नवासवदत्तम्' इति नाटकस्य तृतीयाङ्के वासवदत्ता स्वामिनः द्वितीयविवाहस्य कारणेन अत्यन्तं खिन्ना दृष्टा। सा स्वयमेव व्यक्तवती यत् स्वामीनं उदयनं पुनः द्रष्टुं तस्याः मनोभिलाष एव तस्याः जीवितस्य कारणं वर्तते।

अस्मिन्नेव अङ्के वासवदत्तायैः स्वामिनः द्वितीयविवाहस्य निमित्ते मालागुम्फनकार्यम्

समर्पितम्। एतत् कार्यम् वासवदत्तायाः कृते अत्यन्तं दुःखजनकम् आसीत्। तथापि, पद्मावतीं प्रति तस्याः सत्यस्नेहम् दृष्ट्वा, सा तत् कार्यम् सम्यक् रुपेण सम्पादयितुं प्रवृत्ता। एवं कार्यम् कुर्वती सा आत्मनः भाग्यमेव दोषयति।

पतिव्रता स्त्री स्वामिनः द्वितीयविवाहस्य निमित्तं मालागुम्फनं कर्तुं यदा प्रवृत्ता, तदा तस्याः अन्तःस्थितदुःखं किं प्रकारं भवति इति वासवदत्तायाः चरित्रेण नाट्यकारभासेन अत्र अतीव रमणीयतया प्रतिपादितम्। अतः द्वितीयाङ्के स्वामिनः द्वितीयविवाहस्य निमित्तं वासवदत्तायाः अन्तःसन्तापः य अभिव्यक्तः, सः तृतीयाङ्के अधिकं दृढतरोऽभवद् इति स्पष्टं दृश्यते।



३.९ अध्यायात् किमवगतम्

अनयोरध्यायोः अध्ययनं कृत्वा भवन्तः – प्रथमे स्वप्नवासवदत्तम् इति नाटकस्य द्वितीय-तृतीयाङ्कद्वयस्य संस्कृतपाठस्य परिचयं प्राप्तवन्तः। तदनन्तरं संस्कृतमूलपाठस्य असमीयाभाषायां अर्थमपि ज्ञातुं समर्थाः अभवन्। अन्ते तयोः अङ्कयोः नाटके विशेषं महत्त्वं यदस्ति तत्सम्बन्धेऽपि अवगताः अभवन्।



३.१० ज्ञानाधिक्यम्

१) आयारः, ए. एस्. पी. (१९४७) भासः, मद्रासः वी. रामस्वामी सन्स्तुलु एण्ड सन्स्।

२) काले, एम्. आर. (१९८८), स्वप्नवासवदत्तम् अव भासः, दिल्लीः मोतिलाल बनारसीदास् पब्लिशर्स प्राइवेट लिमिटेड्।

३) पुचलकार, ए. डी. (१९६८), भासः –ए स्टाडि, दिल्लीः मुन्शिराम मनोहरलाल् ओरिएण्टल् पब्लिशर्स्एण्ड् बुक्सेलर्स्।

४) शर्मा, थानेश्वरः (१९९५), संस्कृतसाहित्यस्य इतिवृत्त, गुवाहटीः चन्द्रप्रकाशः।



३.११ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : कन्दुकम्।

प्रश्नः २ उत्तरम् : उज्जयिन्याः।

प्रश्नः ३ उत्तरम् : उदयनम्।

प्रश्नः ४ उत्तरम् : सा महाकुलप्रसूता, स्नेहमयी, निपुणा च तस्मात्।

प्रश्नः ५ उत्तरम् : धनुषा वाणेन च विना कामदेवः इति।

प्रश्नः ६ उत्तरम् : यतः उदयनस्य प्रथमापत्नी निधनं प्राप्तवती तस्मात्।



३.१२ अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नः (५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: नाटकस्य द्वितीयाङ्कस्य महत्त्वविषये सङ्क्षेपेण लिखयतु।

ख) संक्षिप्तःप्रश्नः (१५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: नाटकस्य तृतीयाङ्कस्य महत्त्वविषये संक्षिप्तविवेचनं प्रददातु।

ग) दीर्घ-प्रश्नः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: स्वप्नवासवदत्तम् इति नाटकस्य द्वितीयाङ्कस्य कथावस्तु स्वकीयभाषयां वर्णयतु।

प्रश्नः २: स्वप्नवासवदत्तं इति नाटकस्य तृतीयाङ्कस्य कथावस्तु विस्तरेण प्रस्तूयतु।

*** ***** ***

अध्यायः ४ : स्वप्नवासवदत्तम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ चतुर्थाङ्कस्य निर्वाचितांशस्य संस्कृतपाठः

४.३.१ प्रवेशकादनन्तरं राज्ञःतथा विदूषकस्य आगमनपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः

४.३.२ राज्ञः तथा विदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः

४.४ उक्तसंस्कृतपाठयोः असमीयानुवादः

४.४.१ प्रवेशकादनन्तरं राज्ञःतथा विदूषकस्य आगमनपर्यन्तम्

४.४.२ राज्ञः तथा विदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तम्

४.५ चतुर्थाङ्कस्य कतिपयश्लोकानां व्याख्याः

४.६ अध्यायात् किमवगतम्

४.७ ज्ञानाधिक्यम्

४.८ अग्रगत्याःनिरूपणम्

४.९ अभ्यासप्रश्नाः

४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- स्वप्नवासवदत्तम् नामकस्य नाटकस्य चतुर्थाङ्के केषांचन दृश्यांशानां मूलसंस्कृतपाठं ज्ञातुं शक्नुवन्ति।
- उक्तसंस्कृतपाठानां असमीयानुवादांश्च स्पष्टं अवगन्तुं शक्नुवन्ति।
- अङ्कस्थितानां श्लोकानां व्याख्यानां उदाहरणानि प्राप्तुं शक्नुवन्ति।

४.२ परिचयः

अग्रेऽस्मिन् अध्याये भासेन कृत 'स्वप्नवासवदत्तम्' नाटकस्य द्वितीयं तृतीयं च अङ्कद्वयं विशोधितम्। तत्र तयोः अङ्कयोः मूलसंस्कृतपाठैः सह असमीयार्थांश्च आत्मसात्कृतानि। तयोः अङ्कयोः विशेषमहत्त्वं च ज्ञातम्। अस्य अध्यायस्य अध्ययनात् भवतः नाटके चतुर्थाङ्कस्य विशेषांशानां मूलसंस्कृतपाठैः सह परिचयम् भविष्यति। तदनन्तरमसमीयार्थानां ज्ञानं च प्राप्तुं शक्नुवन्ति। अस्मिन् अङ्केविद्यमानयोः द्वयोः श्लोकयोः व्याख्यानस्य उदाहरणमपि प्राप्तुं शक्नुवन्ति।

४.५ चतुर्थाङ्कस्य निर्वाचितांशस्य संस्कृतपाठः

४.३.१ प्रवेशकादनन्तरं राज्ञःतथा विदूषकस्य आगमनपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च)

चेटी- किं निमित्तं भर्तृदारिका प्रमदवनमागता ?

पद्मावती - हला! ते तावत् शेफालिकागुल्मकाः प्रेक्षे कुसुमिता वा नवेति।

चेटी- भर्तृदारिके। ते कुसुमिता नाम प्रवलान्तरितैरिव मौक्तिकलम्बकैराचिताः कुसुमैः।

पद्मावती- हला! यद्येवं, किमिदानीं विलम्बसे ?

चेटी- तेन ह्यस्मिन् शिलापट्टके मुहूर्तकमुपविशतु भर्तृदारिका।

पद्मावती - आर्ये। किमत्रोपविशावः ?

वासवदत्ता -एवं भवतु।

(उभे उपविशतः)

चेटी- (तथा कृत्वा) पश्यतु पश्यतु भर्तृदारिका। अर्धमनश्शिलापट्ट ? कैरिव शेफालिकाकुसुमैः पूरितं मेऽञ्जलिम्।

पद्मावती- (दृष्ट्वा) अहो। विचित्रता कुसुमानाम्। पश्यतु पश्यत्वार्या।

वासवदत्ता -अहो दर्शनीयताकुसुमानाम्।

चेटी- भर्तृदारिके। किं भूयोऽवचेष्यामि ?

पद्मावती - हला! मा मा भूयोऽवचित्य।

वासवदत्ता- हला! किं निमित्तं वारयसि ?

पद्मावती- आर्यपुत्र इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम्।

वासवदत्ता- हला! प्रियस्ते भर्ता।

पद्मावती - आर्ये! न जानामि, आर्यपुत्रेण विरहितोत्कण्ठिता भवामि।

वासवदत्ता -(आत्मगतम्) दुष्करं खल्वहं करोमि। इयमपि नामैवं मन्त्रयते।

चेटी- अभिजातं खलु भर्तृदारिकया मन्त्रितं प्रियो मे भर्तेति।

पद्मावती - एकः खलु मे सन्देहः।

वासवदत्ता -किं किम् ?

पद्मावती - यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति।

वासवदत्ता- अतोऽप्यधिकम्।

पद्मावती - कथं त्वं जानासि ?

वासवदत्ता -(आत्मगतम्) हम्, आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः। एवं तावद्

भणिष्यामि। यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति।

पद्मावती- भवितव्यम्।

चेटी- भर्तृदारिके। साधु भर्तारं भण अहमपि वीणा शिक्षिष्य इति।

पद्मावती- उक्तो मयार्यपुत्रः।

वासवदत्ता- ततः किं भणितम्?

पद्मावती- अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः।

वासवदत्ता- ततस्त्वं किमिवतर्कयसि?

पद्मावती- तर्कयाम्यामार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणताया ममाग्रतो न रोदितीति।

वासवदत्ता -(आत्मगतम्) धन्या खल्वस्मि, यद्येवं सत्यं भवेत्।

४.३.२ राज्ञः तथाविदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठः

(उभावुपविशतः।)

राजा- (अवलोक्य।)

पादाक्रान्तानि पुष्पानि मौष्म चेदं शिलातलम्।

नूनं काचिदिहासीना मां दृष्ट्वा सहसा गता।

चेटी- भर्तृदारिके! रुद्धाः खलु स्मो वयम्।

पद्मावती - दिष्ट्योपविष्ट आर्यपुत्रः।

वासवदत्ता -(आत्मगतम्) दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः।

चेटी- भर्तृदारिके! साश्रुपाता खल्वार्याया दृष्टिः।

वासवदत्ता -एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः।

पद्मावती - युज्यते।

विदूषकः - भोः। शून्यं खल्विदं प्रमदवनम् प्रष्टव्यं किञ्चिदस्ति। पृच्छामि भवन्तम्।

राजा- छन्दतः।

विदूषकः- का भवतः प्रिया, तदानीं तत्रभवती वासवदत्ता इदानीं पद्मावती वा ?

राजा - किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति?

पद्मावती - हला! यादृशे सङ्कटे निक्षिप्त आर्यपुत्रः।

वासवदत्ता -(आत्मगतम्) अहं च मन्दभागा।

विदूषकः - स्वैरं स्वैरं भणतु भवान्। एकोपरता, अपरासन्निहिता।

राजा - वयस्य। न खलु ब्रूयाम्। भवांस्तु मुखरः।

पद्मावती - एतावता भणितमार्यपुत्रेण।

विदूषकः - भोः। सत्येन शपामि, कस्यापि नाख्यास्यामि। एषा सन्दंष्टा मे जिह्वा।

राजा - নোৎসহে সখে। বক্তুম্।

পদ্মাবতী - অহো অস্য পুরোভাগিতা। এতাবতা হৃদয়ং ন জানাতি।

বিদূষকঃ- কিং ন ভণতি মম ? অনাখ্যায়াস্মাচ্ছিলাপট্টাকান্ন শক্যমেকপদমপি গন্তুম্। এষ রুদ্ধোঽত্রভবান্।

রাজা- কিং বলাৎকারেণ ?

বিদূষকঃ - আম ৷বলাৎকারেণ।

রাজা - তেন হি পশ্যামস্তাবৎ।

বিদূষকঃ - প্রসীদতু প্রসীদতু ভবন্। বয়স্যভাবেন শাপিতোঽসি, যদি সত্যং ন ভসি।

রাজা- কা গতিঃ ? শ্রূয়তাম্।

পদ্মাবতী বহুমতা মম যদ্যপি রূপশীলমাধুর্যৈঃ।
বাসবদত্তাবদ্ধং ন তু তাবন্মে মনো হরতি॥ ৪॥

৪.৪ উক্তসংস্কৃতপাঠযোঃ অসমীযানুবাদঃ

৪.৪.১ প্রবেশকাদনন্তরং রাজ্ঞঃ তথা বিদূষকস্য আগমনপর্যন্তম্

(ইয়াৰ পিছত পৰিজনেৰে সৈতে পদ্মাৱতী আৰু আৱন্তিকাৰ বেশ ধাৰণ কৰা বাসবদত্তাই প্ৰবেশ কৰে)

চেটী - (তেনেদৰে কৰি) ৰাজকুমাৰী। চোৱা, অৰ্দ্ধৰ্মনঃ শিলাখণ্ডৰ দৰে শেৱালী ফুলেৰে মোৰ অঞ্জলি ভৰি গৈছে।

পদ্মাৱতী - (চাই লৈ) আঃ ❋ ফুলৰ কি বিচিত্রতা ❋ আৰ্যা, চোৱা ❋ চোৱা ❋

বাসৱদত্তা- আঃ ❋ফুলৰ কি সৌন্দর্য

চেটী - ৰাজকুমাৰী ❋ ফুল আৰু অধিক সংগ্রহ কৰোনে ?

পদ্মাৱতী - সখী আৰু বেছি নিচিঙিবা।

বাসৱদত্তা - সখী ❋ কি কাৰণে বাধা প্রদান কৰিছা ?

পদ্মাৱতী - আৰ্যপুত্র যেতিয়া ইয়ালৈ আহিব আৰু এই সমৃদ্ধ পুষ্পসমূহ দেখিব তেতিয়া মই সন্মানিতা হম।

বাসৱদত্তা - সখী ❋ পতি তোমাৰ প্রিয়নে ?

পদ্মাৱতী - আৰ্যা ❋ নাজানো। (কিন্তু) আৰ্যপুত্র অবিহনে ব্যাকুল হৈ পৰো।

বাসৱদত্তা - (স্বগত) নিশ্চিতভাৱে মই কঠিন কাৰ্য কৰি আছো। এওঁ ও (পদ্মাৱতী) একেদৰেই কৈছে।

চেটী - নিশ্চয়কৈ শালীনতা ৰাখি ৰাজকুমাৰীয়ে কৈছে- 'পতি মোৰ প্রিয়।'

পদ্মাবতী - মোৰ এটাই সন্দেহ আছে।

বাসৱদত্তা - কি ? কি ?



অঞ্জলি - হাতৰ তলুৱাৰ দুই মুৰ লগ লগাই সৃষ্টি কৰা খোল বা গাঁত।



সন্মানিতা হম - পদ্মাৱতীয়ে আশা কৰিছিল যে তেওঁৰ প্রিয় ফুলসমূহ ফুলি থকা দেখিলে ৰজাই তেওঁক অভিনন্দন জনাব।

পদ্মাবতী - যিদৰে আর্যপুত্র মোৰ (প্রিয়), সেইদৰে আর্যা বাসবদত্তাৰো (আছিলনে বাৰু)।

বাসৱদত্তা - তাতকৈও অধিক।

পদ্মাবতী - তুমি কেনেদৰে জানিলা ?

বাসৱদত্তা - (স্বগত) অঃ❋ আর্যপুত্রৰ প্রতি থকা পক্ষপাতিত্বৰ বাবে মই সদাচাৰ অতিক্রম কৰিলো । মই তেন্তে এনেদৰে কওঁ। (প্রকাশ কৰি) যদি স্নেহ কম হ'লহেঁতেন (তেন্তে) তেওঁ আত্মীয়-স্বজনক ত্যাগ নকৰিলেহেঁতেন।

পদ্মাবতী - ঠিক আছে ।

চেটী - ৰাজকুমাৰী❋ পতিক কোৱাগৈ মইও বীণ শিকিম।

পদ্মাবতী - মই আর্য পুত্রক কৈছিলো।

বাসৱদত্তা - তেওঁ তেতিয়া কি ক'লে?

পদ্মাবতী - একো নকৈ দীঘলকৈ উশাহ লৈ মনে মনে ৰ'ল।

বাসৱদত্তা - তাৰ কাৰণ তুমি কি বুলি ভাবিছা?

পদ্মাবতী - ভাবিছো, তেওঁ আর্যা বাসবদত্তাৰ গুণসমূহক স্মৰণ কৰিছিল, (কিন্তু) শালীনতাৰ বাবে মোৰ সন্মুখত কন্দা নাছিল।

বাসৱদত্তা- (স্বগত) যদি এয়া সত্য হয়, মই ধন্য।

পক্ষ পাতিত্ব- ইয়াত বাসবদত্তাৰ তেওঁৰ স্বামীৰ প্রতি থকা অপৰিসীম স্নেহকেই পক্ষপাতিত্ব শব্দই নির্দেশ কৰিছে।

৪.৪.২ राज्ञः तथा विदूषकस्य उपवेशनात् चतुर्थश्लोकपर्यन्तंम्

(দুয়ো বহি লৈ)

ৰজা - (চাই) ফুলসমূহ ভৰিৰ খোজত আক্রান্ত হৈছে আৰু এই শিলাখন গৰম হৈ আছে। নিশ্চয়কৈ কোনোবা স্ত্রী ইয়াত বহি থকা অৱস্থাত মোক দেখাৰ লগে লগে আঁতৰি গৈছে। ☯▤❁

চেটী - ৰাজকুমাৰী। আমি অবৰুদ্ধ হৈ গৈছো।

পদ্মাবতী - ভাগ্যক্রমে আর্যপুত্রই বহি লৈছে।

বাসৱদত্তা - (স্বগত) ভাগ্যক্রমে আর্যপুত্র সুস্থ হৈ আছে।

চেটী - ৰাজ কুমাৰী❋ আর্যাৰ চকুৰ পৰা চকু পানী ওলাই আছে।

বাসৱদত্তা - মধুকৰসমূহৰ ধৃষ্টতাৰ বাবে পতিত হোৱা কাশপুষ্পৰ ৰেণুসমূহৰ দ্বাৰা মোৰ চকু সজল হৈ পৰিছে।

পদ্মাবতী- ঠিক আছে।

বিদূষক - মহাৰাজ❋ এই প্রমদবন শূন্য। মই আপোনাক কিবা সুধিব বিচাৰিছো।

ৰজা - স্বচ্ছন্দে সোধা।

বিদূষক - আপোনাৰ বাবে কোনগৰাকী প্রিয়, তেতিয়াৰ দেবী বাসৱদত্তা অথবা এতিয়াৰ দেবী পদ্মাৱতী?

অৱৰুদ্ধ - ওলাব নোৱৰা হোৱা।

ৰজা - কি তুমি মোক এক ডাঙৰ আৰু মহান সংকটত পেলালা?

পদ্মাবতী - সখী❋ কেনেকুৱা যে সংকটত আর্যপুত্র পৰিল।

বাসৱদত্তা - (স্বগত) আৰু মই অভাগিনী❋

বিদুষক - নিঃসংকোচে কওঁক আপুনি। এগৰাকীৰ মৃত্যু হৈছে আৰু আনগৰাকী ওচৰত নাই।

ৰজা - মিত্র❋ নহয়, নহয়। মই নকওঁ। তুমি গোপন কথা কৈ দিয়া।

পদ্মাবতী - ইয়াৰ দ্বাৰা আর্যপুত্রই কৈয়েই দিলে।

বিদূষক - মহাৰাজ❋ সত্যৰ শপত। কাকোৱেই নকওঁ। এয়া মোৰ জিভা কামুৰি দিলো।

ৰজা - মিত্র❋ ক'বলৈ উৎসাহিত হ'ব পৰা নাই।

পদ্মাবতী - আঃ❋ এওঁৰ আকোৰ গোজালি। ইমানখিনি কোৱাৰ পিছতো সি (তেওঁৰ) হৃদয়ক বুজি পোৱা নাই।

বিদূষক - কি? মোক নকয় ? নক'লে এই শিলাসনৰ পৰা এখোজো লৰচৰ হ'ব নোৱাৰে। এয়া আপুনি অৱৰুদ্ধ হৈ গ'ল।

ৰজা - কি? বলপূর্বক।

বিদূষক - হয়❋ বলপূর্বক।

ৰজা - তেন্তে চাই লওঁ।

বিদূষক - প্রসন্ন হওঁক, প্রসন্ন হওঁক। বন্ধুত্বৰ শপত, যদি সত্য কথাটো নকয়।

ৰজা - উপায় নাই, শুনা,

পদ্মাবতী, যদিও তেওঁৰ সৌন্দর্য, চৰিত্র আৰু মাধুর্যৰ দ্বাৰা মোৰ সন্মানৰ যোগ্যা। তথাপি তেওঁ বাসবদত্তাত নিবদ্ধ মোৰ অন্তৰ জয় কৰিব পৰা নাই। ☯🖱❁◑



ज्ञातव्यम्

संस्कृतनाटके विदूषकस्य चरित्रं अतीव उल्लेखनीयम्। एतत् चरित्रं शृंगाररसे नायकस्य मध्यवर्गीयसहायकेषु प्रमुखम् अस्ति। पुष्पवाचक-वसन्तकालवाचक इत्यादिशब्दैः विदूषकस्य नामकरणं क्रियते। अङ्गीभङ्गीभिः, भूषणवेशैः वचनैः च सः नाटके हास्यरसस्य सृष्टिं करोति। सः कलहप्रियः भोजनप्रियश्च।

अभिज्ञानशाकुन्तल नाटके विदूषकस्य नाम माधव्यः तथा स्वप्नवासवदत्त नाटके विदूषकस्य नाम वसन्तकः। साहित्यदर्पणनामके अलङ्कारशास्त्रे विदूषकस्य लक्षणं एवं दत्तम् -

कुसुमवसन्ताद्यभिधः कर्मवपूर्वेशभाषाद्यैः।
हासकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः।।

४.५ चतुर्थाङ्कस्य कतिपयश्लोकानां व्याख्याः

१. पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्तावद्धं न तु तावन्मे मनो हरति ॥ ५ ॥

महाकविभासकृतस्य स्वप्नवासवदत्तम् नामनाटकस्य चतुर्थे अङ्के पद्यम् इदं वर्तते। अस्मिन् पद्ये प्रतीक्षमानो राजा उदयनः विदूषकेण बारंबारम् अत्याग्रहपूर्वकं पद्मावतीवासवदत्तयोः विषये पृष्टस्य प्रश्नस्य विषये स्वमन्तव्यं प्रकटयन्नाह- पद्मावतीति।

यद्यपि पद्मावती रूपं सौन्दर्यं शीलं सच्चरित्रतां च माधुर्यं मीष्टभाषित्वं च तैः गुणैः मम उदयनस्य बहुमता प्रीतिभाजनभूता अस्ति, तु तथापि वासवदत्ताबद्धं वासवदत्तायाम् अनुरक्तं मे मनः हृदयं न हरति आकर्षति। वासवदत्तानुरक मम मनः नवोढा रूपशीलमाधुर्यसमन्विता अपि पद्मावती न तादृशं स्वायतं करोति। उदयनस्य वासवदन्तानुरक्तं मनः पद्मावत्यां न तथा रसते इति भावः। अत्र आर्या वृतमम

२. इयं नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः।।

पद्यमिदं महाकविभासकृतस्य स्वप्नवासवदत्तम् नाम नाटकस्य चतुर्थे अङ्के वर्तते। वस्तुतः वासवदत्ताविरहशोकं स्मृत्वा राज्ञः उदयनस्य अश्रुपातः सञ्जातः। परं तु स पद्मावतीं स्वाश्रुपातस्य कारणम् अकथयित्वा काशपुष्पलवेन नेत्रपतितेन तस्य अश्रुपातः जात इति कथितवान्। पद्ये अस्मिन् निजकथनस्य औचित्यं प्रकटयन्नाह राजा-इयमिति।

इयं पद्मावती नवोद्वाहा नवपरिणीता, षोडशी नवोढ़ा बाला पद्मावती अश्रुपातस्य सत्यं कारणं श्रुत्वा आकर्ण्य व्यथां व्रजेत् दुःखं प्राप्नुयात्। कामं यथार्थम् इयं पद्मावती धीरस्वभावा धीराः धैर्ययुक्तः प्रकृतिः यस्याः सा, धैर्यशीला, स्वभावेन धीरा न तु चञ्चला इत्यर्थः। किन्तु स्त्रीस्वभावः स्त्रीणां नारीणां स्वभावः प्रकृतिः कातरः अधीरः भवति। प्रायः स्त्रियः स्वभावेन अधीरा सन्ति। अतः पद्मावती अपि स्त्रीत्वात् स्वभावेन अधीरा एव भवेत्। अतः सत्यकारणं न कथयितव्यम्। अत्र राजा विचारयति यत् पद्मावती नवोढ़ा मुग्धा च, यदि सा ज्ञास्यति यदहम् पूर्वपत्नीवियोगेन दुःखमनुभवामि रोदिमि च तदा नूनमेव इयम् अधीरा दुःखिनी च भविष्यति। अतः मिथ्यां कथयता मया उचितमेव कृतम् इति सरलार्थः।



अग्रगत्याः निरीक्षणम्

प्रश्न १: पद्मावती प्रमदवने केन सह प्रवेशं कृतवती ?

.....

प्रश्न २: का पुष्पं संग्रहितुं गता ?

.....

प्रश्न ३: केन कारणेन वासवदत्ता आचारं अतिक्रान्तमिति मन्यते ?

.....

प्रश्न ४: शुद्धं वा अशुद्धं निर्णीयताम्

(क) पद्मावती पुष्पाणां सौन्दर्येण मुग्धा सती चेटिं अधिकं पुष्पं संग्रहितुम् आदिष्टवती।

.....

प्रश्न ५: राजा उदयनः केन सह प्रमदवने प्रवेशं कृतवान् ?

.....

प्रश्न ६: वासवदत्ता केन कारणेन अश्रुजलं निर्गतमिति उक्तवती ?

.....

प्रश्न ७: राजानं प्रति विदूषकेन पृष्टः प्रश्नः क आसीत् ?

.....

प्रश्न ८: राज्ञा येन श्लोकेन विदूषकस्य प्रश्नस्य उत्तरं प्रदत्तं तं श्लोकं लिखतु।

.....



४.६ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

स्वप्नवासवदत्तम् नामकस्य नाटकस्य चतुर्थाङ्के केषांश्चित् दृश्यांशानां मूलसंस्कृतपाठस्य परिचयं प्राप्तवन्तः। उक्तसंस्कृतपाठानां असमीयानुवादं च स्पष्टतया अस्मिन्नेव अध्याये आत्मसात्कर्तुं शक्नुवन्ति। नाटकस्य हास्यरसस्य प्रकाशकस्वरुपस्य विदूषकचरित्रस्य परिचयं अप्यस्मिन्नङ्के प्राप्तवन्तः। तदनन्तरमस्मिन्नेव अङ्के विद्यमानानां श्लोकानां व्याख्यानां उदाहरणमपि प्राप्तम्।



४.७ ज्ञानाधिक्यम्

१) अय्यर, ए (१९९९). स.स. पी. एस. (१९५७), भास, मद्रासः वि.सं. रामास्वामी सस्तुलु एण्ड सन्स।

२) काले, एम. (१९९९). आर.एस. (१९८८), भास, दिल्ली के स्वप्नवासवदत्तमः मटिलाल बनारसीदास पब्लिशर्स प्रा.

३) पुचलकर, ए (१९९९). ष्ठ.स्ष. (१९६८), भास-अ अध्ययन, दिल्लीः मुनसीराम मनोहरलाल प्राच्य प्रकाशक एवं पुस्तक विक्रेता।

४) शर्मा, थानेश्वर (१९९५), संस्कृत साहित्य का इतिहास, गुवाहाटीः चन्द्र प्रकाश।



४.८ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : वासवदत्तया तथा चेट्या सह।

प्रश्नः २ उत्तरम् : चेटी।

प्रश्नः ३ उत्तरम् : स्वामि उदयनं प्रति तस्याः पक्षपातकारणात्।

प्रश्नः ४ उत्तरम् : अशुद्धम्।

प्रश्नः ५ उत्तरम् : विदूषकेण सह।

प्रश्नः ६ उत्तरम् : काशपुष्पस्य रजांसि नेत्रे पतनात्।

प्रश्नः ७ उत्तरम् : वासवदत्तापद्मावत्योः राज्ञःका अधिका प्रिया।

प्रश्नः ८ उत्तरम् : पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।
वासवदत्तावद्धं न तु तावन्मे मनो हरति ॥ ५ ॥



४.९ अभ्यासप्रश्नाः

क) वस्तुधर्मीप्रश्नाः (५० शब्दानां मध्ये उत्तरं लिखतु)

प्रश्नः १: प्रमदवने प्रथमं काः स्त्रियः आगताः ?

प्रश्नः २: राजा-विदूषकयोः आगमनपर्यन्तं तासां स्त्रीणां संवादः स्वभाषायां वर्ण्यताम्

ख) लघु प्रश्नः (१५० शब्दानां मध्ये उत्तरं लिखतु)

प्रश्नः १: विदूषकः राज्ञः समीपात् किं ज्ञातुं इप्सितवान् तथा च राजा कथं तस्य समस्यायाः समाधानं कृतवान् विस्तरेण लिखतु।

ग) रचनात्मकप्रश्नाः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: सम्पूर्णचतुर्थाङ्कस्य सारांशः लिखतु।

प्रश्नः २: नाटकस्य तृतीयाङ्कस्य महत्वविषये संक्षेपेण लिखतु।

*** ***** ***

अध्यायः ५ : स्वप्नवासवदत्तम् (पञ्चमाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

५.१ उद्देश्यम्

५.२ परिचयः

५.३ पञ्चमाङ्कस्य निर्वाचितांशस्य मूलसंस्कृतपाठः

- ५.३.१ प्रवेशकानन्तरं समूद्रगृहात् विदूषकस्य निर्गमनपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः
- ५.३.२ वासवदत्ताचेट्योः प्रवेशात्काञ्चुकीयस्य प्रवेशपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

५.४ संस्कृतपाठस्य असमीयानुवादः

- ५.४.१ प्रवेशकस्य अनन्तरं समुद्रगृहात् विदूषकस्य निर्गमपर्यन्तं
- ५.४.२ वासवदत्तायाः चेट्याश्च प्रवेशात् काञ्चुकीयस्य प्रवेशपूर्वंपर्यन्तं

५.५ स्वप्न-दृश्यस्य वर्णनम्

५.६ नाटके पञ्चमाङ्कस्य महत्त्वम्

५.७ कतिपयविशेष-श्लोकानां व्याख्यानम्

५.८ अध्यायात् किमवगतम्

५.९ ज्ञानाधिक्यम्

५.१० अग्रगत्याःनिरूपणम्

५.११ अभ्यासप्रश्नाः

५.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् -

- 'स्वप्नवासवदत्तम्' नाटकस्य पञ्चमाङ्कस्य मुख्य-दृश्यानांसंस्कृत-पाठज्ञानं प्राप्नोति।
- उक्तसंस्कृतपाठस्य असमीयार्थस्य ज्ञानं च प्रातुं शक्नोति।
- नाटकस्य नामकरणेविशेषमहत्त्वं लभ्यमानस्य स्वप्नदृश्यस्य सम्यग् धारणा अपि लब्धुं शक्नोति।

५.२ परिचयः

पूर्वेऽध्याये भवान् भासेन विरचितस्य नाटकस्य 'स्वप्नवासवदत्तम्' इत्यस्य चतुर्थाङ्कस्य विषये सम्यक्ज्ञानं प्राप्तवान्। अङ्कस्य केषाञ्चित् दृश्यांशानां मूलसंस्कृतपाठं तथैव तेषां असमीयार्थानां च ज्ञानं प्राप्तवान्। इतोऽपि श्लोकानां व्याख्यानकौशलमपिप्राप्तवान्। अस्य अध्यायस्य अध्ययनात् भवन्तः पञ्चमाङ्के विद्यमानाः दृश्यभागाः मूलसंस्कृतपाठेन सह तेषां अर्थान् अपि ज्ञातुं शक्नुवन्ति। समग्रे नाटके विशेषमहत्त्वं लभ्यमानस्य स्वप्नदृश्यस्य सम्यग् धारणा अस्मिन् अङ्के लभ्यते।

४.३ पञ्चमाङ्कस्य निर्वाचितांशस्य मूलसंस्कृतपाठः

अधुना भवन्तः स्वप्नवासवदत्तम् इति नाटकस्य पञ्चमाङ्कस्य प्रवेशकस्य परं समुद्रगृहात् विदूषकस्य निर्गमनपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठं पठितुं शक्नुवन्ति। तदुपरि वासवदत्ता चेट्याः च प्रवेशात् काञ्चुकीयस्यप्रवेशपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठम् अपि पठितुं शक्नुवन्ति।

५.३.१ प्रवेशकानन्तरं समूद्रगृहात् विदूषकस्य निर्गमनपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

(ततः प्रविशति राजा)

राजा–

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन इताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ १ ॥

(प्रविश्य)

विदूषकः - त्वरतां त्वरतां तावद् भवान्।

राजा– किमर्थम्?

विदूषकः - तत्रभवती पद्मावती शीर्षवेदनया दुःखिता।

राजा– कैवमाह?

विदूषकः - पद्मिनिकया कथितम्।

राजा– भोः कष्टम्।

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि ॥ २ ॥
अथ कस्मिन् प्रदेशे वर्तते पद्मावती?

विदूषकः - समुद्रगृहके किल शय्यास्तीर्णा।

राजा– तेन हि तस्य मार्गमादेशय।

विदूषकः- एत्वेतु भवान्।

(उभौ परिक्रामतः)

विदूषकः- इदं समुद्रगृहकम्। प्रविशतु भवान्।

राजा– पूर्वं प्रविश।

विदूषकः - भोः। तथा। (प्रविश्य) अविहा तिष्ठतु तिष्ठतु तावद् भवान्।

राजा - किमर्थम् ?

विदूषकः - एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्तमानोऽयं काकोदरः।

राजा- (प्रविश्यावलोक्य सस्मितम्) अहो सर्पव्यक्तिवैधेयस्य।

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख। सर्पम्।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित्त् करोति भुजगस्य विचेष्टितानि ॥ ३ ॥

विदूषकः- (निरूप्य) सुष्ठु भवान् भणति। न खल्वयं तातोजकः। तत्रभवती पद्मावती हागत्य निर्गता भवेत्। (प्रविश्यावलोक्य)

राजा - वयस्य! अनागतया भवितव्यम्।

विदूषकः- कथं भवान् जानाति ?

राजा- किमत्र ज्ञेयम्। पश्य,

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः।
रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता।
प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥ ४ ॥

विदूषकः- तेन ह्यस्यां शय्यायां मुहूर्तकमुपविश्य तत्रभवतीं प्रतिपालयतु भवान्।

राजा- वाढम्। (उपविंश्य) वयस्य! निद्रा मां बाधते। कथ्यतां काचित् कथा।

विदूषकः - अहं कथयिष्यामि। हौँ इति करोत्वत्रभवान्।

राजा - बाढम्।

विदूषकः- अस्ति नगर्युज्जयिनी नाम। तत्राधिकरमणीयान्युदकस्नानानि वर्तन्ते किल।

राजा- कथमुज्जयिनी नाम ?

विदूषकः - यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि।

राजा- वयस्य। न खलु नाभिप्रेतैषा कथा। किन्तु,

स्मराम्यवन्त्याधिपतेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः।
वाष्पं प्रवृत्तं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥ ५ ॥

अपि च

बहुशोऽप्युपदेशेषु यया मामीक्षमाणया।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥ ६ ॥

विदूषकः- भवतु, अन्यां कथयिष्यामि। अस्ति नगरं ब्रह्मदत्तं नाम। तत्र किल राजा काम्पिल्यो नाम।

राजा- किमिति किमिति ?

विदूषकः- (पुनस्तदेव पठति)

राजा- मूर्ख। राजा ब्रह्मदत्तः, नगर काम्पिल्यमित्यभिधीयताम्।

विदूषकः - किं राजा ब्रह्मदत्तः नगरं काम्पिल्यम् ?

राजा - एवमेतत्।

विदूषकः- तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि। राजा ब्रह्मदत्तः, नगरं काम्पिल्यम्। (इति बहुशस्तदेव पठित्वा)। इदानीं शृणोतु भवान्। अयि। सुप्तोऽत्रभवान्। अतिशीतलेयं वेला। आत्मनं प्रावारकं गृहीत्वागमिष्यामि। (निष्क्रान्तः)



ज्ञातव्यम्

जातककथासु प्रायः वाराणस्यां राज्ञः ब्रह्मदत्तस्य नामोल्लेखः दृश्यते। किन्तु स्वप्नवासवदत्तं नामके नाटके पञ्चमे अङ्के यः ब्रह्मदत्तः उल्लिखितः, सः जातककथायां वर्णितेन ब्रह्मदत्तेन निर्दिष्टः न। यतः असौ राजा कांपिल्यनगरसम्बद्धरूपेण दर्शितः, अतः स पाञ्चालवंशीयः इति पण्डितैः अभिहितम्। कांपिल्यं पाञ्चालदेशस्य राजधानी आसीत्।

५.३.२ वासवदत्ताचेट्याः प्रवेशात्काञ्चुकीयस्य प्रवेशपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण, चेटी च)

चेटी- एत्वेत्वार्या। दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता।

वासवदत्ता- हा धिक्। कुत शयनीयं रचितं पद्मावत्याः ?

चेटी - समुद्रगृहके किल शय्यास्तीर्णा।

वासवदत्ता- तेन ह्यग्रतो याहि।

(उभे परिक्रामतः)

चेटी - इदं समुद्रगृहकम्। प्रविशत्वार्या। यावदहमपि शीर्षानुलेपनं त्वरयामि। (निष्क्रान्ता)

वासवदत्ता- अहो अकरुणाः खल्वीश्वरा मे। विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रमस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता। यावत् प्रविशामि। (प्रविश्यावलोक्य) अहो परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावत्यवसुप्ता। यावदुपविशामि। अथवान्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति। तदस्यां शय्यायामुपविशामि। (उपविश्य) किं नु खल्वेतया सहोपविशन्त्या अद्य

प्रह्लादितमेव मे हृदयम्। दिष्ट्याविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवैकदेशसंविभागतया शयनीयस्य सूचयति मामालिङ्गेति, यावच्छयिष्ये।

राजा- (स्वप्नायते) हा वासवदत्ते!

वासवदत्ता- (सहसोत्थाय) हम् आर्यपुत्रः। न खलु पद्मावती। किं नु खलु दृष्टास्मि? महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः।

राजा- हा अवन्तिराजपुत्रि !

वासवदत्ता- दिष्टया स्वप्नायते खल्वार्यपुत्रः नात्र कश्चिज्जनः। यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि।

राजा- हा प्रिये। हा प्रियशिष्ये। देहि मे प्रतिवचनम्।

वासवदत्ता- आलपामि भर्तः। आलपामि।

राजा- किं कुपितासि?

वासवदत्ता -नहि नहि, दुःखितास्मि।

राजा- यद्यकुपिता, किमर्थं नालङकृतासि?

वासवदत्ता- इतः परं किम्?

राजा- कि विरचिकां स्मरसि।

वासवदत्ता- (सरोषम्) आ अपेहि, इहापि विरचिका।

राजा- तेन हि विरचिकार्थं भवतीं प्रसादयामि। (हस्तौ प्रसारयति)

वासवदत्ता- चिरं स्थितास्मि। कोऽपि सां पश्येत्। तद् गमिष्यामि। अथवा, शय्याप्रलम्बितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि। (तथा कृत्वा निष्क्रान्ता)

राजा- (सहसोत्थाय) वासवदत्ते! तिष्ठ तिष्ठ। हा धिक्।
निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतर्थोऽयं मनोरथः ॥ ७॥

(प्रविश्य)

विदूषकः - अयि प्रतिबुद्धोऽत्रभवान्।

राजा- वयस्य! प्रियमावेदये।धरते खलु वासवदत्ता।

विदूषकः- अविहा वासवदत्ता। कुत्र वासवदत्ता? चिरात् खलूपरता वासवदत्ता।

राजा - वयस्य! मा मैवं,
शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता॥ ८॥

विदूषकः- अविहा असम्थावनीयमेतद्। आः। उदक स्नानसंकीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।

राजा- एवं मया स्वप्नो दृष्टः।
यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम् ॥ ९॥

विदूषकः- भोः वयस्य। एतस्मिन् नगरेऽवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति। सा त्वया दृष्टा भवेत्।

राजा- नन,
स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम्।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ १०॥
अपि च वयस्य! पश्य पश्य,
योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति॥ ११॥

५.४ संस्कृत पाठस्य असमीयनुवादः

अधुना भवन्तः स्वप्नवासवदत्तम् इति नाटकस्य पञ्चमाङ्कस्य प्रवेशकात् परं समुद्रगृहात् विदूषकस्य निर्गमनपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठस्य असमीया-अनुवादाः पठितुं शक्नुवन्ति। अपि च वासवदत्तायाः चेट्याः च प्रवेशात् काञ्चुकीयस्य प्रवेशपूर्वपर्यन्तं दृश्यभागस्य मूलसंस्कृतपाठस्य असमीया-अनुवादमपि पठितुं शक्नुवन्ति।

५.४.१ प्रवेशकस्य अनन्तरं समुद्रगृहात् विदूषकस्य निर्गमपर्यन्तं

(তাৰ পিছত ৰজাৰ প্ৰৱেশ)

শিৰোবেদনা- মুৰৰ বিষ

ৰজা - কালক্ৰমত পুনৰ পত্নীৰ ভাৰ মোৰ ওপৰত আহি পৰিল। কিন্তু লাৰাণক (গাঁৰত) অগ্নিৰ দ্বাৰা দগ্ধ হোৱা শৰীৰৰ অবন্তীৰাজৰ সেই শ্লাঘনীয়া কন্যাক মই তুষাৰৰ দ্বাৰা বিনষ্ট হোৱা কমলিনীৰ দৰে স্মৰণ কৰিছো।। 🗁 ।।

বিদূষক- মহাশয়। শীঘ্ৰে আহক, শীঘ্ৰে আহক।

ৰজা- কিহৰ বাবে?

বিদূষক- আৰ্যা পদ্মাৱতী শিৰোবেদনাত কাতৰা হৈ আছে।

পূৰ্বৰ দুখ - পত্নী বাসবদত্তাৰ মৃত্যু হোৱা বুলি জানি মনত পোৱা সন্তাপ।

ৰজা- এনেদৰে কোনে কৈছে?

বিদূষক- পদ্মিনিকাই কৈছে।

ৰজা - হাঁয়, কি কষ্ট।
সৌন্দৰ্যসম্পন্না, গুণৱতী প্ৰিয়াক লাভ কৰি পূৰ্বৰ দুখত পীড়িত মোৰ শোক আজি কিছু লাঘৱ হৈছিল, (কিন্তু) এবাৰ দুখ অনুভৱ কৰা মই পদ্মাৱতীকো তেনে বুলিয়েই (অৰ্থাৎ বাসবদত্তাৰ দৰে দুখৰ কাৰণ বুলি) ধাৰণা কৰিছো।। 🗎 ।।

থিক আছে, পদ্মাবতী এতিয়া ক'ত আছে?

বিদূষক- সমুদ্র গৃহত তেওঁৰ শয্যা সাজু কৰা হৈছে।

ৰজা - তেন্তে, মোক সেই পথ প্রদর্শন কৰা।

বিদূষক- আহক, আহক মহাৰাজ।

(দুয়োয়ে আগবাঢ়ে)

বিদূষক- এইটো সমুদ্রগৃহ। প্রৱেশ কৰক।

ৰজা - তুমি প্রথমতে প্রৱেশ কৰা।

বিদূষক - থিক আছে। সেয়ে হওঁক। (প্রৱেশ কৰি) হে প্রভু ❋ ৰ'ব, ৰ'ব মহাৰাজ।

ৰজা - কিহৰ বাবে?

বিদূষক - চাকিৰ পোহৰত সাপ এটা মাটিত লুটি বাগৰ খাই থকা দেখা গৈছে।

ৰজা - (প্রৱেশ কৰি আৰু নিৰীক্ষণ পূর্বক হাঁহি হাঁহি)

আঃ। মূর্খৰ সর্পজ্ঞান।

মূর্খ ❋ মুখ্য তোৰণৰ সৰল দীর্ঘ মালাধাৰি ভূতলত বিচ্যুত হৈ থকা বাবে তুমি তাক সর্পৰূপে ধাৰণা কৰিছা । মৃদু বতাহৰ দ্বাৰা লৰচৰ হোৱা বাবে ৰাতি ইয়াৰ সর্পৰ দৰে কিছু চঞ্চলতা দেখা গৈছে।।

বিদূষক- (নিৰূপণ কৰি) আপুনি থিকেই কৈছে। এইটো সাপ নহয়। (প্রৱেশ কৰি আৰু চাই) দেৱী পদ্মাৱতী ইয়ালৈ আহি নিশ্চয় পুনৰ গুছি গৈছে।

ৰজা- তেওঁ ইয়ালৈ নিশ্চয় অহাই নাছিল।

বিদূষক- আপুনি কেনেদৰে জানিলে?

ৰজা- ইয়াত আকৌ জানিবৰ কি আছে? চোৱা।

শয্যা সমানকৈ পাৰি থোৱা আছে, ই অবনত হোৱা নাই, ইয়াৰ আৱৰণীখনো কোঁচ খোৱা নাই, তেওঁৰ শিৰোবেদনাৰ ঔষধৰ বাবে পৰিষ্কাৰ গাৰুটোও মলিন হৈ পৰা নাই। ৰোগৰ বাবে চকুৰ আনন্দ সম্পাদনকাৰী কোনো শোভাৰ ব্যৱস্থা কৰা হোৱা নাই। আকৌ ৰোগগ্রস্ততাৰ বাবে শয্যালৈ যোৱা কোনো লোকে সোনকালে নিজে শয্যা পৰিত্যাগ নকৰে।।

বিদূষক- তেনেহ'লে আপুনি কিছু সময় এই শয্যাত বহি লৈ তেওঁৰ বাবে অপেক্ষা কৰক।

ৰজা- খুব ভাল কথা। (বহি লৈ) বয়স্য ❋ মোৰ টোপনি ধৰিছে। এটা গল্প কোৱা।

বিদূষক- মই কৈছো। আপুনি হুঁ বুলি কৈ শুনি যাব।

ৰজা- ভাল বাৰু।

বিদূষক- উজ্জয়িনী নামেৰে এখন নগৰী আছে। সেই স্থানৰ উদকস্নানসমূহ অতি আনন্দদায়ক।

বয়স্য - বন্ধু

উদকস্নান— নদী সৰোবৰ আদিৰ উদক অর্থাত পানীত স্নান কৰা কার্য

ৰজা - উজ্জয়িনীৰ কথা কিয়?

বিদূষক- যদি এইটো আপুনি ভাল নাপায় তেন্তে আন এটা গল্প কওঁ।

ৰজা- বয়স্য❋ এনেকুৱা নহয় যে মই এইটো ভাল নাপাওঁ। কিন্তু মই অবন্তী ৰাজপুত্রীক স্মৰণ কৰিছো যি গৰাকীয়ে আমাৰ প্রস্থানৰ সময়ত আত্মীয়স্বজনক স্মৰণ কৰি নয়ন কোণ লগ্ন চকুৰ পৰা নির্গত অশ্রুজল স্নেহবশতঃ মোৰ বক্ষত পাতিত কৰিছিল।। ।।

আকৌ,

বীণা শিক্ষাৰ সময়ত বহুবাৰ
মোৰ ফালে একান্তভাৱে চাই থকা বাবে তেওঁৰ হাতৰ পৰা বীণা বজোৱা কোণ পৰি যোৱা বাবে শূন্য হাতেৰে বজাইছিল।। ।।

বিদূষক- থিক আছে, থাকক। অন্য এটা কওঁ। ব্রহ্মদত্ত নামেৰে এখন নগৰ আছে। তাৰ ৰজাৰ নাম কাম্পিল্য।

ৰজা - কি, কি?

বিদূষক - (পুনৰবাৰ একেদৰেই উচ্চাৰণ কৰিলে)।


ৰজা — মূর্খ। ৰজা ব্রহ্মদত্ত, নগৰ কাম্পিল্য এনেদৰে কোৱা।

বিদূষক — কি? ৰজা ব্রহ্মদত্ত, নগৰ কাম্পিল্য?

ৰজা — হয়।

বিদূষক - তেনেহ'লে আপুনি কিছু সময় অপেক্ষা কৰক। মই এইটো মুখস্থ কৰি লওঁ। ৰজা ব্রহ্মদত্ত, নগৰ কাম্পিল্য। (বহুবাৰ সেইধৰণে আওৰাই) এইবাৰ আপুনি শুনক। অঃ, আপুনি দেখোন টোপনি গ'ল।

এই সময়খিনি অতি ঠাণ্ডা। মই মোৰ গাৰ বস্ত্রখন লৈ আহো। (ওলাই যায়)



अग्रगतिनिरीक्षणम्

प्रश्न १: शिरोवेदनायाम् पीडितायाः पद्मावत्याः शय्या कुत्र सज्जीकृता आसीत्?

.....

प्रश्न २: वासवदत्तां उदयनः कां शिक्षां प्रदत्तवान्?

.....

प्रश्न ३: राज्ञा केन सह समुद्रगृहं प्रविष्टम्?

.....

प्रश्न ४: शुद्धं वा अशुद्धं निर्णीयताम् -

(क) समुद्रगृहे प्रविश्य राजा पद्मावतीं शय्यायां शयानां दृष्टवान्।

.....

৫.৪.২ বাসবদত্তায়াঃ চেট্যাশ্চ প্রবেশাত্ কাঞ্চুকীয়স্য প্রবেশপূর্বপর্যন্তং

(তাৰ পিছত আবন্তিকা বেশধাৰিনী বাসবদত্তা আৰু চেটীৰ প্ৰবেশ)

চেটী- আহক, আহক আর্যা। ভত্তৃদাৰিকা শিৰোবেদনাত অতিশয় কাতৰা।

বাসৱদত্তা- হায়❋ পদ্মাবতীৰ শয্যা ক'ত সজ্জিত হৈছে ?

চেটী- তেওঁৰ শয্যা সমুদ্রগৃহত সজ্জিত হৈছে।

বাসৱদত্তা- তেনেহ'লে পথৰ নির্দেশ কৰা।

(উভয়ে আগবাঢ়ে)

চেটী- এয়া সমুদ্র গৃহ। আর্যা প্রবেশ কৰক। মই ইতিমধ্যে মস্তকত তৎক্ষণাৎ সনা প্রলেপ লৈ আহোঁ।

(ওলাই যায়)

বাসৱদত্তা- হাঁয়❋ দেৱতাসকল সঁচাকৈয়ে মোৰ বাবে নির্দয়। বিৰহ বিধূৰ আর্যপুত্রৰ বিশ্রামস্থল এই পদ্মাবতীও অসুস্থ হৈ পৰিছে। যি হওঁক। মই প্রৱেশ কৰো। (প্রৱেশ কৰি চাই) সেৱকসকলৰ কি অসাৱধানতা❋ অসুস্থা পদ্মাৱতীৰ সহায় স্বৰূপে মাত্র এটি চাকি ৰাখি সকলোৱে প্রস্থান কৰিছে। এয়া পদ্মাবতী নিদ্রামগ্না। ইয়াতেই বহোঁ। অন্য আসনত বহিলে (পদ্মাবতীৰ প্রতি মোৰ) স্নেহ কমকৈ প্রকাশ পাব, গতিকে এই শয্যাতে মই বহোঁ। (বহিলৈ) কিন্তু কিয় জানো, তেওঁৰ কাষত বহাৰ লগে লগে মোৰ অন্তৰখন আনন্দিত হৈ পৰিছে। সৌভাগ্যক্রমে তেওঁৰ নিঃশ্বাস সহজ আৰু আৱামপূর্ণ হৈ আছে। নিশ্চিতভাৱে তেওঁৰ ৰোগ আঁতৰি গৈছে। অথবা শয্যাৰ এফালে শয়ন কৰি 'মোক আলিঙ্গন কৰা'- এই কথাকে নিশ্চয় সূচাইছে। থিক আছে। শয়ন কৰো। (শয়নৰ অভিনয় কৰে)

ৰজা - (স্বপ্ন দেখি) হা বাসবদত্তা।

বাসৱদত্তা- (তৎক্ষণাৎ উঠি)- এয়া কি, আর্যপুত্র❋ পদ্মাৱতী নহয়। মোক (এওঁ) দেখিলে নেকি? সেয়ে হ'লে আর্য যৌগন্ধৰায়ণৰ মহান প্রতিজ্ঞাভাৰ মোক দর্শন কৰাৰ লগে লগে নিষ্ফল হৈ গ'ল।

ৰজা — হা❋অৱন্তিৰাজপুত্রী❋

বাসৱদত্তা- ভাগ্যক্রমে আর্যপুত্রই স্বপ্ন দেখিছে। ইয়াত আন কোনো নাই। এখন্তেক থাকি চকু আৰু হৃদয়ক সন্তুষ্টি প্রদান কৰো।

ৰজা- হা প্রিয়ে। হা প্রিয়শিষ্যে❋ মোৰ কথাৰ উত্তৰ দিয়া।

বাসৱদত্তা - কৈছো, প্রভু❋ কৈছো।

ৰজা - তুমি খং কৰিছা নেকি ?

বাসৱদত্তা- নহয়, নহয়❋ দুঃখিতাহে মই।

ভত্তৃদাৰিকা ঃ ৰাজ কুমাৰীক কৰা সম্বোধন।

ৰজা - যদি খং কৰা নাই তেন্তে অলঙ্কাৰ কিয় পৰিধান কৰা নাই?

বাসৱদত্তা- ইয়াতকৈ শ্রেয় (অভীষ্ট) আৰু কি (হ'ব পাৰে)।

ৰজা - তুমি কি বিৰচিকাক স্মৰণ কৰিছা❋

বাসৱদত্তা- (ক্রোধ পূর্বক) আঃ❋ ইয়াতো বিৰচিকা❋

ৰজা - তেনেহ'লে বিৰচিকাৰ বাবে তোমাক প্রসন্ন কৰোচোন (হাত মেলি দিলে)।

বাসৱদত্তা- মই বহু সময় থাকিলো। কোনোবাই মোক দেখিব পাৰে। সেয়ে মই যাওঁ। আর্যপুত্রৰ শয্যাৰ পৰা ওলমি থকা হাতখন শয্যাত ৰাখি থৈ যাওঁ। (তেনেদৰে কৰি ওলাই যায়)।

ৰজা - (তৎক্ষণাৎ উঠি) বাসবদত্তা ৰবা, ৰবা। হায়❋

তৎক্ষণাৎ ওলাই যাওঁতে মই দ্বাৰকাষ্ঠত আহত হ'লো। সেয়ে মোৰ মনোবাঞ্ছা সত্য হয় নে নহয় স্পষ্টকৈ বুজিব নোৱাৰিলো।। ⌨①①

(প্রবেশ কৰি)

বিদূষক - এয়া মহাৰাজে সাৰ পাই উঠিছে।

ৰজা — বয়স্য❋ তোমাক এটি প্রিয় সংবাদ দিওঁ, বাসবদত্তা জীয়াই আছে।

বিদূষক- হা বাসবদত্তা। ক'ত বাসবদত্তা❋ তেওঁৰ বহুকাল পূর্বেই মৃত্যু হৈছে।

ৰজা - সেইটো নহয়।

শয্যাত শুই থকা মোক জগাই তেওঁ গুছি গৈছে। বাসবদত্তা দগ্ধা হৈছে- এই কথা কোৱা ৰুমন্থনৰ দ্বাৰা মই পূর্বতেইপ্রতাৰিত হৈছো।। ☝①①

বিদূষক - অঃ। এয়া সম্ভৱ নহয়। আঃ। মোৰ পৰা (উজ্জয়িনীৰ) উদকস্নানৰ কথা শুনি আপুনি হয়তো সেয়ে মহাৰাণীক চিন্তা কৰা বাবে তেওঁক স্বপ্নত দেখা পাইছে।

ৰজা - তেন্তে কি❋ স্বপ্নই দেখিছিলো❋

যদি এয়া স্বপ্ন তেন্তে জাগৰিত নোহোৱাটোৱে ভাল আৰু এয়া যদি ভ্রম তেন্তে সেই ভ্রম চিৰকালৰ বাবেই যেন থাকে।। ৺①①


বিদূষক- বয়স্য❋ এই নগৰত অৱন্তি সুন্দৰী নামেৰে এক যক্ষিণী বাস কৰে। আপুনি হয়তো সেইজনীক দেখিছিল।

ৰজা- নহয়, নহয়।

স্বপ্নৰ শেষত যেতিয়া মই সাৰ পাই উঠিছিলো, তেতিয়া চৰিত্রৰক্ষণত তৎপৰ তেওঁৰ কাজলবিহীন নেত্রৰ দ্বাৰা ভূষিত আৰু দীর্ঘ কেশযুক্ত মুখখন দেখিবলৈপাইছিলো।। 🗁①①

পুনৰ, বয়স্য❋ চোৱা, চোৱা-

সন্ত্রস্তা দেৱীয়ে মোৰ যে বাহু নিপীড়ন কৰিছিল, সেয়া স্বপ্নত স্পর্শ লাভ কৰিলেও (এতিয়াও) ৰোমাঞ্চ পৰিত্যাগ কৰা নাই। 🗁🗁①①



अग्रगति निरीक्षणम्

प्रश्न ४: वासवदत्ता समुद्रगृहं कस्मात् कारणात् प्रविष्टवती ?

.....

प्रश्न ५: शुद्धं वा अशुद्धं निर्णीयताम्-

(क) पद्मावत्याः स्थाने राज्ञः उपस्थितिं ज्ञात्वा वासवदत्ता समुद्रगृहात् शीघ्रं निर्गता।

.....

(ख) वासवदत्ताम् राजा उदयनः दृष्टवान् इति वार्तायां विदूषकः विश्वसितवान्।

.....

५.५ स्वप्न-दृश्यस्य वर्णनम्

स्वप्नवासवदत्तनाटकस्य पञ्चमे अङ्के स्वप्नदृश्यस्य एकं सुन्दरवर्णनं दृश्यते। एतद् दृश्यं सम्पूर्णनाटके विशेषं महत्वं वहति, यतः अस्य स्वप्नस्य घटनैव नाटकस्य नामकरणस्य आधारः अस्ति।

पञ्चमे अङ्के राजा उदयनः विदूषकस्य मुखात् समाचारं प्राप्नोति यत् पद्मावती शिरोपवेदनया आक्रान्ता अस्ति तथा च समुद्रगृहे तस्याः शय्या सज्जीक्रिताऽस्ति। ततो राजा विदूषकेन सह समुद्रगृहं प्रति गतवान्।

समुद्रगृहं प्राप्य ताभ्यां ज्ञातं यत् पद्मावती तत्र न आगता। तदा राजा विदूषकस्य वचनेन तस्यां शय्यायां उपविष्टवान् तथा च पद्मावत्याः प्रतीक्षां कर्तुं निश्चितवान्। तस्मिन् एव शय्यायां तेन निद्रावस्थं प्राप्नोत्। विदूषकः अपि शीतं अनुभव्य प्रावरणं आनयितुं बहिः निर्गतः।

अत्रान्यतः पद्मावत्याः व्याधिपीडितायाः कथां श्रुत्वा वासवदत्ता अपि समुद्रगृहं प्रति तस्याः समाचारं ज्ञातुं प्राप्ता। तस्मिन् काले केवलं एकः दीपः प्रज्वलितः आसीत्, अतः अति मन्दप्रकाशः आसीत्। अतः वासवदत्तया शय्यायां सुप्तः राजा न ज्ञातः, साऽपि पद्मावतीति अमन्यत। स्नेहावेशेन सा पद्मावतीति मन्वाना राज्ञः पार्श्वे शयनं कृतवती।

राज्ञा तस्मिन् समये स्वप्ने 'हा वासवदत्ते' इति उक्तम्, तदा वासवदत्ता राजा इति ज्ञातवती। परं तेन स्वप्ने एव तस्याः नामोच्चारणं कृतम् इति बुबोध। ततः सन्तोषेण केचन क्षणाः तत्र स्थित्वा स्वप्नान्धेन राज्ञा सह संवादमपि कृतवती।

किञ्चित् क्षणानन्तरं वासवदत्ता शय्यायाः पार्श्वे अवलम्बमानं राज्ञः करं पुनः शय्यायां स्थापयित्वा तत् स्थानं परित्यक्तवती। तदा राजा स्वप्नात् प्रबुद्धः सन् वासवदत्तां पुनरागन्तुं आह्वयितुमुत्थितवान्। परं अन्धकारवशात् बहिर्गच्छन्ती सा स्त्रीः साक्षात् वासवदत्ता वा न वा इति निश्चेतुं न शक्तवान्।

५.६ नाटके पञ्चमाङ्कस्य महत्त्वम्

समग्रे 'स्वप्नवासवदत्तम्' इति नाटके पञ्चमाङ्कः विशेष भूमिकां वहति। अस्मिन्नेव अङ्के एकस्य स्वप्नदृश्यस्य प्रस्तुतिः कृता अस्ति, यस्य आधारेणैव नाटकस्य नामकरणं सम्पन्नम्। तस्मिन्नेव स्वप्नदृश्ये नायकं नायिकया सह एकत्र दर्शितः। किन्तु कथायाः मुख्योद्देश्यस्य साफल्यचिकीर्षया तौ पुनः पृथक्कृतौ। एतत् सम्पूर्णं दृश्यं नाटकस्य अत्यन्तं आकर्षकरूपेण प्रस्तुतम्, यत् दर्शकान् तत् परं घटनाचक्रं ज्ञातुं उत्कण्ठितान् करोति। नायिका वासवदत्ता स्वामीनं उदयनं समीपे प्राप्य अपि तस्य मङ्गलस्य निमित्तं पुनः तस्मात् दूरं गच्छति इति घटना अपि अस्मिन्नेव अङ्के विशेष महत्त्वं वहति।

५.७ कतिपयविशेष-श्लोकानां व्याख्यानम्

(१) श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ १ ॥

महाकविभासकृतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य पञ्चमाङ्के श्लोकमिदम् उपलभ्यते। पद्मावत्या सह राज्ञः उदनयस्य परिणये परिसमाप्तेः अपि राजा कथमपि वासवदत्तां विस्मर्तुं न शक्नोति। एकान्ते उपविश्य राजा वासवदत्ताम् एव चिन्तयति-श्लाघ्यामिति।

कालक्रमेण कालस्य समयस्य क्रमः गतिः तया समयगत्या, पुनरागतादारभारः पुनः भुयः आगतः उपनीतः दाराणां पत्न्याः भारः यस्य सोऽहमुदयनः। पुनरपि यः कालगत्या पद्मावत्या सह पत्नीपाशबन्धः। अवन्तिनृपतेः अवन्तिराजस्य, सदृशीं तुल्यगुणरूपां, पितुः अनुरूपां श्लाघ्यां प्रशंसनीयाम्, लाबाणके लाबाणकनामके ग्रामविशेषे, हुतबहेन अग्निना, हृताङ्गष्टिम् दग्धदेहां तां प्रसिद्धां तनुजां दुहितरां वासवदत्तां हिमहतां तुषारनष्टां पद्मिनीं कमलिनीं इव चिन्तयामि विभावयामि। यद्यपि कालगत्याऽहं पत्नीपरिग्रहं कृतवान् तथापि अहं तां गुणमयीं लाबाणके दग्धां प्राणवल्लभाम् अनुक्षणं चिन्तयामि एव, न तु तां विस्मर्तुं शक्नोमि। उपमालङ्कारः, बसन्ततिलकं वृत्तम्।। अनुरूपोक्तिस्तु दृश्यते मेघदूते - 'जातां मन्ये शिशिरमथितां पद्मिनीं बान्यरूपाम्'।

(२) निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः।
ततो व्यक्तं न जानामि भूतर्थोऽयं मनोरथः॥ ७॥

पद्यमिदं महाकविभासरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य पञ्चमाङ्के वर्तते। यदा राजा उदयनः समुद्रगृहे पद्मावतीं न दृष्टवान्, तदा स तस्यां शय्यायां सुप्तः। वासवदत्तापि तत्रागत्य कञ्चित्कालं यावत् स्थित्वा राजः प्रलम्बमानं करमुत्थाप्य शय्यायाम् आरोप्य गन्तुमिच्छति। तस्याः करस्पर्शेन उद्बुद्धो राजा तां धर्तुं वेगेन चलितः, किन्तु कपाटेन ताडितः; तावत् सा पलायिता। पद्ये अस्मिन् तदेव वर्णयन्नाह राजा-निर्गमनितिति।

सम्भ्रमेण त्वरया निस्क्रामन् निर्गच्छन् अहम् उदयनः द्वारपक्षेण ताडितः द्वारस्य पार्श्वभागेन आहतोऽस्मि। ततः तस्मात् कारणात् अहं व्यक्तं स्पष्टं न जानामि न वेद्मि, यत् अयं वासवदत्तायाः स्पर्शरूपः मनोरथः अभिलाषः भूतार्थः सत्यरूपः। राजा वासवदत्तामुखं दृष्ट्वा समर्थ्यो नाभूत्, अतः सा स्पष्टं कथयितुं न शक्नोति यत् वासवदत्ता जीवत्येव, परं तु तस्य मनसि दृढः भावः जातः यत् सा जीवति। अतएव नाटकस्य अन्ते यदा वासवदत्ता उदयनस्य समक्षे आनीता तदा स चकितो नाभवत्। अनुष्टुप् वृत्तम्।

(३) रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां यम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखं
पद्मावतीमपि तथैव समर्थयामि ॥ २॥

महाकविभासविरचितस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य पञ्चमाङ्के राजा उदयनः नवोढायाः पद्मावत्याः शिरः पीडायाः वार्तां श्रुत्वा दुः खमनुभवति। उद्धृतश्लोकेराजा तस्य पूर्वपत्न्याः वासवदत्तायाः करुणं परिणामम् इव पद्मावत्याः अपि परिणामं समर्थयन्नाह–रूपश्रियेति।

रूपश्रिया सौन्दर्यसम्पत्त्या समुदितां संयुक्ताम्, न केवलं रूपसम्पत्त्या अपि तु गुणतश्च दयादाक्षिण्यादिगुणैश्च युक्तां सम्पन्नाम्, प्रियां वल्लभां पद्मावतीमित्यर्थः, लब्धा प्राप्य अद्य इदानीं मम उदयनस्य वासवदत्ताविप्रयुक्तस्य इत्यर्थः शोकः अल्प इव जातः। पूर्वाभिघातः वासवदत्तानिधनरूपः, तेन सरुजः पीडितः अनुभूतदुःखः आस्वादितविरहः अहं पद्मावतीम् अपि नवोढामिमां मगधराजकुमारीम् अपि तथा एव तेन प्रकारेण एव, वासवदत्तामिव विनाशं गमिष्यन्तीम्, समर्थयामि सम्थावयामि। अत्र उत्प्रेक्षालङ्कारः, वसन्ततिलकं वृत्तम्।



५.८ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

स्वप्नवासवदत्तम् नाटकस्य पञ्चमाङ्कस्य कतिपयः महत्वपूर्णदृश्यानां मूलसंस्कृतपाठं ज्ञातवान्। तत्पश्यात् तेषां संस्कृतपाठानां असमीयभाषायाः अर्थाः अपि अवगतवान्। नाटकस्य नामकरणे पञ्चमाङ्कस्य विशेष योगदानं अस्ति इति अपि ज्ञातवान्। तदनन्तरं स्वप्नदृश्यस्य सम्यकं धारणा अपि प्राप्तवान्।



५.९ ज्ञानाधिक्यम्

१) आयारः, ए. एस्. पी. (१९५७), भासः, मद्रासः : वी. रामस्वामी सन्स्तुलु एण्ड सन्स्।

२) काले, एम्. आर. (१९८८), स्वप्नवासवदत्तम् अव भासः, दिल्ली: मोतिलाल बनारसीदास् पब्लिशर्स प्राइवेट लिमिटेड्।

३) पुचलकार, ए. डी. (१९६८), भासः -ए स्टाडि, दिल्ली: मुन्शिराम मनोहरलाल् ओरिएण्टल् पब्लिशर्स्एण्ड् बुक्सेलर्स।

४) शर्मा, थानेश्वरः (१९९५), संस्कृतसाहित्यस्य इतिवृत्त, गुवाहटी: चन्द्रप्रकाशः।



५.१० अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : समुद्रगृहे।

प्रश्नः २ उत्तरम् : वीणावादनस्य शिक्षा।

प्रश्नः ३ उत्तरम् : विदूषकेन सह।

प्रश्नः ४ उत्तरम् : अशुद्धम्।

प्रश्नः ५ उत्तरम् : शिरोवेदनायाम् पीडितायाः पद्मावत्याः अस्वास्थ्यस्य वार्तां ज्ञातुं।

प्रश्नः ६ उत्तरम् :

(क) अशुद्धम्।

(ख) अशुद्धम्।



५.११ अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नाः (५० शब्देषु उत्तरं लिखतु)

प्रश्न १: 'स्वप्नवासवदत्तम्' इति नाटकस्य पञ्चमाङ्कस्य महत्वं विषये संक्षिप्तविवरणं लिखतु।

ख) संक्षिप्ता प्रश्नाः (१५० शब्देषु उत्तरं लिखतु)

प्रश्न १: 'स्वप्नवासवदत्तम्' इति नाटकस्य पञ्चमाङ्कस्य स्वप्नदृश्यं संक्षेपेण लिखतु ?

ग) रचनाधर्मी प्रश्नाः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्न १: 'स्वप्नवासवदत्तम्' इति नाटकस्य पञ्चमाङ्के राजा उदयनयः समुद्रगृहे निद्रामग्नः भवति, तत्पूर्वं विदूषकेन सह संवादः वर्णयतु।

प्रश्न २: 'स्वप्नवासवदत्तम्' इति नाटकस्यपञ्चमाङ्के स्वप्नाविष्ट राजा उदयनः वासवदत्तया सह कृतः संवादं वर्णयतु।

*** ***** ***

अध्यायः ६ : स्वप्नवासवदत्तम् (षष्ठाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

६.१ उद्देश्यम्

६.२ परिचयः

६.३ षष्ठाङ्कस्य निर्वाचितांशस्य मूलसंस्कृतपाठः

- ६.३.१ काञ्चुकीयस्य धात्राः प्रतिहार्याः च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः
- ६.३.२ द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

६.४ उक्तसंस्कृतपाठस्य असमीयानुवादः

- ६.४.१ काञ्चुकीयस्यधात्राः प्रतिहार्याः च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तम् अनुवादः
- ६.४.२ द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तम् अनुवादः

६.५ उदयनवासवदत्तयोः पुनर्मिलनस्य दृश्यवर्णनम्

६.६ नाटके षष्ठाङ्कस्य महत्त्वम्

६.७ अध्यायात् किमवगतम्

६.८ ज्ञानाधिक्यम्

६.९ अग्रगत्याः निरूपणम्

६.१० अभ्यासप्रश्नाः

६.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् -

- 'स्वप्नवासवदत्तम्' नाटकस्य षष्ठाङ्कस्य मुख्य-दृश्यानां संस्कृत-पाठज्ञानं प्राप्नोति।
- उक्त संस्कृत पाठस्य असमीयार्थानां ज्ञानं च प्राप्तुं शक्नोति।
- नाट्यकारेण नायक-नायिकयोः मिलनं कथं सम्पन्नम् कृतः तदपि ज्ञातुं शक्नोति।

६.३ परिचयः

पूर्वस्मिनध्याये भवान् 'स्वप्नवासवदत्तं' इति नाटकस्य पञ्चमाङ्कं स्पष्टतया अवगतवान्। तस्मिनङ्के ये महत्वपूर्णाः दृश्यांशाः सन्ति, तेषां संस्कृतपाठं च तदर्थानां परिचयं च प्राप्तवान्। तस्मिन्नेव अङ्के विशेषः स्वप्नदृश्यं यत् अस्ति, तस्यापि विशेषज्ञानं लब्धम्।

अस्मिनध्याये भवान् नाटकस्य अन्तिमः षष्ठाङ्कं ज्ञातुं समर्थो भविष्यति। समापनाङ्कत्वेन अस्मिन् षष्ठे अङ्के ये दृश्याः विशेषं महत्वं तथा च अर्थगर्भं वहन्ति, ते दृश्याः संस्कृतपाठेन असमीयाभाषायाः अर्थेन च अत्र प्रकाश्यन्ते। नायक-नायिकयोः मिलनम् कथम् प्रकारेण अभवत्, इत्यस्य स्पष्टं विवेचनमपि अस्मिनध्याये भविष्यति।

६.३ षष्ठाङ्कस्य चयनितः भागस्य मूलसंस्कृतपाठः

६.३.१ काञ्चुकीयस्य धात्राः प्रतिहार्याः च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

(ततः प्रविशति काञ्चुकीयः धात्री प्रतीहारी च)

काञ्चुकीयः - भोः!

सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः ॥ ५ ॥

प्रतीहारी - एष भर्ता, उपसर्पत्वार्यः।

काञ्चुकीयः-(उपेत्य) जयत्वार्यपुत्रः।

धात्री- जयतु भर्ता।

राजा - (सबहुमानम्) आर्य!

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः।
अपि राजा स कुशली मया काङ्क्षितबान्धवः ॥ ६ ॥

काञ्चुकीयः- अथ किम्? कुशली महासेनः। इहापि सर्वगतं कुशलं पृच्छति।

राजा- (आसनादुत्थाय) किमाज्ञापयति महासेनः?

काञ्चुकीयः-सदृशमेतद्? वैदेहीपुत्रस्य। नन्वासनस्थेनैव भवता श्रोतव्योमहासेनस्य सन्देशः।

राजा- यदाज्ञापयति महासेनः। (उपविशति)

काञ्चुकीयः - दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति। कुतः?

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ॥ ७ ॥

राजा - सर्वमेतन्महासेनस्य प्रभावः। कुतः?

अहमवजितः पूर्वं तावत् सुतैः सह लालितो
दृढमपहृता कन्या भूयो मया न च रक्षिता।
निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता
ननु यदुचितान् वत्सान् प्रासुं नृपोऽत्र हि कारणम्?॥ ८।।

काञ्चुकीयः-एष महासेनस्य सन्देशः। देव्याः सन्देशमिहात्रभवती कथयिष्यति।

राजा- हा अम्ब!

षोडशान्तः पुरज्येष्ठा पुण्या नगरदेवता।

मम प्रवासदु:खार्ता माता कुशलिनी ननु ॥ ९ ॥

धात्री– अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति।

राजा – सर्वगतं कुशलमिति। अम्ब! ईदृशं कुशलम्।

धात्री– मेदानीं भर्तातिमात्रं संतत्पुम्।

काञ्चुकीयः – धारयत्वार्यपुत्रः। उपरताप्यनुपरता महासेनपुत्री एवमनुकम्पमानार्यपुत्रेण।

अथवा,

कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।

एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥ १०॥

राजा– आर्य! मा मेवम्।

महासेनस्य दुहिता शिष्या देवी च मे प्रिया।

कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि ॥ ११ ॥

धात्री – आह भट्टिनी – उपरता वासवदत्ता। मम वा महासेनस्य वा यादृशौ गोपालपालकौ तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति। एतन्निमित्तमुज्जयिनीमानीतः। अनग्रिमाक्षिकं वीणाव्यपदेशेन दत्ता। आत्मनश्चपकतयानित्तविवाहमङ्गल एव गतः। अथचावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामाख्य विवाहो निर्वृत्तः एषा चित्रफलका तव सकाशं प्रेषिता। एतां प्रेक्ष्य निवृतो भव

राजा– अहो अतिस्निग्धमनुरूपं चाभिहितं तत्रभवत्या।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि।

अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः॥ १२॥

६.३.१ द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तं दृश्यांशस्य मूलसंस्कृतपाठः

पद्मावती– आर्यपुत्र! चित्रगतं गुरुजनं दृष्टाभिवादयितुमिच्छामि।

धात्री – पश्यतु पश्यतु भर्तृदारिका।

पद्मावती– (दृष्ट्वा आत्मगतम्।) हम्। अतिसदृशि खल्वियमार्याया आवन्तिकायाः। (प्रकाशम्) आर्यपुत्र! सदृशि खल्वियमार्यायाः।

राजा– न सदृशी सैवेति मन्ये। भोः। कष्टम् ,

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।

इदं च मुखमाधुर्यं कथं दूषितमग्निना।। १३।।

पद्मावती– आर्यपुत्रस्य प्रतिकृतिं दृष्ट्वा जानामीयमार्यमा सदृशी न वेति।

धात्री– पश्यतु पश्यतु भर्तृदारिका।

पद्मावती (दृष्ट्वा) आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामीयमार्यया सदृशीति।

राजा- देवी! चित्रदर्शनात् प्रारम्भे प्रहृष्टोद्विग्नामीव त्वां पश्यामि। किमिदम्?

पद्मावती- आर्यपुत्र। अस्याः प्रतिकृत्याः सदृशीहैव प्रतिवसति

राजा- किं वासवदत्तायाः?

पद्मावती- आम्।

राजा- तेन हि शीघ्रमानीयताम्।

पद्मावती- आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः। प्रोक्षितभर्तृकापरपुरुषदर्शनं परिहरति। तदार्या पश्यतु सदृशी नवेति।

राजा- यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।
परम्परागत लोकं दृश्यते रूपतुलता।। १४।।
(प्रविश्य)

प्रतिहारी- जयतु भर्ता। एष उज्जयिनीयो ब्राह्मणो भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः तं प्रतिग्रहीतुं प्रतिहारमुपस्थितः।

राजा- पद्मावती। किं नुस ब्राह्मणः?

पद्मावती- भवितव्यम्।

राजा- शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः।

प्रतिहारी- यद् भर्ताज्ञापयति। (निष्क्रान्ता)

राजा- पद्मावती। त्वमपि तामानय।

पद्मावती- यदार्यपुत्र आज्ञापयति। (निष्क्रान्ता)
(ततः प्रवेश्यति योगन्धरायणः प्रतिहारी च)

योगन्धरायणः- (आत्मगतम्) भोः।
प्रच्छाय राजमहिषीं नृपतेर्हितार्थे
कामं मया कृतमिदं हितमित्यवेक्ष्य।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं बक्ष्यतिति हृदयं परिशङ्कितंमे।। १५।।

प्रतिहारी- एष भर्ता। उपसर्पत्वार्यः।

योगन्धरायण- (उपसृत्य।) जयतु भवान् जयतु।

राजा- श्रुतपूर्व इव स्वरः भो ब्राह्मण! किं भवतः सुसा पद्मावत्याः हस्ते न्यास इति निक्षिप्ता?

योगन्धरायणः- अथ किम्?

राजा- तेन हि त्वर्यन्तां त्वर्यातामस्य भगिनिका।

प्रतिहारी- यद् भर्ताज्ञापयति। (निष्क्रान्ता।)
(ततः प्रविशति पद्मावती आवन्तिका प्रतिहारी च)

पद्मावती- एत्त्वेत्वार्या। प्रियं ते निवेदयामि।

आवन्तिका- किं किम् ?

पद्मावती- भ्राता ते आगत:।

आवन्तिका- दिष्ट्येदानिमपि स्मरति।

पद्मावती- (उपसृता) जयत्वार्यपुत्र:। एष न्यास:।

राजा- निर्यातय पद्मावती। अथवा साक्षिमन्न्यासो निर्वातयितव्य:।
इहात्रभवान् रैभ्य: अत्रभवती चाधिकरणं भविष्यत:।

पद्मावती- आर्य। नीयतानिदानीमार्या।

धात्री- (आवन्तिकां निर्वण्य) अम्मो! भर्तृदारिकावासवदत्ता।

राजा- कथं महासेनपुत्री ? देवी! प्रविश त्वमभ्यन्तरं पद्मावत्यासह।

योगन्धरायण:- न खलु न खलु प्रवेश्टव्यम्। मम भगिनी खल्वेषा ?

राज्य- किं भवानाह- महासेनपुत्रीखल्वेषा ?

योगन्धरायण:- भो राजन्।
भारतानां कुले जातो विनीतो ज्ञानवाञ्छूचि:।
तन्नार्हसि बलार्द्धर्तृ राधर्मस्य देशिक:।। १६।।

राजा- भवतु पश्यामन्ताबद्रुपसादृश्यम्। संक्षिप्यतां यवनिका।

योगन्धरायण:- जयतु स्वामी।

बासवदत्ता- जयत्वार्यपुत्र:

राजा- अये। असौ योगन्धरायण:। इयं महासेनपुत्री।

६.४ उक्तसंस्कृतपाठस्य असमीयानुवाद:

এতিয়া আপুনি স্বপ্নবাসবদত্তম্ নাটকৰ ষষ্ঠ অংকৰ কাঞ্চুকীয়, ধাত্রী আৰু প্রতীহাৰীৰ প্রবেশৰ পৰা অংগাৰবতীৰ বার্তা প্রদান পর্যন্ত দৃশ্যাংশৰ অসমীয়া অনুবাদ আৰু দ্বাদশ শ্লোকৰ পিছৰ পৰা পুনর্মিলন পর্যন্তৰ দৃশ্যাংশৰ অসমীয়া অনুবাদো পঢ়িব পাব।

६.४.१ काञ्चुकीयस्य धात्र्या: प्रतिहार्या: च प्रवेशनाद् अङ्गारवती-सन्देशप्रदानपर्यन्तम् अनुवाद:

(তাৰ পিছত কাঞ্চুকীয়, ধাত্রী আৰু প্রতীহাৰীৰ প্রবেশ)

কাঞ্চুকীয় - অঃ।
আত্মীয়ৰ ৰাজ্যলৈ আহি অতি আনন্দ পাইছো। কিন্তু ৰাজকন্যাৰ মৃত্যুৰ কথা স্মৰণ কৰি বিষাদগ্রস্তও হৈছো। দৈব* যদি ৰাজ্য শত্রুৰ হাতৰ পৰা উদ্ধাৰ আৰু দেৱীও কুশলে থাকিলহেঁতেন, তেতিয়াহ'লে তুমি একোৱেই কৰিবলৈ বাকী থাকিলহেঁতেন। (অর্থাৎ দৈৱই ইয়াৰ আধাহে কর্তব্য পালন কৰিছে) ।। ।।

কাঞ্চুকীয় - মহাসেনৰ দ্বাৰা এইগৰাকী কাঞ্চুকীয়ক প্রেৰণ কৰাবলৈ তেওঁ ৰৈভাগোত্রীয় আছিল।

ধাত্রী - এইগৰাকী ধাত্রী মহাসেনৰ ৰানী অঙ্গাৰবতীৰ দ্বাৰা প্রেৰণ কৰা হৈছিল । তেওঁ বাসবদত্তাৰ ধাত্রী আছিল আৰু নাম বসুন্ধৰা।

প্রতীহাৰী - এয়া আমাৰ প্ৰভু। আৰ্য, আপুনি অগ্ৰসৰ হওঁক।

কাঞ্চুকীয় - (অগ্ৰসৰ হৈ) আৰ্যপুত্ৰৰ জয় হওঁক।

ধাত্ৰী - প্ৰভুৰ জয় হওঁক।

ৰজা - (সসন্মানে) আৰ্য❋ পৃথিৱীৰ ৰজাসকলৰ উত্থান পতনৰ যিগৰাকী প্ৰভু আৰু মোৰ আকাংক্ষিত বান্ধৱ সেই ৰজাৰ কুশলনে? ।। ⌛।।

কাঞ্চুকীয় - হয়❋ মহাসেনৰ কুশল। তেওঁও ইয়াৰ সকলোৰে কুশলবাৰ্তা সুধিছে।

ৰজা - (আসনৰ পৰা উঠি) মহাসেনে কি আজ্ঞা কৰিছে?

কাঞ্চুকীয় - এয়া বৈদেহীপুত্ৰৰ বাবে উপযুক্ত (আচাৰ)। তথাপি আপুনি আসনত বহি থাকিয়েই মহাসেনৰ বাৰ্তা শুনক।

ৰজা - মহাসেনে যি আজ্ঞা কৰিছে (বহি লয়)।

কাঞ্চুকীয় - ভাগ্য ক্ৰমে আপুনি আকৌ শত্ৰুৰ দ্বাৰা হৃত ৰাজ্য পুনৰ অধিকাৰ কৰিছে। কাৰণ যিসকল কাতৰ নাইবা অসমৰ্থ তেওঁলোকত উৎসাহ নজন্মে। উৎসাহীসকলে প্ৰায়েই ৰাজলক্ষ্মী ভোগ কৰি থাকে।। ⌨।।

ৰজা - আৰ্য। এই সকলো মহাসেনৰ প্ৰভাৱ। কাৰণ -

মই পূৰ্বতে পৰাজিত হৈ তেওঁৰ পুত্ৰসকলৰ লগত (সমভাবে) লালিত পালিত হৈছিলো। তেওঁৰ কন্যাক বলপূৰ্বক হৰণ কৰিছিলো, কিন্তু ৰক্ষা কৰিব নোৱাৰিলো। তেওঁৰ (কন্যাৰ) মৃত্যু হোৱা বুলি শুনিও তেওঁ (মহাসেনে) মোৰ প্ৰতি সেই ৰূপ স্নেহ প্ৰদৰ্শন কৰিছে। আৰু মই যে মোৰ প্ৰাপ্য বৎসৰাজ প্ৰাপ্ত কৰিছো, এই ক্ষেত্ৰতো সেই ৰজাই কাৰণ।

কাঞ্চুকীয় - এয়াই মহাসেনৰ সংবাদ। মহিষীৰ সংবাদ এওঁ (বসুন্ধৰাই) ক'ব।

ৰজা - হে মাতৃ।

যিগৰাকী ষোড়শ পত্নীগনৰ মাজত জ্যেষ্ঠা, পবিত্ৰা আৰু নগৰ দেৱতা স্বৰূপিনী, মোৰ প্ৰবাসৰ দুখত কাতৰ, সেই মাতৃ কুশলে আছেতো❋ ।।🙏।।

ধাত্ৰী - মহিষী সুস্থই আছে, তেওঁ আপোনাৰ সৰ্বাংগীন কুশলবাৰ্তা সুধিছে ।

ৰজা - সৰ্বাংগীন কুশল? মাতু❋ এনেকুৱা কুশল❋

ধাত্ৰী - প্ৰভু❋ অধিক সন্তপ্ত নহ'ব।

কাঞ্চুকীয় - আৰ্য পুত্ৰ❋ আপুনি ধৈৰ্য ধৰক। আৰ্যপুত্ৰৰ এই ধৰণৰ অনুকম্পাৰ বাবে মহাসেন পুত্ৰী মৃতা হৈও যেন মৃতা নহয়। অথবা

মৃত্যুৰ সময়ত কোনে কাক ৰক্ষা কৰিব পাৰে ? ৰজ্জু ছিন্ন হ'লে কোনে ঘট ধাৰণ কৰিব পাৰে? এনেদৰে বৃক্ষৰ সমগুণবিশিষ্ট মানুহ সময়ে সময়ে ছিন্ন হয় (মৃত্যু) হয় আৰু অংকুৰিত হয় (জন্মে)।। 🗁🗀।।


ৰজা - আৰ্য❋ নহয় এনে নহয়।

মহাসেনৰ কন্যা, মোৰ শিষ্যা, পত্নী আৰু প্ৰিয়া, কেনেদৰে তেওঁক মই

মৃত্যুৰ পিচতো স্মৰণ নকৰাকৈ থাকিব পাৰিম।। ।।

ধাত্রী - মহাৰাণীয়ে কৈছে- বাসবদত্তাৰ মৃত্যু হৈছে । মোৰ বাবে অথবা মহাসেনৰ বাবে গোপালক আৰু পালক যেনেকুৱা তুমিও তেনেকুৱা যিহেতু জামাতা হিচাপে প্ৰথমেই মানি লোৱা হৈছে। এই কাৰণেই উজ্জয়িনীলৈ অনা হৈছিল। অগ্নিৰ সাক্ষী অবিহনে বীনাৰ চলেৰে আমি তেওঁক তোমালৈ দিছিলো। নিজৰ চঞ্চলতাৰ বাবে বিবাহ অবিহনেই গুছি গ'লা। ইয়াৰ পিছত মই তোমাৰ আৰু বাসবদত্তাৰ ছবি চিত্ৰ ফলকত অংকণ কৰি বিবাহ সম্পন্ন কৰিছিলো। এই চিত্ৰপট তোমাৰ ওচৰলৈ পঠিয়াইছো। সেয়া চাই শান্ত হোৱা।

ৰজা - মহাৰাণীয়ে যি কথা কৈছে সেয়া অতি মধুৰ আৰু (তেওঁৰ) অনুৰূপ। এই বাক্য শতৰাজ্য প্ৰাপ্তিতকৈও অধিক প্ৰিয় যিয়ে আমি অপৰাধীৰ প্ৰতিও স্নেহ(প্ৰদৰ্শন কৰিবলৈ) পাহৰা নাই।। ।।



अग्रगति निरिक्षणम्

प्रश्न: १: राजा महासेन: तथा राज्ञी अंगारवती इत्यनयो: सन्देशं गृहीत्वा केषां आगमनं अभवत् ?

.....

प्रश्न: २: महिष्या अंगारवत्या धात्री माध्यमेन राज्ञ: उदयनस्य समीपं किम् प्रेषितम् ?

.....

६.४.२ द्वादशश्लोकानन्तरं पुनर्मिलनपर्यन्तम् अनुवाद:

পদ্মাৱতী - আৰ্যপুত্ৰ❋ চিত্ৰত থকা গুজনক অভিবাদন কৰিবলৈ বিচাৰিছো।

ধাত্রী - চোৱা, চোৱা, ৰাজকুমাৰী।

পদ্মাৱতী - (চাই লৈ স্বগত) হুঁ❋ এওঁ আৰ্যা আৱন্তিকাৰ লগত দেখিবলৈ অতি একে। (প্ৰকাশ কৰি) আৰ্যপুত্ৰ। এওঁ (চিত্ৰত থকা স্ত্ৰী গৰাকী) আৰ্যাৰ (বাসবদত্তাৰ) দৰে নেকি ?

ৰজা - একে নহয়, মই ভাবো সেইগৰাকীয়েই। উস্❋ দুখৰ কথা।
এই সুন্দৰ বৰণৰ (দেহত) ইমান ভয়ংকৰ বিপদ কিদৰে হ'ব পাৰে ?
মুখমণ্ডলৰ এই মধুৰতা অগ্নিৰ দ্বাৰা কিদৰে বিনাশ প্ৰাপ্ত হ'ল ? ।। ।।

পদ্মাৱতী - (চাই) আৰ্যপুত্ৰৰ চিত্ৰখনি চাই মই আৰ্যাৰ দৰে হয় নে নহয় জানিব পাৰিম।

ধাত্রী - ভৰ্ত্তৃদাৰিকা। চোৱা, চোৱা।

পদ্মাৱতী - (চাই) আৰ্যপুত্ৰৰ চিত্ৰখনিৰ সাদৃশ্যৰ পৰা মই জানিব পাৰিছো যে এইখন (বাসৱদত্তাৰ চিত্ৰ) আৰ্যাৰ দৰেই।

ৰজা - দেৰী। চিত্ৰ দৰ্শন কৰা সময়ৰ পৰা তোমাক আনন্দিতা আৰু উদ্বিগ্না দেখা গৈছে। এয়া কি ?

পদ্মাৱতী - আৰ্যপুত্ৰ ❋ এই চিত্ৰৰ সদৃশ এগৰাকী ইয়াত বাস কৰে।

ৰজা - কি ? বাসৱদত্তাৰ দৰে ?

পদ্মাৱতী - হয়।

ৰজা - তেন্তে শীঘ্ৰে লৈ আহা।

পদ্মাৱতী - আৰ্যপুত্ৰ ❋ মোৰ বিবাহৰ আগতে এজন ব্ৰাহ্মণে 'মোৰ ভনী' এনেদৰে কৈ তেওঁক মোৰ দায়িত্বত ৰাখি থৈ গৈছিল। তেওঁ প্ৰোষিত ভৰ্তৃকা, সেয়ে পৰপুৰুষৰ দৰ্শন নকৰে। সেয়ে আৰ্যাই (ধাত্ৰী) চাই লওঁক, একে হয়নে নহয়।

ৰজা - যদি ব্ৰাহ্মণৰ ভগ্নী, নিশ্চয় অইন কোনোবা হ'ব। এই সংসাৰত এজনৰ আনজনৰ লগত ৰূপৰ সাদৃশ্য পোৱা যায়।। ।।

(প্ৰবেশ কৰি)

প্ৰতীহাৰী - মহাৰাজৰ জয় হওঁক। এইগৰাকী উজ্জয়িনীৰ ব্ৰাহ্মণ 'ৰাণীৰ হাতত মোৰ ভগ্নীক ন্যাসৰূপে ৰক্ষিত কৰা হৈছিল' এইবুলি তেওঁক ওভতাই নিবলৈ দ্বাৰস্থলত উপস্থিত হৈছে।

ৰজা - পদ্মাৱতী ❋ সেই একেগৰাকী ব্ৰাহ্মণেই হয়নে ?

পদ্মাৱতী - তেওঁৰেই হ'ব লাগে।

ৰজা - অভ্যন্তৰৰ বাবে উপযুক্ত শিষ্টাচাৰৰ প্ৰদৰ্শন পূৰ্বক সেই ব্ৰাহ্মণক শীঘ্ৰে ভিতৰলৈ লৈ আহা।

প্ৰতীহাৰী - মহাৰাজৰ যি আজ্ঞা।

ৰজা - পদ্মাৱতী। তুমিও তেওঁক লৈ আহা।

পদ্মাৱতী - স্বামীৰ যি আজ্ঞা। (প্ৰস্থান কৰে)

(তাৰ পিছত যৌগন্ধৰায়াণ আৰু প্ৰতিহাৰী প্ৰবেশ কৰে)

যৌগন্ধৰায়ণ - (স্বগত) অঃ। ৰাণীক ৰজাৰ হিতৰ বাবে লুকুৱাই ৰাখি আমাৰ ভালৰ বাবে হ'ব বুলি এই কাৰ্য মই নিজ ইচ্ছামতে কৰিছিলো। যদিও মোৰ কাৰ্য সিদ্ধ হৈছে তথাপি ৰজাই কি ক'ব এই কথাৰ বাবে মোৰ হৃদয় কম্পিত হৈছে।। ।।

প্ৰতীহাৰী - এয়া মহাৰাজ। ডাঙৰীয়াই ওচৰলৈ যাওঁক।

যৌগন্ধৰায়ণ - (ওচৰলৈ গৈ) জয় হওঁক। আপোনাৰ জয় হওঁক।

ৰজা - আগতে শুনা কণ্ঠধ্বনি যেন লাগিছে। হে ব্ৰাহ্মণ ❋ কি, আপোনাৰ ভনীক পদ্মাৱতীৰ হাতত ন্যাসৰূপে ৰাখিছিল নেকি ?

যৌগন্ধৰায়ণ - হয়, হয়।

ৰজা - তেনেহ'লে সোনকালে কৰা, এওঁৰ ভগ্নীক শীঘ্রে আনা।

প্রতীহাৰী - মহাৰাজৰ যি আজ্ঞা। ওলাই যায়

(ইয়াৰ পিছত পদ্মাৱতী, আৱন্তিকা আৰু প্রতীহাৰীৰ প্রবেশ)

পদ্মাৱতী - আহা, আহা আর্যা। তোমাক প্রিয় বার্তা এটি দিওঁ।

আৱন্তিকা - কি? কি ?

পদ্মাৱতী - তোমাৰ ভ্রাতৃ আহিছে।

আৱন্তিকা - সৌভাগ্যক্রমে, তেওঁ এতিয়াও মোক মনত পেলাইছে।

পদ্মাৱতী - (ওচৰলৈ গৈ) আর্যপুত্রৰ জয় হওঁক। এয়া ন্যাস।

ৰজা - পদ্মাৱতী, ওভতাই দিয়া। (কিন্তু) ন্যাস সাক্ষীৰ সন্মুখত ওভতাই দিব লাগে। মাননীয় ৰৈভ্য ইয়াত আছে আৰু (তেওঁ বসুন্ধৰা) ন্যায়াধীশ হ'ব।

পদ্মাৱতী - আর্যা ❋ আর্যাক লৈ যাওঁক।

ধাত্রী - (আৱন্তিকাক মনোযোগেৰে লক্ষ্য কৰি) আঃ ❋ ৰাজকুমাৰী বাসবদত্তা।

ৰজা - কেনেকৈ? মহাসেন পুত্রী ❋ দেৱী ❋ পদ্মাৱতীৰ লগত ভিতৰত প্রবেশ কৰা।

যৌগন্ধৰায়ণ - নহয়, তেওঁ ভিতৰত প্রবেশ কৰিব নালাগে। তেওঁ মোৰ ভগ্নী।

ৰজা - আপুনি কি কৈছে, এয়া মহাসেন পুত্রীহে।

যৌগন্ধৰায়ণ - হে মহাৰাজ,


(আপুনি) ভৰত বংশত সম্ভূত, বিনীত, জ্ঞানী আৰু পবিত্র, সেয়ে আপুনি যিগৰাকী ৰাজধর্মৰ প্রবর্তক বলপূর্বক তেওঁক অপহৰণ কৰাটো উচিত নহয়।।

ৰজা - ঠিক আছে, ৰূপৰ সাদৃশ্য চাই লওঁ। ওৰণি গুচোৱা।

যৌগন্ধৰায়ণ - মহাৰাজাৰ জয় হওঁক।

বাসৱদত্তা - আর্যপুত্রৰ জয় হওঁক।

ৰজা - অঃ সেয়া যৌগন্ধৰায়ণ। এয়া মহাসেনপুত্রী।



अग्रगत्या: निरीक्षणम्

प्रश्न ३: चित्रे स्थितां वासवदत्तां दृष्ट्वा पद्मावती कया सह समानता इव अमन्यत् ?

.....

प्रश्न ४: उज्जयिन्यां ब्राह्मणवेषेण कस्य आगमनम् अभवत् ?

.....

प्रश्न ५: ब्राह्मण: पद्मावती-समीपे किमर्थं आगच्छत् ?

.....

प्रश्न ६: उदयन-वासवदत्तायोः पुनर्मेलनं सम्भवमभवत् वा ?

.....

६.५ उदयनवासवदत्तयोः पुनर्मेलनस्य दृश्यवर्णनम्

षष्ठाङ्कस्य आरम्भे दृश्यते यत् वासवदत्तायाः पितृ-मातृभ्यां प्रेषितौ रैभ्यगोत्रीयः काञ्चुकीयस्यय च तथा वसुन्धरानामा धात्र्याः च आगमनं अभवत्। काञ्चुकीयः वासवदत्तायाः पितुः राज्ञः महासेनस्य कुशलसन्देशं प्रदत्तवान् तथा सर्वेषां कुशलवार्तां अपि पृष्टवान्। राजा उदयनः अपि तं प्रति दर्शितं स्नेहं स्मृत्वा महासेनं प्रति कृतज्ञतां प्रकटितवान्। सः पुनः उक्तवान् यत् तस्यैव राज्ञः महासेनस्य कारणेन सः वत्सराज्यम् प्राप्तवान्।

ततः धात्री वसुन्धरा महिष्याः अंगारवत्याः सन्देशं प्रदत्तवती। यदा उदयनः वासवदत्तां गृहीत्वा विवाहं विना पलायितः अभवत्, तदा महिष्या अंगारवत्या उभयोः च चित्रं चित्रपटे आङ्कितं कृत्वा विवाहः सम्पन्नं कृतवती। ततः सा तत् चित्रपटं धात्र्याः हस्ते दत्वा प्रेषितवती। अतः तं चित्रं दृष्ट्वा उदयनः मनसः संतापं शमनं कर्तुं शक्नोति इति महिषी अपेक्षां कृतवती। ततः पद्मावती तत्र स्थितं गुरुजनं प्रति श्रद्धां प्रदर्शयितुं प्रक्रमे, सा चित्रे स्थितां वासवदत्तां प्रथमं दृष्टवती। सा उक्तवती यत् वासवदत्तायाः सदृशा एका स्त्री तत्रैव अस्ति। ततः राजा तां तत्क्षणमेव आनयितुं आज्ञां प्रदत्तवान्।

ततः प्रतीहारिणा ज्ञापितं यत् उज्जयिन्याः एकस्य ब्राह्मणस्य आगमनं अभवत्। सः ब्राह्मणः पद्मावत्याः समीपे न्यासरूपेण स्थितां स्वां भगिनीं प्रत्यानेतुं आगच्छत्। सः ब्राह्मणः वस्तुतः योगन्धरायणः आसीत्। योगन्धरायणः प्रविश्य राज्ञः उदयनस्य जयध्वनिं कृतवान्। तस्य स्वरः उदयनस्य अतीव परिचित इव आसीत्। तस्मिन्नेव समये आवन्तिकारूपेण स्थिता-वासवदत्ता अपि तत्र आनीता। ततः राज्ञा पद्मावतीं प्रति न्यासं प्रत्यर्पणं कर्तुं आज्ञा दत्ता। पद्मावत्यपि तां आज्ञां परिपाल्य वासवदत्तां प्रत्यर्पणार्थं उद्यता जाता। तदा धात्र्या उक्तं यत् आवन्तिका इति ज्ञायमाना सा वस्तुतः राजकुमारी वासवदत्ता एव। एतद्वचनं श्रुत्वा राजा अतीव चकितः अभवत्। सः अपि तस्य रूपसादृश्यं निरीक्षीतुम् इप्सितवान्। वासवदत्ता राज्ञः उदयनस्य जयं प्रकाम्य स्वपरिचयं दत्तवती। ततः योगन्धरायणः वासवदत्तां राज्ञः समीपात् दूरं नीतवान् इति क्षमां याचितवान्।

एवं प्रकारेण उदयनस्य वासवदत्तया सह पुनर्मेलनं महाकविना भासेन अतीव रमणीयप्रकारेण प्रदर्शितम्। तेन नाटकमिदं सफलं समाप्तिमाप्नोति।

६.६ नाटके षष्ठाङ्कस्य महत्त्वम्

पञ्चमाङ्के वत्सराज्यस्य उद्धारणार्थं शत्रूणां विरुद्धे कृतयुद्धस्य प्रस्तुतिः उपस्थापिता। षष्ठेऽङ्के युद्धस्य परिणामः दर्शकेभ्यःविज्ञाप्यते, तथा नायक-नायिकयोः पुनर्मेलनं प्रदर्शितम्।

अस्य अङ्कस्य आरम्भे राजा उदयनः घोषवती नामिकां वीणां प्राप्य वासवदत्तां स्मृत्वा

अतीव शोकाकुलः अभवत्। तद् दृश्यं महाकविना अतीव मर्मस्पर्शीरूपेण प्रस्तुतम्।

तदनन्तरं वासवदत्ता तथा आवन्तिका एका एव स्त्री इति सिद्ध्यर्थं महाकविना यः चित्रदर्शनस्य दृश्यः प्रदर्शितः, सः अतीव रोचकः। एवं प्रकारेण महाकविः उदयनस्य वासवदत्तया सह पुनर्मेलनं सम्पन्नं कृत्वा नाटकस्य सफलसमापनं करोति।

६.७ श्लोकानां संस्कृतव्याख्या

(१) यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।
परम्परागत लोकं दृश्यते रूपतुलता।। १४।।

महाकविभासकृतस्य स्वप्नवासवदत्ताख्यस्य नाटकस्य षष्ठाङ्कादुद्धृते पद्ये अस्मिन् राजा उदयनः पद्मावतीं कथयति यत्, यदि आवन्तिका कस्यापि विप्रस्य भगिनी भवति, तर्हि सा स्पष्टरूपेण वासवदत्तायाः भिन्ना का अपि अन्या भवेत्।

यदि सा त्वया वर्णिता स्त्रीविप्रस्य ब्राह्मणस्य भगिनी स्वसा तर्हि व्यक्तं स्फुटं स्पष्टरीत्या, सा अन्या वासवदत्ताभिन्ना अपरा काचिद् भविष्यति। वासवदत्ता तु क्षत्रियकन्या, क्षत्रियपुत्री। लोके संसारे परस्परगता रूपतुल्यता आकृतिसादृश्यम् दृश्यते अवलोक्यते। लोके समानरूपता दृश्यते, प्रायः एकस्य जनस्य आकृति अपरस्य नरस्य आकृतिनां साम्यं भजते। अर्थान्तरन्यासः अलङ्कारः, अनुष्टुप् वृत्तम्।

(२) सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः ॥ ५ ॥

महाकविभासरचितस्य स्वप्नवासवदत्तमिति नाटकस्य षष्ठाङ्के लभ्यते अयं श्लोकः। श्लोकेऽस्मिन् महाराजस्य प्रद्योतस्य काञ्चुकीयः राज्ञः उदयनस्य सकाशम् एत्य स्वहृद्गतं भावं प्रकटयन्नाह–सम्बन्धिराज्यमिति।

इदं सम्बन्धिनः बन्धोः उदयनस्य राज्यं वत्सदेशम् एत्य आगत्य मम महान् प्रहर्ष आनन्दः, नृपसुतानिधनम् प्रद्योतकन्यायाः वासवदत्तायाः मरणं स्मृत्वा–मनसि कृत्वा विषादः दुःखं प्रादुर्भवति। हे दैव! हे नियते! यदि परैः शत्रुभिः अपहृतं बलादृहीतं राज्यं स्यात्, पुनर्लब्धं स्यात्, देव्याः वासवदत्तायाः च कुशलं क्षेमं स्यात्, तर्हि भवता त्वया किं न कृतम् अनुष्ठितं स्यात् भवेत्, तर्हि सर्वं नो हितम् आचरितं स्यात्।

स्वनृपस्य जामातुः राज्यं आगत्य अहम् अत्यानन्दम् अनुभवामि, परं तु तस्य दुहितुः मरणं स्मृत्वा विषादम् अपि प्राप्नोमि। हे दैव! शत्रुहृतं राज्यं तु त्वया उदयनाय प्रत्यर्पितम्, परं तु तेन राज्येन सह यदि वासवदत्ता अपि रक्षिता प्रत्यर्पिता स्यात् तर्हि सर्वमेव हितं प्रद्योतोदयनयोः

भवता आचरितं स्यात्, अधुना तु असमग्रमेव कल्याणं त्वया सम्पादितम्–इति तात्पर्यः। वसन्ततिलकं वृत्तम्।

(३) कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च ॥ १० ॥

महाकविभासकृतस्य स्वप्नवासवदत्तमिति नाटकस्य षष्ठाङ्के श्लोकोऽयं लभ्यते। यदा महासेनप्रद्योतेन तत्पत्न्या अङ्गारवत्याच प्रेषितम् उदयनवासवदत्तयोः चित्रं दृष्ट्वा राजा उदयनः वासवदत्तां स्मृत्वा भृशं शोकार्तोऽभवत्, तदा महासेनस्य काञ्चुकीयः शोकविह्वलं उदयनं प्रबोधयन्नेवमाह – कः किमिति।

मृत्युकाले मृत्योः मरणस्य काले समये, मरणसमये, कः अवहितोऽपि नरः, कम् अति प्रियमपि रक्षितुं मरणात् त्रातुं शक्तः समर्थः भवति ? न कोऽपि इत्यर्थः। रज्जुच्छेदे रज्जौ छिन्नायां गुणे त्रुटिते सति, के जनाः घटं रज्जुबद्धं कलशं धारयन्ति कूपपतनाद् निवारयन्ति ? एवम् इत्थं वनानां वृक्षाणां तुल्यधर्मः लोकः जनः, काले काले यथाकालं छिद्यते लीयते नश्यति च, रोहति जायते च। यदा मृत्युकालः आयाति तदा न कोऽपि कमपि त्रातुं शक्नोति। जलोत्तोलनार्थं कूपे पतितस्य घटस्य यदा रज्जुः छिन्ना भवति तदा न कोऽपि तं घटं कूपपतनाद् निवारयितुंशक्नोति, एवंवृत्ताश्च नराश्च समानधर्माणः सन्ति, ते सर्वे प्रकृतेः समाननियमम् अनुवर्तन्ते। ते यथाकालं जायन्ते, यथाकालं म्रियन्ते च, कालोल्लङ्घनं न कदापि कुर्वन्ति। यथा वृक्षाः काले आगते रोहन्ति, काले प्राप्ते म्रियन्ते, तथैव लोका अपि यथाकाले जायन्ते, यथाकाले म्रियन्ते च। अस्मिन् श्लोके पूर्वार्धे दृष्टान्तः अलंकारः उत्तरार्धे तु उपमा। शालिनी वृत्तम्।



६.८ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान्–

- स्वप्नवासवदत्तं नाटकमस्य षष्ठः तथा अन्तिमाङ्कस्य कतिपयानां दृश्यानां मूलसंस्कृतपाठेन सह परिचयं प्राप्नोत्।
- तदुपरि उक्तसंस्कृतपाठानां असमीयानुवादस्य विषये अपि ज्ञातुं शक्तवान्।
- अतिरिक्ततया नायक–नायिकयोः पुनर्मेलनं कथं सम्पन्नमभूत् इति विषये अपि सम्यक् धारणा प्राप्नोत्।



६.९ ज्ञानाधिक्यम्

१) आयारः, ए. एस्. पी. (१९५७), भासः, मद्रासः: वी. रामस्वामी सन्स्तुलु एण्ड सन्स।

२) काले, एम्. आ. (१९८८), स्वप्नवासवदत्तम् अव भासः, दिल्लीः मोतिलाल बनारसीदास् पब्लिशर्स प्राइवेट लिमिटेड्।

३) पुचलकार, ए. डी. (१९६८), भासः -ए स्टाडि, दिल्लीः मुन्शिराम मनोहरलाल् ओरिएण्टल् पब्लिशर्स्एण्ड् बुक्सेलर्स्।

४) शर्मा, थानेश्वरः (१९९५), संस्कृतसाहित्यस्य इतिवृत्त, गुवाहटीः चन्द्रप्रकाशः।



६.१० अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : रैभ्यगोत्रीयः काञ्चुकीयः तथा धात्री वसुन्धरा।

प्रश्नः २ उत्तरम् : उदयनवासवदत्तयोः चित्रम्।

प्रश्नः ३ उत्तरम् : आवन्तिकया सह।

प्रश्नः ४ उत्तरम् : यौगन्धरायणस्य।

प्रश्नः ५ उत्तरम् : न्यासरूपेण रक्षितां स्वभगिनीरूपेण परिचितां वासवदत्तां प्रत्यानेतुं।

प्रश्नः ६ उत्तरम् : आम्, उदयनस्य वासवदत्तया सह पुनर्मेलनं अभवत्।



६.११ अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नः (५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: उज्जयिन्याः राजा तथा महिषी उदयनस्य समीपं किम् सन्देशं प्रेषितवत्यौ ?

ख) संक्षिप्तः प्रश्नः (१५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: षष्ठाङ्के वर्णितं पुनर्मेलनस्य दृश्यं स्वभाषया प्रस्तुतं कुरु।

ग) निबन्धरूप- प्रश्नः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: सम्पूर्णे नाटके षष्ठाङ्कस्य महत्वस्य विषये लिखतु।

प्रश्नः २: षष्ठाङ्कस्य सारांशं स्वभाषया लिखतु

*** ***** ***

अध्यायः ७ : अभिज्ञानशाकुन्तलम्-नाट्यकारकालिदासस्य परिचयः

अध्यायस्य संरचना

७.१ उद्देश्यम्

७.२ परिचयः

७.३ महाकविकालिदासस्य जीवनवृत्तम्

७.४ कालिदासस्य कृतयः, तेषाम् उत्साः च

७.५ कालिदासस्य शास्त्रवैदग्ध्यम् लेखनवैशिष्ट्यम् च

७.६ कालिदासकाव्येषु सौन्दर्यतत्त्वम्

७.७ अध्यायात् किमवगतम्

७.८ ज्ञानाधिक्यम्

७.९ अभ्यासप्रश्नाः

७.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- महाकवेः कालिदासस्य जीवनवृत्तान्तं ज्ञातुं शक्नुवन्ति।
- कालिदासस्य नाटकानां परिचयं ज्ञातुं शक्नुवन्ति।
- कालिदासस्य महाकाव्यद्वयस्य परिचयं ज्ञातुं शक्नुवन्ति।
- कालिदासस्य खण्डकाव्यस्य परिचयं ज्ञातुं शक्नुवन्ति।
- कालिदासकाव्येषु सौन्दर्यतत्त्वं ज्ञातुं शक्नुवन्ति
- कालिदासस्य काव्यप्रणयनशैलीं ज्ञातुं शक्नुवन्ति।

७.२ परिचयः

निखिलसंस्कृतवाङ्मयं दृश्यकाव्यं श्रव्यकाव्यञ्चेति भागद्वये विभक्तमस्ति। श्रव्यकाव्यस्यापि द्वौ भागौ स्तः। तद्यथा - गद्यकाव्यम् पद्यकाव्यञ्चेति। पद्यकाव्यस्य पुनः अनेकाः विभागा सन्ति। तद्यथा - महाकाव्यम्, खण्डकाव्यम्, संदेशकाव्यम्, मुक्तकाव्यम् चेत्यादयः। दृश्यकाव्यपरम्परायां नाटकस्य अन्यतमं स्थानं वर्तते।

समस्तसंस्कृतसाहित्ये महाकविकालिदासः सर्वविदितो वर्तते। अनेन महाकाव्यम्, खण्डकाव्यम् नाटकम् चेत्यादिविविधकाव्यभागानां संरचनं विहितम्।



ज्ञातव्यम्

(१) महाकविः कालिदासः न केवलं भारतस्य अपि तु विश्वस्य श्रेष्ठः कविः अस्ति।

(२) तस्य रघुवंशम्, कुमाररसम्थवम् चेति द्वे महाकाव्ये स्तः।

(३) महाकविः कालिदासः कविकुलगुरुः इति उपधिना विभूषितः।

(४) कालिदासस्य त्रीणि नाटकानि यथा-मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च प्रसिप्यानि।

(५) तस्य ऋतुसंहारम्, मेघदुतम् चेति द्वे खण्डकाव्ये स्तः।

७.३ महाकविकालिदासस्य जीवनवृत्तम्

महाकविः कालिदासः संस्कृतसाहित्यस्य श्रेष्ठः कविर्वर्तते। अयं महतो दुःखस्य विषयः यत् अस्य महाकवेः विषये किमपि प्रामाणिकं तथ्यं नोपलभ्यते। महाकवेः कालिदासस्य मातापितरौ कौ, ते कस्य प्रदेशस्य निवासिनः आसन् इत्यादिविषयाः स्पष्टं कुत्रापि न लभ्यन्ते। विद्वत् समाजः विविधायाः लोकपरम्परायाः आधारेण कालिदासस्य जन्मस्थानं निर्धारयितुं प्रयतते। कश्मीरप्रदेशस्थाः विद्वांसः कालिदासं कश्मीरी इति वदन्ति, तथा च उज्जयिनीप्रदेशस्य विद्वांसः तं उज्जयिन्याः निवासी इति मन्यन्ते। महाकविः स्वप्रणीते मेघदूतमिति खण्डकाव्ये मेघं दूतरूपेण गमनकाले उज्जयिनीं दृष्ट्वा गच्छतु इति उपदिष्टवान्। तस्मात् सः उज्जयिनीनिवासी इति साधयितुं प्रयतते विद्वत्समाजः। महाकवेः कालिदासस्य विषये प्रसिद्धा एका कथा अस्ति। यस्याः अनुसारं सः जीवनस्य प्राक्काले मूर्खः आसीत्। विद्वांसः षड्यन्त्रं कृत्वा तस्य विद्योत्तमया सह विवाहं साधितवन्तः। अनन्तरं स्वपत्न्या अपमानितः सन् सः वनं गतवान्। तत्र तस्य कठोरतपस्यायां सन्तुष्टा देवी काली तं असाधरणज्ञानस्य अधिकारिस्वरूपं वरं प्रदत्तवान्। प्राप्तशक्तिः सः गृहं प्रत्यागत्य स्वपत्नीम् अवदत्- 'अनावृतकपाटं द्वारं देहि' इति। तदानीं भार्या विद्योतमा तं 'अस्ति कश्चिद् वाग्विशेषः' इति प्रत्युवाच। कालिदासः स्वपत्नीमुखात् निःसृतान् एतान् शब्दान् आधारीकृत्य अस्ति इति शब्देन कुमारसम्भवम् इति महाकाव्यम्, कश्चित् इति शब्देन मेघदूतम् इति खण्डकाव्यम् तथा वाक् इति शब्देन रघुवंशम् इत्याख्यमहाकाव्यं विरचितवान्। यथा-

अस्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्यां इव मानदण्डः॥ (कुमारसम्भवम् १.१)

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः।
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः॥
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु।
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥ (मेघदूतम् पू.१)

वागार्थाविव संपृक्तौ वागार्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (रघुवंशम् १.१)

महाकवेः सन्दर्भे अन्याः अपि बहव्यः कथाः सुप्रथितास्सन्ति। एकस्याः अन्यकथायाः अनुसारं काऽपि वेश्या धनलोभेन कालिदासस्य वधं कृतवती। एषा लोकप्रियकथा लङ्काप्रदेशस्य राज्ञा कुमारदासेन सह सम्बद्धा अस्ति। अस्याः कथायाः अनुसारं महाकवेः मृत्युः लङ्कादेशे अभवत्। तृतीया कथा अपि प्रचलिता वर्तते। तदनुसारं असौ विक्रमादित्यराजस्य नवरत्नेषु अन्यतम आसीत्। अन्यैककथानुसारं सः राज्ञा भोजेन आश्रितः कविः आसीत्। एवं महाकवेः कालिदासस्य विषये बहवः प्रथिताः कथाः समुपलभ्यन्ते। महाकवेः जीवनकालस्य विषये अपि बहूनि मतानि सन्ति।

- सर विलियम् जोन्स इत्याख्यः महोदयः विक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तस्य सभायाः नवरत्नेषु एकं कालिदासं मत्वा ई० पू० प्रथमशताब्दः कालिदासस्य कालः मन्यते।
- डा० वेबर लोसन, याकोबि, मॉनियर विलियम् इत्यादीनां पाश्चात्यपण्डितानां मतानुसारं द्वितीयशतकस्य मध्यकालः कालिदासस्य कालः।
- डा० भाऊदाजी महोदयमते उज्जयिनीप्रदेशस्य राजा हर्षविक्रमादित्यः मातृगुप्तः इत्याख्यं कश्मीरप्रदेशासनाय प्रेषितवान्। सः मातृगुप्तः कालिदास एवेति मत्वा कालिदासस्य षष्ठशतकोद्भवत्वं स्वीकरोति।
- डा० हानले प्रभृतयो विद्वांसः कालिदासस्य काव्येषु गोप्ता-गोप्ने-कुभार-गुप्त-स्कन्धप्रभृतिशब्दान् अवलोक्य गुप्तवंशीयैः नृपैस्सह कालिदासस्य समयं पञ्चमं षष्ठं वा ईशवीयशतकं मन्यन्ते।
- ए० सी० चटर्जीमहोदयः कालिदासं मालबनरेशस्य यशोधर्मस्य समकालिकं मत्वा षष्ठशताब्दः कालिदासस्य कालः इति स्वीकरोति।
- आर० कृष्णमाचारियरवर्यः मेघसन्देशविमर्शनामके ग्रन्थे उल्लिखति यत् 'दिङ्नागानां पथि परिहरन्' इति श्लोकस्य प्रमाणेन कालिदासं षष्ठशतकजातस्य दिङ्नागकवेः समकालिकः इति स्वीकरोति।
- रामावतारशर्मवर्यः कालिदासं द्वितीयचन्द्रगुप्तस्य समकालिकं मत्वा ३७५ तः ४५० ई० इत्यनयोः मध्यवर्ती इति सप्रमाणं साधयति।

७.४ कालिदासस्य कृतयः, तेषाम् उत्साः च

केचन विद्वांसः कालिदासनाम्नः त्रयः पण्डिताः सन्ति इति अनुमान्ति। तदनुसारं सूक्तिमुक्तावल्यां राजशेखरप्रणीतायां निम्नाङ्कितं पद्यम् आधारस्वरूपम्।

एकोऽपि जीयते हन्त कालिदासो न केनचित्।

शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु।

केचन अत्र 'कालिदासत्रयी' पदस्य काव्यत्रये निरूढमर्थं स्वीकुर्वन्ति, भक्त्या कवीनां त्रयीति न गृह्णन्ति। अपरे केचन पुनः मुख्यम् अर्थमेव गृहीत्वा राजशेखरकाले कालिदासः इत्यभिधानाः

त्रयः कवयः प्रसिद्धाः आसन्निति मन्यन्ते।

महाकवेः कालिदासस्य ग्रन्थानां विभाजनं कर्तुं शक्यते प्रकारत्रयेण। तद्यथा - 'रघुवंशम्', 'कुमारसम्थवम्' चेति द्वे महाकाव्ये, 'मेघदूतम्', 'ऋतुसंहारम्' चेति खण्डकाव्यद्वयम्। तथा त्रीणि नाटकानि यथा - 'मालविकाग्निमित्रम्', 'अभिज्ञानशाकुन्तलम्', 'विक्रमोर्वशीयम्' च।

१. **रघुवंशमहाकाव्यम्** - रघुवंशे उनविंशतिसंख्यकाः सर्गाः सन्ति। अस्मिन् महाकाव्ये राज्ञः रघोः वंशस्य कथा निबद्धा अस्ति। राज्ञः दिलीपादारभ्य अग्निवर्णपर्यन्तम् अस्मिन् काव्ये इक्ष्वाकुवंशीयनृपाणां चरितानि समुपलभ्यन्ते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं दशरथसुतस्य रामस्य कथा वर्णिताऽस्ति। तदनन्तरं तत्वंशस्य तत्तन्नृपाणां चरितानि समुपन्यस्तानि सन्ति। केषाञ्चन विदुषां मतानुसारम् कालिदासेन रघुवंशस्य उत्तरसर्गा अपि विलिखिताः परन्तु ते न प्राप्यन्ते इति।

महाकाव्यमिदं वागर्थरूपशिवपार्वत्योः प्रार्थनया प्रारभ्यते। प्रथितः राजा दिलीपः अपत्यकामनया वसिष्ठाश्रमं गच्छति। कुलगुरुः सुरभिधेनोः शापनिवारणाय तं नन्दिनीसेवार्थम् उपदिशति। नन्दिनी तस्य त्यागभक्तिं अवलोक्य तस्मै पुत्रप्राप्तिरूपं वरं ददाति। तेन वरेण दिलीपपत्नी सुदक्षिणा रघुं प्रसूते। रघोः अजः, तथा अजात् दशरथाख्यः सुतः क्रमेण धरित्रीम् अपालयत्। दशरथेन सम्पन्नस्य पुत्रेष्टियज्ञस्य फलरूपेण रामः भरतः लक्ष्मणः शत्रुघ्नः च चत्वारः पुत्राः अभवन्। रामो जनकतनयां सीतां परिणयति। स हि स्वपत्नीलक्ष्मणाभ्यां सह कैकयीष्टवरहेतोः पितुः दशरथस्य आज्ञया चतुर्दशवर्षाणि वने निवसति। तत्र स सीतापहारकं रावणं हन्ति। रामस्य कुशलवाख्यौ द्वौ पुत्रौ स्तः। कुशकुमुद्वत्योः अतिथि इत्याख्यः सुतः जायते। तदन्वये एव राज्ञ अग्निवर्णस्य जन्म भवति। इत्थं सङ्क्षेपेण रघुवंशकथा। रघुवंशस्य प्रथमे सर्गे दिलीपसुदक्षिणयोः वर्णनम्, द्वितीये सर्गे नन्दिनीपरिचर्यावर्णनं, तृतीये सुदक्षिणायाः वर्णनं, चतुर्थे रघुदिग्विजयवर्णनं, षष्ठे इन्दुमतीस्वयंवरसभावर्णनं, सप्तमे अज-इन्दुमती-विवाहवर्णनं, अष्टमे अजविलापवर्णनम्, नवमे वसन्तवर्णनं मृगयावर्णनञ्च, दशमे भगवतः स्तुतिवर्णनम्, त्रयोदशे भूगोलवर्णनं, चतुर्दशे सीतापरित्यागः, षोडशे अजस्य अयोध्याप्रत्यागमनवर्णनम्, सप्तदशे जलविहारवर्णनम्, अष्टादशे अतिथेः राज्याभिषेकवर्णनम्, एकोनविंशतिसर्गे अग्निवर्णस्य कामकेलिवर्णनं विधीयते।

२. **कुमारसम्भवम्** - कालिदासप्रणीतं कुमारसम्भवमिति महाकाव्यं सप्तदशसर्गात्मकं वर्तते। कुमारसम्भवम् इत्याख्यं महाकाव्यं कालिदासस्य काव्यकल्पनाया रमणीयमुदाहरणम् अस्ति। केषाञ्चन मतानुसारं काव्यस्य अन्तिमनवसर्गाः कालिदासोत्तरवर्तिना केनचित् कविना विरचिता। महाकाव्यमिदं ऋतुसंहारमिव वस्तुनिर्देशमङ्गलाचरणेन प्रारभ्यते। यथा--

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधीवगाह्य स्थितः पृथिव्यां इव मानदण्डः॥ (कुमारसम्भवम् १.१)

उत्तरस्यां दिशि हिमालयो नाम नागाधिराजोऽस्ति। हिमालयादेव अप्सरसि मेनकायां भगवत्याः

पार्वत्या जन्म भवति। सा पिनाकपाणिं पतिरूपेण? प्राप्तुम् असाधारणतपस्यां करोति। तस्मिन्नेव काले तारकासुरेण पीडिताः देवताः तस्मात् प्रतीकारहेतोः परमेष्ठिनः पार्श्वं गच्छन्ति। सः तान् उपदिशति यत् तारकासुरस्य विनाशं शम्थोः वीर्यज एव कर्तुं प्रभवति। ततः पाकशासनो कामदेवं भगवतः शिवस्य समाधिभङ्गाय आदिशति। तथा कृते सति शिवस्य तृतीयनेत्रोत्पन्नवह्निना स्मरः भस्मीभूतः भवति। पार्वती स्वकामनापूर्तये पुनः कठोरं तपस्याम् आचरति। तस्याः तपस्यायां प्रसन्नः सन् शिवः तां स्वीकरोति। इत्थं कुमारसम्भवस्य कथा अग्रेसरति।

३. **मेघदूतम्** - गीतिकाव्यस्य अथवा खण्डकाव्यस्य परम्परायां श्रेष्ठत्वेन सम्मानप्राप्तमिदं खण्डकाव्यं पूर्वः उत्तरश्चेति भागद्वये विभक्तम् अस्ति। अस्य खण्डकाव्यस्य मल्लिनाथटीकायाम् अष्टादशाधिकशतं पद्यानि परिलक्ष्यन्ते। स्वामिनः कुवेरस्य वर्षभोग्येन शापेन स्वदेशं परित्यज्य रामगिरौ अधिवसन् कश्चित् यक्षः प्रियायै वार्तां प्रेषयितुमिच्छन् मेघं प्रार्थयते। सः रामगिरितः आरभ्य अलकापर्यन्तम् मेघं मार्गविषयेऽपि सूचयति। तदनुसारेण रामगिरितः आम्रकूटः, ततः नर्मदा, ततः वेत्रवती, ततः विदिशा, ततः वामदिशि विशाला, ततः कुरुक्षेत्रं, ततः कनखलं, ततः कैलाशः, ततः मानसं, ततः अलका इति गन्तव्यपन्था। ततश्च अलकानगर्यां गृहपरिचयाद् अनन्तरं सन्देशकथनं विहितमस्ति। सन्देशोऽयं अतीव मार्मिकः वर्तते। यथा-

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिराप्यते मे क्रूरस्तस्मिन् न सहते सङ्गमं नौ कृतान्तः।।

४. **ऋतुसंहारम्** - कालिदासप्रणीतं काव्यमिदं षट्सर्गात्मकम्। अत्र ग्रीष्मऋतोः आरभ्य वसन्तऋतुपर्यन्तं षट्संख्यकानाम् ऋतूणां साङ्गोपाङ्गवर्णनम् उपलभ्यते। ग्रन्थेऽस्मिन् १५३ संख्यकानि नानाछन्दोयुतानि पद्यानि सन्ति। एकैकस्मिन् सर्गे एकैकस्य ऋतोः वर्णनं विदधाति कविः। ग्रन्थोऽयं कालिदासस्य प्रथमकृतित्वेन गृह्यते समालोचकैः। तत्र ग्रीष्मवर्णनं यथा-

सितेषु हर्येषु निशालु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः।
विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम्।। [२९]

वर्षावर्णनं यथा -

निपातयन्त्यः परितस्तटदुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः।
स्त्रियः सुदुष्टा इव जातिविभ्रमाः प्रयान्ति नद्यस्त्वरित पयोनिधिम्।। [३०]
पयोधरैर्भीमगभीरनिस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम्।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्।। [३१]

शरद्वर्णनं यथा -

तारागणप्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा।
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रथात्यनुदिनं प्रमदेव बाला।। [३२]

हेमन्तवर्णनं यथा -

बहुगणरमणीयो योषितां चित्तहारी, परिणतबहुशालिव्याकुलग्रामसीमा।
विनिपततितुषारः क्रौञ्चनादोपगीतः, प्रदिशतु हिमयुक्तः काल एषः सुखं वः।। [३३]

शिशिरवर्णनं यथा –

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः, प्रबलसुरतकेलिर्जातकन्दर्पदर्पः।
प्रियजनरहितानां चित्तसन्तापहेतुः, शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम्।। [३४]

वसन्तवर्णनं यथा –

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोभम्।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयान्ति कान्ति प्रमदोजनानाम्।। [३५]

५. **अभिज्ञानशाकुन्तलम्** – महाकविकालिदासेन प्रणीतं शकुन्तलादुष्यन्तयोः प्रणयकथासम्बद्धम् इदं नाटकं कालिदासस्य प्रौढा कृतिः वर्तते। नाटकमिदं सप्तसु अङ्केषु विभक्तमस्ति। मृगयाव्यसनी राजा दुष्यन्तः मृगम् अनुधावन् महर्षेः कण्वस्य तपोवनं प्रविशति। तत्र स कण्वपालितां शकुन्तलामवलोक्य तया आकृष्टो भवति, शकुन्तलापि राज्ञा आकृष्टा भवति। उभौ गान्धर्वविधिना परिणीतौ स्तः। दुष्यन्तश्च शकुन्तलाम आश्वासं दत्वा शीघ्रमेव तां राज्यं प्रति आनयति इति प्रतिज्ञां विधाय नगरीं प्रत्यागच्छति। तद्विरहेन दुःखिता शकुन्तला एकदा दुर्वासामुनेः वाक्यं न शृणोति। तेन सा अभिशप्ता भवति यत् यं विचिन्त्य सा समुपस्थितां मुनिं दुर्वाससं उपेक्षितवती सोऽपि तां विस्मरतु इति। सखीभ्यां सेवया अनन्तरं सन्तुष्टः सः मुनिः कथयति यत् सः राजा पश्चात् भिज्ञानदर्शनेन तां शकुन्तलां स्मरिष्यतीति। तीर्थयात्रातः प्रत्यागतः कण्वऋषिः सगर्भां पुत्रीं यथोचितप्रकारेण पतिगृहं प्रेषयति। मार्गे शचीतीर्थे स्नानसमये अभिज्ञाननिमित्ता अङ्गुलिमुद्रा जले पतति। शापप्रभावेन प्रियां दुष्यन्तः विस्मरति। तथोपेक्षितां तां तस्याः माता मेनका मारीचमुनेः महर्षेः आश्रमं नयति। तत्रैव सा भरतं सूते। धीवरात् अङ्गुलीयकं प्राप्य लब्धस्मृतिः सः राजा दुष्यन्तः प्रियानिमित्तं भृशम् अनुतप्तो भवति। युधि पुरन्दरसाहाय्यं कृत्वा प्रतिनिवर्तमानो राजा मारीचाश्रमे सपुत्रां शकुन्तलां पश्यति। ततश्च मारीचेन आशिषौ उभौ दम्पतीसुखमनुभवतः। नाटकमिदं सर्वोत्कृष्टकृतिषु अन्यतमम् इति सम्मतम्। उच्यते हि—

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽकस्तत्र श्लोकचतुष्टयम्॥

६. **मालविकाग्निमित्रम्** – कालिदासप्रणीतं मालविकाग्निमित्रम् इत्याख्यं नाटकं पञ्चसु अङ्केषु विभक्तं वर्तते। अत्र धीरललितप्रकृतेः अग्निमित्रः इत्याख्यः नायकः। नायिका च अस्ति मालविका। नायकः अग्निवर्णः शुङ्गवंशीयः राजा, नायिका च विदर्भदेशस्य राजकुमारी। कालिदासप्रणीतं नाटकमिदम् उत्तरवर्तिनां श्रीहर्षादीनामपि उपजीव्यं भवति। नाटकेऽस्मिन् सर्वत्र वैदर्भी रीतिः प्रसादश्च गुणः च दृश्यते। गणदासहरदत्तयोः विवादप्रसङ्गो नाटकमिदं रञ्जयति विशेषेण। स्त्रीप्रधानमिदं नाटकं नाटिकाप्रकृतिकम् अस्ति।

७. **विक्रमोर्वशीयम्** – कालिदासप्रणीतं विक्रमोर्वशीयम् इत्याख्यं त्रोटकम् पञ्चस्वङ्केषु विभक्तं

वर्तते। अत्र पुरुरवोर्वश्योः प्राधान्येन प्रणयकथा वर्णिताऽस्ति। परस्परम् अवलोकनेन तौ स्नेहाद्रचितौ भवतः।

७.५ कालिदासस्य शास्त्रवैदग्ध्यम्, लेखनवैशिष्ट्यम् च

कालिदासप्रणीतेषु काव्येषु प्रकृतेः चित्रणं, नारीचरित्राणां चित्रणं, पुरुषचरित्राणां चित्रणं, अलङ्कारयोजना, छन्दमाला, सौन्दर्यतत्त्वं प्रणयवर्णनम्, नैतिकोपदेशः, आचारः, सिद्धान्तः चेत्यादयः अवर्णनीयाः अकल्पनीयाश्च सन्ति। समालोचकानां मतानुसारं यस्य काव्ये कलापक्षस्य अपेक्षया हृदयपक्षस्य चमत्कारिता आधिक्येन वर्तते, स श्रेष्ठकविरिति घोष्यते। एतदनुकूलं हृदयपक्षस्य चमत्कारत्वं कालिदासप्रणीतेषु काव्येषु सर्वत्र प्राप्यते। कालिदासो स्वकाव्येषु विषयवर्णनावसरे रसस्य उपस्थापनं मनोरमपद्धत्या विधत्ते। मानवजीवनस्य सर्वाङ्गमण्डितं चित्रं चित्रितुम् असौ रघुवंशम् इत्याख्यं महाकाव्यं प्रणीतवान्। पार्वतीदेव्याः कठोरतपस्याप्रभावं, रतिकामदेव्योः प्रणयवर्णनं, रतिविलापः चेत्यादिविषयमधिकृत्य कुमारसम्थवमज्ञाकाव्यं निर्माति। कविः रघुवंशे स्वयंवरवर्णनावसरे मनोभावज्ञानस्य प्रकृष्टः परिचयं प्रदत्तवान्, राज्ञः दशरथस्य अपत्याभावकाले मुनिशापावसरोत्थाभिरुक्तिभिः अपत्यहीनतायाः क्लेशावस्थायाः वर्णनं कृतम्, सीतादेव्याः परित्यागसमये रामस्योक्तिषु कर्तव्यपरयणता दृश्यते। मेघदूतमित्याख्ये ते खण्डकाव्ये कालिदासः विरहिणः लोकस्य मनोवस्थायाः वर्णनं विहितम्। पूर्वमेघे प्रथमतः अन्तिमपर्यन्तं बाह्यप्रकृतेः चित्रम् अङ्कितम्, तथैव उत्तरमेघे अन्तप्रकृतेः चित्रणम्। सन्देशप्रेषणकार्यम् आधारीकृत्य विहिता काव्यप्रणयनप्रवृत्तिः पुराणेषु रामायणे महाभारते च परिलक्ष्यते। नलोपाख्याने हंसेन संवादप्रेषणम्, युधिष्ठिरेण कृष्णद्वारा संवादप्रेषणम्, रामेण हनूमता संवादप्रेषणम् चेत्यादयः प्रसिद्धाः सन्ति। कालिदासः रामायणम् आधारीकृत्य मेघदूतं विरचितवान् इति कथनम् असत्यं न। रामायणस्य आधारेण प्रणीतम् अपि खण्डकाव्यमिदं स्वकीयां मौलिकतां न परत्यजति। मौलिकता हि कथायाः अनुकरणमात्रेण नापहीयते, अपि तु मौलिकत्वं नूतनया पद्धत्या पद्यनिर्माणे, कथायाः उपस्थापने च वर्तते। कविना माघेन अपि पुराणेतिहासप्रथितं वृत्तमाधारीकृत्य शिशुपालवधम् इत्याख्यं महाकाव्यं प्रणीतम्। तथापि तस्य मौलिकत्वम् अक्षतमेव, तथैव मेघदूतस्यापि मौलिकता वर्तते नूतनशैल्या मनःस्थितिचित्रणकार्ये।


सुविदितमेव अस्ति यत् - उपमा कालिदासस्येति। उपमायाः प्रयोगक्षेत्रे कविकुलगुरुः महाकविकालिदासः अखिलसस्कृतसाहित्यवाङ्मये सर्वान् कवीन् अतिशेते। यद्यपि अन्ये कवयोऽपि उपमायाः सुप्रयोगं विदधति तथापि तत् रमणीयकत्वेन, यथार्थत्वेन, प्रकृत्यनुरूपनिरूपकत्वेन, दोषरहितत्वेन च कालिदासविहितां उपमां नातिशेते। महाकवेः कालिदासस्य उपमा सरला सरसा स्वाभाविका च वर्तते। यथोक्तं तेन रघुवंशमहाकाव्ये -

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पर्तिवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥

रघुवंशमहाकाव्यस्य श्लोकेऽस्मिन् राजकन्यायाः इन्दुमत्याः स्वयम्बरवर्णनं समुपलभ्यते।

स्वस्य वरं वरणार्थं चलन्ती इन्दुमती दीपशिख इव वर्णिता अस्मिन् श्लोके। अस्मात् श्लोकादेव कविकूलगुरोः दीपशिखा इति उपाधि सञ्जातः। कालिदासस्य रघुवंशम् इति महाकाव्यम् उपमया एव प्रारम्भं भवति। यथा -

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेदवरौ॥



अग्रगत्याः निरीक्षणम्

प्रश्न १: काव्येषु किं रम्यम्?

.....

प्रश्न २: दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम?

.....

प्रश्न ३: अभिज्ञानशाकुन्तलनाट्ये कति अङ्काः सन्तिः?

.....

प्रश्न ४: मेघदूतस्य कविः कः?

.....

प्रश्न ५: रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

.....

प्रश्न ६: कालिदासेन कति नाटकानि विरचितानि?

.....

प्रश्न ७: कालिदासेन विरचितानां नाट्यग्रन्थानां नामानि लिखत।

.....

प्रश्न ८: ऋतुसंहारे केषां वर्णनम् अस्ति?

.....

श्लोकोऽयं पूर्णोपमायाः सुन्दरदृष्टान्तोऽस्ति। प्रशस्तवैवस्वतमनोः वंशे दिलीप नाम राजा आसीत्। तस्या पत्नी आसीत् इव सुदक्षिणा। सन्तानप्राप्तेः मनोरथेन नन्दिनीं सेवमाना सुदक्षिणा धेनोः मार्गं अनुवर्तमाना 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' इत्यनेन उपमीयते। अर्थात् यथा स्मृतिशास्त्रं श्रुतेः अर्थात् वेदस्य अर्थम् अनुकरोति तथैव दिलीपपत्नी सुदक्षिणा धेनोः मार्गम् अनुवर्तते। श्लोकेऽस्मिन् पूर्णोपमा विद्यते।

मेघदूतमिति खण्डकाव्ये उपमावर्णनं दर्शनीयम्। यथा--

तस्योत्सङ्गे प्रणयिन इव स्त्रस्तगङ्गादुकुलाम्।
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्।

तथैव अभिज्ञानशाकुन्तलम् इति सुप्रसिद्धं नाटकं उपमानां भाण्डारगृहमिव। नाटकस्य

नायिकां कण्वपालितां शकुन्तलां मालिनीतटे अवलोक्य राजा दुष्यन्तः तस्याः यौवनमेवं वर्णयति-

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

शकुन्तलायाः यौवनस्य साम्यं कूसुमेन सह क्रियते। शकुन्तलायाः अद्भुतसौन्दर्यं दृष्ट्वा तस्याः परिणयविषये सन्देहयुक्तः सन् किकर्त्तव्यविमूढः राजा इत्थं चिन्तयति -

इदमुपनतमेवं रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं न च खलु परिभोक्तुं नैव शक्नोमि हातुम्॥'

पूर्णोपमायाः उत्कृष्टं निदर्शनमिदम्। इत्थं कालिदासस्य कृतिषु उपमाया आधिक्यत्वं उत्कृष्टत्वञ्च विराजते। महाकवेः कालिदासस्य शब्दविन्यासः अपि अन्यकवेः अपक्षया विलक्षणः एव अस्ति। यथा —

'ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिनिषङ्गादुद्धत्तु मैच्छत् प्रसभोद्धृतारिः॥'

तथा च

'तमार्यगृह्यं निगृहीतधेनुमनुष्यवाचा मनुवंशकेतुम्।
विस्मावयन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिहः॥'

'इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण।
एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः॥'

एतादृशस्य शब्दविन्यासस्य निर्माणं न कोऽपि अन्यकविः कर्तुं प्रभवति। तथैव कुमारसम्भवमहाकाव्यस्य प्रथमसर्गे हिमालयवर्णनावसरे वास्तविकवस्तूनाम् उपस्थापने या शैली काव्यकला वा तेन विहिता सा नितान्तमेव प्रशंसनीया वर्तते।

७.६ कालिदासकाव्येषु सौन्दर्यतत्त्वम्

कालिदासस्य कृतिषु सौन्दर्यावधारणा इति एक चर्चाविषयो वर्तते। तत्प्रणीतेषु काव्यनाटकेषु विशेषतः सौन्दर्याधायकानि तत्त्वानि प्रकृष्टेन दरीदृश्यन्ते। अभिज्ञानशाकुन्तलनाटके कविना शकुन्तला प्रकृतेः प्रत्येकोपादानेभ्यस्सह तुल्यते। 'विटपानुकारिणौ बाहू' इत्यत्र शकुन्तलायाः हस्तौ पादपशाखया सह तुल्यते। महाकविना कालिदासेन प्राकृतिकसौन्दर्यं श्रेष्ठरूपेण परिगण्यते। तेन अभिज्ञानशाकुन्तले सरसिजमनुविद्धमित्यादिना श्लोकेमाध्यमेन सौन्दर्यतत्वं बहूधा समुपस्थापितम्। कालिदासप्रणीतासु निर्मितिषु अनाहार्यसौन्दर्यस्य मान्यता समधिका वर्तते। स्वाभाविकं वस्तु अनाहार्यस्वरूपं तथा कृत्रिमत्वम् आहार्यस्वरूपं भवति। तत्प्रणीतकाव्यनाटकेषु विविधावसरेषु स्वाभाविकसौन्दर्यजातस्य वस्तुनः उपस्थिति आधिक्येन परिलक्ष्यते। तेन प्रतिपादिता अनाहार्यसौन्दर्यस्य निदर्शनानि लेखस्य अस्य अग्रे सप्रपञ्चं आलोच्यते।

रमणीयत्वं तत्रैव वर्तते यत् प्राकृतिकरूपेण सौन्दर्य भवति। अतः कलिदासः स्वकाव्येषु प्राकृतिकसौन्दर्यम् अत्यधिकं महत्वं प्रदीयते। कुमारसम्भवे कालिदासेन देव्याः पार्वत्याः

यथार्थसौन्दर्यचित्रणं करोति। यद्यपि देवी पार्वती शिवप्रणयाभिलषिता आसीत्, वस्तुतः सा प्रकृता शिवभक्ता आसीत्। 'पक्वविम्बाधरोष्ठी' इत्यादिश्लोकमाध्यमेन मदनचतुरतया भगवान् शिवः क्षणिकमात्रं देवीं पार्वतीं प्रति समुद्भवम् आकर्षणं प्रेक्षणीयं वर्तते। मध्ये श्यामा इत्यादिश्लोकेन सम्पूर्णमेघदूते यक्षपत्नी सौन्दर्यस्य विविधप्रकारेण पाठकसमाजे समानीता। श्लोकोऽयं विशेषतया रमण्याः शारीरिकं विन्यासं प्रदर्शयति। तथैव रघुवंशे न केवलं नायकानां अपि तु नायिकानां सौन्दर्यवर्णनं पाठके समागतम्। कविकुलगुरोः कालिदासस्य निर्मितिषु सोन्दर्यप्रसङ्गो बहुधा प्रख्यापितोऽस्ति। विविधप्रकाराः सुवर्णिताः सन्ति। पात्राणि, कथाः, लेखनशैल्यः यद्यपि प्रतिकाव्यं भिन्नाः सन्ति परन्तु तत्कृतनिर्मितिषु सौन्दर्यावधारणाया आधारस्तु एक एव। यथा अभिजानशाकुन्तले शकुन्तला, विक्रमोर्वशीये उर्वशी, कुमारसम्भवे पार्वती, मेघदूते यक्षिणी चेत्यादीनि चरित्राणि पाठकसमाजे सोन्दर्यसूत्ररूपेण हृदयानि आकर्षयन्ति। महाकविकालिदासवर्णितानि काव्यगतचरित्राणि सौन्दर्याधायकानि दृश्यन्ते। महाकवेः काव्यकृतिषु सौन्दर्यतत्वस्य केन्द्ररूपेण नारीचरित्राणि मुख्यानि वर्तन्ते। अनेन न केवलं मानवसौन्दर्यस्य प्रकृतिसौन्दर्यस्यापि हृदयाकर्षकं चित्रं चित्रितम्। नारीदेहे यथा अलौकिकसौन्दर्य वर्तते तथैव अलौकिककान्तिः प्रकृतेः विविधोपकरणेष्वपि अवलोक्यते। प्रकृतिगतं वस्तु सुन्दरं प्रतिभातीति प्रकृतिसमराजा कालिदासेन विविधस्थलेषु वर्णितम्। यथा अभिज्ञानशाकुन्तत्रे शकुन्तला प्रकृत्या रमणी कन्या अस्ति। तत्र शकुन्तलाया अवयववर्णनावसरे प्राकृतिकोपादानस्य मनोज्सन्निवेशः रक्षणीयो वर्तते। यथा -

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

श्लोकेऽस्मिन् प्रकृतेः यादृशं चित्रं चित्रितं तत् केवलं कालिदास इव सूक्ष्मद्रष्टा एव चित्रितुं प्रभवति न चान्ये चित्रितुं प्रभवन्ति। तथैव महाकविः शकुन्तलायाः पतिगृहगमनानुमतिप्रदाने प्राकृतिकोपादानेषु चैतन्यम् आरोप्य पाठकहृदयम् अभिव्यञ्जयति। यथा-

अनुमतगमना शकुन्तला सा तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यदासीत्प्रतिबचनीकृतमेभिरात्मनः॥

इत्थं बहुषु स्थानेषु महाकविकालिदासप्रख्यापिता सौन्दर्यावधारणा स्फुटरूपेण निगदिता वर्तते। आदिकवेः युगादारभ्य एव नारीसौन्दर्यवर्णनस्य स्पष्टं साक्ष्यमुपलभ्यते। रूपचर्चायां कविकुलगुरोः कालिदासस्य अद्वितीयं स्थानं वर्तते। महाकवेः सौन्दर्यावबोधनाय आदिकवेः वाल्मीकेः कृतिः नूनम् अधितव्या। यतो हि कविकालिदासेन महामुनेः वाल्मीकेः सोन्दर्यविषयकतत्वम् आधाररूपेण गृहीतम् इति प्रतिभाति। प्रकृतिसौन्दर्यं भवतु अथवा मानवसौन्दर्यम्, उभयसौन्दर्यवर्णनप्रसङ्गे कालिदासः वाल्मीकिमुनेः ऋणी इति प्रतिभाति। यथोक्तं तेनैव रघुवंशस्य प्रथमसर्गे --

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः।
मणौ बज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥'

अर्थात् महाकवेः धीः वाल्मीकिप्रणीतस्य रामायणाख्यस्य महाकाव्यस्य साहाय्येन दुष्करेऽपि

रघुवंशे तथैव प्रविशति यथा अतिकोमलमपि सूत्रं हीरकरत्नसूचीकृतेन रन्ध्रेण कठिनेऽपि मणौ प्रविशति। वाल्मीकिप्रभृतीनां पूर्वकवीनां काव्यकृतिसाहाय्येनैव असौ रघुवंशम् इत्याख्ये महाकाव्यनिर्माणे समर्थो जात इति कवेः कालिदासस्य आशयः। रघुवंशं नायिकाबहुलं महाकाव्यं वर्तते। यत्र आपन्नसत्वायाः सुदक्षिणायाः, स्वयम्बररमण्या इन्दुमत्याः, देव्याः सीतायाः, राज्ञः कुशस्य भार्याणां स्वभावसौन्दर्याणि सुष्ठु वर्णितानि। दिलीपपत्न्याः सुदक्षिणायाः चरित्रचित्रणे कालिदासेन समस्तानि वर्णनकौशलानि संगृहीतानि। शरीरदोर्बल्याद् परिमितभूषणायाः सुदक्षिणायाः मुखवर्णः लोधपुष्पवर्णसमान इति प्रतिभाति। पाण्डुमुखेन सुशोभिता सा प्रातःकाले क्षीणप्रकाशेन चन्द्रेण युक्ता विरलनक्षत्रा रात्रिः भाति। तदेवोक्तं रघुवंशे-

शरीरसादादसमग्रभूषणा मुखेन साऽलक्ष्यत लोधपाण्डुना।
तनुप्रकाशेन विचेयतारका प्रमातकल्पा शशिनेव शर्वरी।।

शरीरदौर्बल्याद् पाण्डुवर्णमुखेन उपलक्षिता अपि सौन्दर्यप्रतीत्यर्थं महाकविना विहिता उपमानयोजना प्रशंसनीया वर्तते। नारीसौन्दर्यवर्णने कवेः कालिदासस्य दृष्टिः सूक्ष्मा वर्तते। अन्यनायिकानां मुखानि यथा आद्रकेसरसुगन्धियुक्तानि इति वर्ण्यन्ते तथैव सूक्ष्मनिरीक्षणशक्त्या कविना सुदक्षिणाननं मृत्सुरभिः युक्तमिति इति प्रतिपाद्यते। यथोक्तं तेन-

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्लवम्।।

पुनः रघुवंशे प्रतिपादिता द्वितीया नायिका इन्दुमती अधृष्टा साहसिका चेति वर्ण्यते। यथा-

तामग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनूनाम्।
विधाय सृष्टि ललितां विधातुर्जगाद भूयः सुदतीं सुनन्दा।।

विधातुः ब्रह्मणो ललिता सृष्टिः वर्तते अजप्रिया इन्दुमती। इन्दुमत्याः कृते कालिदासेन 'रम्भोरु', 'करभोपमरुः', 'चकोराक्षिः', 'मततचकोराक्षिः', 'इन्दुप्रभा', 'अरालकेशी', 'नितम्बगुर्वी' चेत्यादीनि विशेषणानि प्रयुक्तानि। तदनन्तरं रामचन्द्रेण प्रयुक्तेषु 'आयताक्षिः', 'करभोरुः', 'मृगप्रेक्षिणि' इत्यादिषु सम्बोधनेषु देव्याः सीतायाः सौन्दर्यवर्णनस्य आभासः प्राप्यते। सीताविरहावसरं स्मृत्वा रामचन्द्रेमुखेन यत् वर्णनम् समुपस्थापितं तत् अवश्यमेव प्रेक्षणीयं वर्तते -

इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनमां।
त्वत्प्राप्तिबुदध्या परिरन्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः।।

अर्थात् कुचवत् मनोहरपुष्पगुच्छाभ्यां विनतां पुरोवर्तिनीं तटाशोकलतां सीताप्राप्तिरिति मत्वा आलिङ्गनेच्छया अश्रुसिक्तो रामचन्द्रो लक्ष्मणेन निवारितः। तथा सीतादेव्याः सौन्दर्यं कुमारसम्थवस्य 'पर्याप्तपुष्पस्तबकावनमा' इति पार्वत्याः सौन्दर्यवर्णनेन उपमीयते इति प्रतिभाति। यथा-

आवर्जिता किं चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तबकावनमरा सञ्चारिणी पल्लविनी लतेव॥

तथैव रघुवंशस्य षोडशतमे सर्गे जलविहारे निरतानां कुशदाराणां चरित्रं सुन्दरतया उपस्थापितं वर्तते। तासां क्रीडावर्णनं महाकविना इत्थं प्रतिपाद्यते --

एताः करोत्पीडितवारिधारा दर्पात्सखीभिर्वदनेषु सिक्ताः।
वक्त्रेतराग्रैरलकैस्तरुण्यश्चूर्णारुणान्वारिलवान्वमन्ति।।

कविकालिदासेन तत्कृतकाव्येषु अलङ्कार- भूषणादयः शब्दाः प्रायः स्वर्णमणिभिः निर्मितालडकारिकाणां कृते प्रयुक्ताः। मण्डनशब्दः प्राकृतिकोपादानानां पुष्पचन्दनपल्लवादीनां वर्णनप्रसङ्गे प्रयुज्यते। अनेन रूपचर्चायाम् अलङ्काराणां उपयोगिता तथा नापक्षीयते इति प्रतिभाति। यतो हि वल्कलधारिणी अपि शकुन्तला तथैव रम्यते यथा पङ्कमध्ये शैवलेन अनुविद्धं कमलम्। यथोक्तं तेन --

सरसिजमनुविद्धं शैवालेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमिधकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

वल्कलप्रभृतिना प्राकृतिकोपादानेन कृतसज्जाया अपि शकुन्तलायाः सौन्दर्यं नूनमपि ह्रासं न जातम्। तथैव विक्रमोर्वशीये उर्वश्याः देहाभरणस्यापि आभरणमस्ति इति महाकविना समुपस्थापितम् --

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः॥

नारीसौन्दर्यवर्णनप्रसङ्गे दुष्यन्तमुखकमलव्याजेन शकुन्तलायाः कृते निःसृताः महाकविकृताः नैकाः श्लोकाः प्रेक्षनीयाः वर्तन्ते। दुष्यन्तदृष्ट्या शकुन्तला सृष्टिकर्तुः ब्रह्मणो मानसिककल्पनायाः श्रेष्ठा रचना वर्तते। विधातोः निर्मानकौशलम् अवलोक्य एतदेव जायते यत् सः सम्पूर्णसंसारस्य सौन्दर्यं संकलयन् एकस्मिन् शरीरे समावेशं करोति। तदेवोक्तं निम्नोक्तेन श्लोकमाध्यमेन--

चित्रे निवेश्य परिकल्पितसर्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सामे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।।

पुनः शकुन्तलायाः सौन्दर्यं दिव्यरूपे चित्रितं महाकविना। यथोक्तं तेन --

मानुषीषु कथं वा स्यादस्य रुपस्य संभवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्।

कालिदासस्य समग्ररचनाः व्यञ्जनया युताः वर्तन्ते। कुमारसम्थवे पार्वत्याः नवयौवनागमस्य प्रकाशको निम्नोक्तः श्लोकः प्रेक्षणीयो वर्तते -

उन्मीलितं तूलिकयेव चित्रं सूर्याशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्यश्चतुरस्त्रशोभि वपुर्विभक्तं नवयौवनेन।।

श्लोकेऽस्मिन् देव्याः पार्वत्याः नवयोवनोटभ्भिन्नानाम् अङ्गानाम् उपमानेन वर्णनं विधीयते। यथा तूलिकासञ्चालनेन चित्रे सौन्दर्यस्य अवतरणं भवति, यथा सूर्यकिरणस्पर्शेण शतपत्रकमलं विकसति तथैव नवयौवनागमनेन पार्वत्या अङ्गरेखाः शनैः शनै उन्मीलिता इति स्पष्टम् अवलोक्यते। ज्ञातव्यमस्ति यत् प्रारम्थे मुकुलितावस्थायां कमले अथवा चित्रे पत्राणां रेखानां च अलस्थितिः वर्तते एव। परन्तु तेषु तादृश उन्मेषो न वर्तते। तद्वत् अङ्गानाम् अस्तित्वं बाल्यकालादेव अस्मद्शरीरे वर्तते एव परन्तु यौवनागमनेनैव तेषाम् अङ्गानां पूर्णविकासः सम्थवति। एतादृशा व्यञ्जना निस्सन्देहं प्रशंसनीया वर्तते। कालिदासकृतिषु पुरुषपात्रेषु वीरता दृढ़ता गम्भीरता चेत्यादयो गुणाः समाबद्धाः वर्तन्ते। महाकविकृते रघुवंशे पुरुषपात्राणां सौन्दर्यवर्णनोपस्थापनम् अन्यकाव्यापेक्षया आधिक्येन दृश्यते। रघुवंशे राज्ञो दिलीपस्य चरित्रचित्रणे शारीरिकसौन्दर्यस्य न्यूनेन तथा अन्तःसौन्दर्यस्य आधिक्येन वर्णनं प्रस्फुटितं वर्तते। यथोक्तं तत्र-

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः॥

नन्दिन्याः सेवायां निरतावसरे स्वसामाज्यमपि परित्यक्तुं असौ कुण्ठितो न जातः। तस्मिन् क्षणेऽपि तन्मुखे यत्तेजः अवलोक्यते तत्तेजसा दूरादेव सः स्पष्टतया चिह्नितो जातः। यथा प्रतिपादितं महाकविना-

निवर्त्य राजा दयितां दयानुस्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां जुगोप गौरूपधरामिवोर्वीम्?॥

रघुवंशे उपस्थापितेषु राजचरित्रेषु राज्ञ अजस्य सर्वाधिकसौन्दर्यस्य प्रतीतिः भवति। महाकविना पुरुषसौन्दर्यम् आधिक्येन नोपस्थापितं तथापि अजसौन्दर्यवर्णने तेन सर्वाणि कौशलानि प्रयुक्तानि दृश्यन्ते। कालिदासकाव्येषु प्रकृतिवर्णनं तु गगनं स्पर्शयति। क्वापि यदि प्रकृतेः मानवीकरणं सञ्जायते क्वापि च प्रकृतिमानवयोः साहचर्यम् अवलोक्यते। कालिदासप्रणीतम् अभिज्ञाशाकुन्तलं प्रकृतिमानवोभयसौन्दर्यस्य उत्कृष्टं निदर्शनं वर्तते। सर्वोत्कृष्टं वैशिष्ट्यमेतदेव यत् कालिदासस्य प्रकृतिवर्णने मनुष्यसत्ता अन्तर्निहिता वर्तते। शकुन्तलायाः सौन्दर्यवर्णनं प्राकृतिकोपादानेन समाबदधं प्रतिभाति। कवेः सौन्दर्यनिरीक्षणशक्तिः सूक्ष्मा वर्तते। अनेन सूक्ष्मदृष्ट्या चित्रितस्य प्रकृतेः सूक्ष्मातिसूक्ष्मं रहस्यं मानवहदयम् आह्लादयति। अनेन प्रतिपादिते प्रकृतिवर्णने एतावता सजीवता समागच्छति यत् पाठकानां नेत्रसमक्षं प्रकृतिः नृत्यन्तीति प्रतिभाति। कालिदासेन तत्कृतेषु प्रत्येककाव्येषु नाटकेषु च प्रकृतिवर्णनं साधितमेव। परन्तु स्वतन्त्ररूपेण प्रकृतिचित्रणे ऋतुसंहारस्य अन्यतमं स्थानं वर्तते। ऋतुसंहारस्य प्रथमे पद्ये ग्रीष्मऋतोः सजीवं चित्रणं दृष्टिसमक्षमायाति। तद्यथा-

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसंचयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयारामुपागतः प्रिये॥

मेघदूते प्रकृतिमानवयोः तादात्म्यं उपस्थाप्य समाजसमक्षं सौन्दर्यस्य भिन्नमेकं स्वरूपम् आनयति कविः कालिदासः। पूर्वमेघे प्रधानतया बाह्यरूपं चित्र्यते। तत्र मानवीयसंस्पर्शोऽपि वर्तते। मेघदूते मेघो येन मार्गेण यात्रां करोति तत् स्थलं स्ववैशिष्ट्येन प्रभावयति इति बहूधा प्रतिभाति।

मार्गवर्णने मेघव्याजेन महाकविः प्रकृतेः यादृशं रूपं चित्रितं तत् अकल्पनीयं वर्तते। यथा -

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैः-
आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥

अर्थात् सारङ्गा अर्धजातैः केसरैः पलाशवर्णकृष्णलोहितं स्थलकदम्बपुष्पम् अवलोक्य आविर्भूताः प्रथमकुड्मलाः कदली च भक्षयित्वा अरण्ये सुरभियुतं पृथिव्याः गन्धं चाघ्राय मेघं मार्गविषयं सूचयति। प्रकृत्या सह मनुष्यानां घनिष्ठसम्बन्धो वर्तते। एतदेव कारणं यत् प्रकृतिसौन्दर्यं मनुष्यान्तःकरणं प्रभावयति।



७.७ अध्यायात् किमवगतम्

- अस्य पाठस्य अध्ययनेन वयं महाकवेः कालिदासस्य परिचयं जानीमः।
- अस्य पाठस्य अध्ययनेन वयं महाकवेः कालिदासस्य नाटकानां परिचयं प्राप्नुमः।
- अस्य पाठस्य अध्ययनेन वयं कालिदासस्य महाकाव्यद्वयस्य परिचयं प्रातुं शक्नुमः।
- अस्य पाठस्य अध्ययनेन वयं कालिदासस्य खण्डकाव्यस्य परिचयं प्रातुं शक्नुमः।
- अस्य पाठस्य अध्ययनेन वयं कालिदासकाव्येषु सौन्दर्यतत्त्वं जानीमः।
- अस्य पाठस्य अध्ययनेन वयं कालिदासस्य काव्यप्रणयनशैलीं जानीमः।



७.८ ज्ञानाधिक्यम्

१) कालिदास का सौन्दर्यबोध - रानी त्रिपाठी मुकुल, परिमल पब्लिकेशन, दिल्ली, २०१५
२) सौन्दर्यतत्वम् - Surendra Dr. Gupta - भारती भण्डार लीडर प्रेस।
३) अभिजानशाकुन्तलम् - द्विवेदी शिवप्रसाद- भारतीय विद्या प्रकाशन, वाराणसी।
४) अभिज्ञानशाकुन्तलम् - सुधाकर डाए मालवीयः - चौखम्बा कृष्णदास अकादमी , वाराणसी, २०११।
५) मेघदूतम् - शास्त्री डाए दयाशङ्करः - चौखम्बा सुरभारती प्रकाशन, वाराणसी।
६) कुमारसम्थवम् - परमेश्वरदीन पए पाण्डेयः - चौखम्बा कृष्णदास अकादमी, वाराणसी।
७) ऋतुसंहारम् - लक्ष्मीप्रपन्नाचार्य श्री - कृष्णदास अकादमी, वाराणसी।



७.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : नाटकम्।

प्रश्नः २ उत्तरम् : भरतः।

प्रश्नः ३ उत्तरम् : सप्त।

प्रश्नः ४ उत्तरम् : कालिदासः।

प्रश्नः ५ उत्तरम् : नवदश।

प्रश्नः ६ उत्तरम् : त्रीणि।

प्रश्नः ७ उत्तरम् : मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् चेति।

प्रश्नः ८ उत्तरम् : षड्ऋतुणाम् वर्णनम् अस्ति।



७.१० अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः १: राज्ञः दिलीपस्य वर्णनं कस्मिन् महाकाव्ये प्राप्यते ?

प्रश्नः २: रघुवंशमहाकाव्ये मङ्गलाचरणे कयोः स्तुतिः विधीयते ?

प्रश्नः ३: सीतापरित्यागः रघुवंशस्य कस्मिन् सर्गे प्राप्यते ?

प्रश्नः ४: कुमारसम्भवे कति सर्गाः सन्ति ?

प्रश्नः ५: हिमालयः कस्यां दिशि वर्तते ?

प्रश्नः ६: यक्षाणां वसतिस्थानं किम् ?

प्रश्नः ७: मेघदूते सन्देशवाहकः कः ?

प्रश्नः ८: कस्य शापेण यक्षः स्वस्थानात् परित्यक्तः ?

प्रश्नः ९: ऋतुसंहारे कति कद्यानि सन्ति ?

प्रश्नः १०: दुष्यन्तशकुन्तले केन विधिना परिणीते ?

प्रश्नः ११: शकुन्तरा कस्य मुनेः पालिता पुत्री आसीत् ?

प्रश्नः १२: मेनका का ?

प्रश्नः १३: कस्य मुनेः अभिशापेन राजा दुष्यन्तः शकुन्तलां विस्मृतवान् ?

प्रश्नः १४: अभिज्ञानशाकुन्तलम् इति नाटके कति अङ्काः सन्ति ?

प्रश्नः १५: कालिदासः कस्य रीतेः कविः आसीत् ?

प्रश्नः १६: काव्येषु रम्यं किम् ?

प्रश्नः १७: 'वागार्थविव सम्पृक्तौ वागर्थप्रतिपत्तये' इत्यादिश्लोके कस्य स्तुतिः क्रियते ?

प्रश्नः १८: दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम ?

टिप्पणी

प्रश्नः १: कालिदासः

प्रश्नः २: उपमा कालिदासस्य

प्रश्नः ३: अभिज्ञानशाकुन्तलम्

प्रश्नः ४: ऋतुसंहारम्

प्रश्नः ५: रघुवंशम्

प्रश्नः ६: कुमारसम्भवम्

प्रश्नः ७: मालविकाग्निमित्रम्

प्रश्नः ८: विक्रमोर्वशीयम्

दीर्घप्रश्नाः

प्रश्नः १: महाकविकालिदासस्य परिचयं लिखत।

प्रश्नः २: कालिदासकाव्ये सौन्दर्यतत्त्वं कथं उपन्यस्तम् विश्लेषयत्।

प्रश्नः ३: कालिदासविरचितानां नाटकानां विश्लेषेणात्मकं परिचयं लिखत।

प्रश्नः ४: रघुवंशमहाकाव्यस्य सारांशं लिखत।

*** ***** ***

अध्यायः ८ : अभिज्ञानशाकुन्तलम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

८.१ उद्देश्यम्

८.२ परिचयः

८.३ महाकविकालिदासस्य जीवनवृत्तम्

८.४ कालिदासस्य कृतयः

८.५ अभिज्ञानशाकुन्तलम् इति नाटकस्य आभासः

८.६ नाटकस्य परिचयः

८.७ नाटकस्य नामकरणस्य तात्पर्यम्

८.८ नाटके प्रयुक्तः रसः

८.९ अभिज्ञानशाकुन्तलनाटकस्य अङ्कानां सारांशः

८.१० अभिज्ञानशाकुन्तले सौन्दर्यतत्त्वम्

८.११ अध्यायात् किमवगतम्

८.१२ ज्ञानाधिक्यम्

८.१३ अभ्यासप्रश्नाः

८.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः –

- महाकविकालिदासस्य जीवनवृत्तं ज्ञातुं शक्नुवन्ति।
- महाकविकालिदासेन विरचितानां ग्रन्थानां परिचयं प्राप्तुं शक्नुवन्ति।
- नाटकस्य स्वरूपं विश्लेषेण ज्ञातुं शक्नुवन्ति।
- अभिज्ञानशाकुन्तलम् इति नाटकस्य परिचयं प्राप्नुवन्ति।
- अभिज्ञानशाकुन्तलनाटके नाटकीयतत्त्वानां परिचयं प्राप्तुं शक्नुवन्ति।
- अभिज्ञानशाकुन्तले सौन्दर्यतत्त्वम् केन प्रकारेण प्रयुज्यते तत् ज्ञातुं शक्नुवन्ति।
- अभिज्ञानशाकुन्तलनाटकस्य अङ्कानां सारांशं ज्ञातुं शक्नुवन्ति।

८.२ परिचयः

अस्मिन् पाठे कालिदासस्य परिचयः, तज्जीवनकालविषये पण्डितानां नैकमतानि, तेन प्रणीतानि महाकाव्यखण्डकाव्यनाटकादीनि विविधकाव्यानि च आलोच्यन्ते। कालिदासस्य सर्वस्वभूतम् अभिज्ञानशाकुन्तलम् इति नाटकं कथं विश्वसाहित्ये श्रेष्ठं स्थानम् अधिकर्तुं सक्षमं तद्विषयोऽपि सप्रपञ्चम् आलोच्यते।

८.३ महाकविकालिदासस्य जीवनवृत्तम्

महाकविः कालिदासः संस्कृतसाहित्यस्य श्रेष्ठः कविर्वर्तते। महदिदं दुःखस्य विषयः यत् अस्य महाकवेः विषये किमपि प्रामाणिकं तथ्यं नोपलभ्यते। महाकवेः कालिदासस्य मातापितरौ कौ, तौ कस्य प्रदेशस्य निवासिनौ आस्ताम्? इत्यादिविषयाः स्पष्टं कुत्रापि न लभ्यते। विद्वत्समाजः विविधायाः लोकपरम्परायाः आधारेण कालिदासस्य जन्मस्थानं निर्धारयितुं प्रयतते। कश्मीरप्रदेशस्थाः विद्वांसः कालिदासं कश्मीरी इति वदन्ति, तथा च उज्जयिनीप्रदेशस्य विद्वांसः तं उज्जयिन्याः निवासी इति मन्यन्ते। महाकविः स्वप्रणीते मेघदूतमिति खण्डकाव्ये मेघं दूतरूपेण उज्जयिनीं प्रेषितवान् आसीत्। तस्मात् सः उज्जयिनीनिवासी इति साधयितुं प्रयतते विद्वत्समाजः। महाकवेः कालिदासस्य विषये प्रसिद्धा एका कथा अस्ति। यस्याः अनुसारं सः जीवनस्य प्राक्काले मूर्खः आसीत्। विद्वांसः षड्यन्त्रं कृत्वा तस्य विद्योत्तमया सह विवाहं साधितवन्तः। अनन्तरं स्वपत्न्या अपमानितः सन् सः वनं गतवान्। तत्र तस्य कठोरतपस्यायां सन्तुष्टा देवी काली तं असाधारणज्ञानस्य अधिकारिस्वरूपं वरं प्रदत्तवान्। प्राप्तशक्तिः सः गृहं प्रत्यागत्य स्वपत्नीम् अवदत्– 'अनावृतकपाटं द्वारं देहि' इति। तदानीं भार्या विद्योतमा तं 'अस्ति कश्चिद् वाग्विशेष' इति प्रत्युवाच। कालिदासः स्वपत्नीमुखात् निःसृतान् एतान् शब्दान् आधारीकृत्य असौ अस्ति इति शब्देन कुमारसम्भवम् इति महाकाव्यम्, कश्चित् इति शब्देन मेघदूतम् इति खण्डकाव्यम् तथा वाक् इति शब्देन रघुवंशम् इत्याख्यमहाकाव्यं विरचितवान्। यथा--

अस्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्यां इव मानदण्डः॥ (कुमारसम्भवम् १.१)
कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः।
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः॥
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु।
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥ (मेघदूतम् १.१)
वागार्थाविव संपृक्तौ वागार्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (रघुवंशम् १.१)

महाकवेः सन्दर्भे अन्याः अपि बह्व्यः कथाः सुप्रथितास्सन्ति। एकस्याः अन्यकथायाः अनुसारं काऽपि वेश्या धनलोभेन कालिदासस्य वधं कृतवती। एषा लोकप्रियकथा लङ्कांप्रदेशस्य राज्ञा कुमारदासेन सह सम्बन्धा अस्ति। अस्याः कथायाः अनुसारं महाकवेः मृत्युः लङ्कादेशे अभवत्। तृतीया कथा अपि प्रचलिता वर्तते। तदनुसारं असौ विक्रमादित्यराजस्य नवरत्नेषु अन्यतमः आसीत्। अन्यैककथानुसारं सः राज्ञा भोजेन आश्रितः कविः आसीत्। एवं महाकवेः कालिदासस्य विषये बहवः प्रथिताः कथाः समुपलभ्यन्ते। महाकवेः जीवनकालस्य विषये अपि बहवः मताः सन्ति।

- सर विलियम् जोन्स इत्याख्यः महोदयः विक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तस्य सभायाः

नवरत्नेषु एकं कालिदासं मत्वा ई० पू० प्रथमशताब्दी कालिदासस्य कालः मन्यते।


- डा० वेबर लोसन, याकोबि, मॉनियर विलियम् इत्यादीनां पाश्चात्यपण्डितानां मतानुसारं द्वितीयशतकस्य मध्यकालः कालिदासस्य कालः।
- डा० भाऊदाजी महोदयमते उज्जयिनीप्रदेशस्य राजा हर्षविक्रमादित्यः मातृगुप्तः इत्याख्यं कश्मीरप्रदेशासनाय प्रेषितवान्। सः मातृगुप्तः कालिदास एवेति मत्वा कालिदासस्य षष्ठशतकोद्भवत्वं स्वीकरोति।
- डा० हानले प्रभृतयो विद्वांसः कालिदासस्य काव्येषु गोप्ता-गोप्ने-कुभार-गुप्त-स्कन्धप्रभृतिशब्दान् अवलोक्य गुप्तवंशीयैः नृपैस्सह कालिदासस्य समयं पञ्चमं षष्ठं वा ईशवीयशतकमाहः।
- ए० सी० चटर्जीमहोदयः कालिदासं मालबनरेशस्य यशोधर्मस्य समकालिकं मत्वा षष्ठशतकं कालिदासस्य कालः इति स्वीकरोति।
- आर० कृष्णमाचारियरवर्यः मेघसन्देशविमर्शनामके ग्रन्थे उल्लिखति यत् 'दिङ्नागानां पथि परिहरन्' इति श्लोकस्य प्रमाणेन कालिदासं षष्ठशतकजातस्य दिङ्नागकवेः समकालिकः इति स्वीकरोति।
- रामावतारशर्मवर्यः कालिदासं द्वितीयचन्द्रगुप्तस्य समकालिकं मत्वा ३७५ तः ४५० ई0 इत्यस्य मध्यवर्ती इति सप्रमाणं साधयति।

८.४ कालिदासस्य कृतयः

केचन विद्वांसः कालिदासनाम्नः त्रयः पण्डिताः सन्ति इति अनुमान्ति। तदनुसारं सूक्तिमुक्तावल्यां राजशेखरप्रणीतायां निम्नाङ्कितं पद्यम् आधारस्वरूपम्।

एकोऽपि जीयते हन्त कालिदासो न केनचित्।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु।

केचन अत्र 'कालिदासत्रयी' पदस्य काव्यत्रये निरूढमर्थं स्वीकुर्वन्ति, भक्त्या कवीनां त्रयीति न गृह्णन्ति। अपरे केचन पुनः मुख्यम् अर्थमेव गृहीत्वा राजशेखरकाले कालिदासः इत्यभिधानाः त्रयः कवयः प्रसिद्धाः आसन्निति मन्यन्ते।



अग्रगत्याः निरीक्षणम् (क)

प्रश्न १: काव्येषु किं रम्यम्?

.....

प्रश्न २: दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम?

.....

प्रश्न ३: अभिज्ञानशाकुन्तलनाट्ये कति अङ्काः सन्तिः?

.....

प्रश्न ४: मेघदूतस्य कविः कः ?

.....

प्रश्न ५: रघुवंशमहाकाव्ये कति सर्गाः सन्ति ?

.....

प्रश्न ६: कालिदासेन कति नाटकानि विरचितानि ?

.....

प्रश्न ७: कालिदासेन विरचितानां नाट्यग्रन्थानां नामानि लिखत।

.....

प्रश्न ८: ऋतुसंहारे केषां वर्णनम् अस्ति ?

.....

महाकवेः कालिदासस्य ग्रन्थानां विभाजनं कर्तुं शक्यते प्रकारत्रयेण। तद्यथा – 'रघुवंशम्', 'कुमारसम्भवम्' चेति द्वे महाकाव्ये, 'मेघदूतम्' 'ऋतुसंहारः' चेति खण्डकाव्यद्वयम्। तथा त्रीणि नाटकानि यथा – 'मालविकाग्निमित्रम्', 'अभिज्ञानशाकुन्तलम्', 'विक्रमोर्वशीयम्' च।

१. **रघुवंशमहाकाव्यम्** – रघुवंशे उनविंशतिसंख्यकाः सर्गाः सन्ति। अस्मिन् महाकाव्ये राज्ञः रघोः वंशस्य कथा निबद्धा अस्ति। राज्ञः दिलीपादारभ्य अग्निवर्णपर्यन्तम् अस्मिन् काव्ये इक्ष्वाकुवंशीयनृपाणां चरितानि समुपलभ्यन्ते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं दशरथसुतस्य रामस्य कथा वर्णिताऽस्ति। तदनन्तरं तत्वंशस्य तत्तन्नृपाणां चरितानि समुपन्यस्तानि सन्ति। केषाञ्चन विदुषां मतानुसारम् , कालिदासेन रघुवंशस्य उत्तरसर्गा अपि विलिखिताः परन्तु ते न प्राप्यन्ते इति।

महाकाव्यमिदं वागर्थरूपशिवपार्वत्योः प्रार्थनया प्रारभ्यते। सचप्रथितः राजा दिलीपः अपत्यकामनया वसिष्ठाश्रमं गच्छति। कुलगुरुः सुरभिधेनोः शापनिवारणाय तं नन्दिनीसेवार्थम् उपदिशति। नन्दिनी तस्य त्यागभक्तिम् अवलोक्य तस्मै पुत्रप्राप्तिरूपं वरं ददाति। तेन वरेण दिलीपपत्नी सुदक्षिणा रघुं प्रसूते। रघोः अजः, तथा अजात् दशरथाख्यः सुतः क्रमेण धरित्रीं पालयतः। दशरथेन सम्पन्नस्य पुत्रेष्टियज्ञस्य फलरूपेण रामः भरतः लक्ष्मणः शत्रुघ्नः च चत्वारः पुत्राः भवन्ति। रामो जनकतनयां सीतां परिणयति। स हि स्वपत्नीलक्ष्मणाभ्यां सह कैकयीष्टवरहेतोः पितुः दशरथस्य आज्ञया चतुर्दशवर्षाणि वने निवसन्ति। तत्र स सीतापहारकं रावणं हन्ति। रामस्य कुशलवाख्यौ द्वौ पुत्रौ स्तः। कुशकुमुद्वत्योः अतिथि इत्याख्यः सुतः जायते। तदन्वये एव राज्ञ अग्निवर्णस्य जन्म भवति। इत्थं सङ्क्षेपेण रघुवंशकथा। रघुवंशस्य प्रथमे सर्गे दिलीपसुदक्षिणयोः वर्णनम्,द्वितीये सर्गे नन्दिनीपरिचर्यावर्णनं, तृतीये सुदक्षिणायाः वर्णनं, चतुर्थे रघुदिग्विजयवर्णनं, षष्ठे इन्दुमतीस्वयंवरसभावर्णनं, सप्तमे अज–इन्दुमती–विवाहवर्णनं, अष्टमे अजविलापवर्णनम् , नवमे वसन्तवर्णनं मृगयावर्णनञ्च, दशमे भगवतः स्तुतिवर्णनम्, त्रयोदशे भूगोलवर्णनं,

चतुर्दशे सीतापरित्यागः, षोडशे अजस्य अयोध्याप्रत्यागमनवर्णनम्, सप्तदशे जलाविहारवर्णनम्, अष्टादशे अतिथेः राज्याभिषेकवर्णनम्, एकोनविंशतिसर्गे अग्निवर्णस्य कामकेलिवर्णनं विधीयते।

२. **कुमारसम्भवम्** – कालिदासप्रणीतं कुमारसम्थवमिति महाकाव्यं सप्तदशसर्गात्मकं वर्तते। कुमारसम्भवम् इत्याख्यं महाकाव्यं कालिदासस्य काव्यकल्पनाया रमणीयमुदाहरणम् अस्ति। केषाञ्चन मतानुसारं काव्यस्य अन्तिमनवसर्गाः कालिदासोत्तरवर्तिना केनचित् कविना विरचिताः। महाकाव्यमिदं ऋतुसंहारमिव वस्तुनिर्देशमङ्गलाचरणेन प्रारभ्यते। यथा --

अस्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्यां इव मानदण्डः॥ कुमारसम्भवम् १.१

उत्तरस्यां दिशि हिमालयो नाम नगाधिराजोऽस्ति। हिमालयादेव अप्सरसि मेनकायां भगवत्याः पार्वत्या जनम् भवति। सा पिनाकपाणिं पतिरूपेण प्राप्तुं असाधारणतपस्यां करोति। तस्मिन्नेव काले तारकासुरेण पीडिताः देवताः तस्मात् प्रतीकारहेतोः परमेष्ठिनः पार्श्वं गच्छन्ति। सः तान् उपदिशति यत् तारकासुरस्य विनाशं शम्थोः वीर्यज एव कर्तुं प्रभवति। ततः पाकशासनो कामदेवं भगवतः शिवस्य समाधिभङ्गाय आदिशति। तथा कृते सति शिवस्य तृतीयनेत्रोत्पन्नवह्निना स्मरः भस्मीभूतः भवति। पार्वती स्वकामनापूर्तये पुनः कठोरं तपस्याम् आचरति। तस्याः तपस्यायां प्रसन्नः सन् शिवः तां स्वीकरोति। इत्थं कुमारसम्भवस्य कथा अग्रेसरति।




ज्ञातव्यम्

(१) महाकविः कालिदासः न केवल भारतस्य अपि तु विश्वस्य श्रेष्ठः कविः अस्ति।
(२) तस्य रघुवंशम्, कुमाररसम्भवम् चेति द्वे महाकाव्ये स्तः।
(३) महाकविः कालिदासः कविकुलगुरुः इति उपधिना विभूषितः।
(४) त्रीणि नाटकाति – मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च।
(५) ऋतुसंहारम्, मेघदुतम् चेति द्वे खण्डकाव्ये स्तः।

३. **मेघदूतम्** – गीतिकाव्यस्य अथवा खण्डकाव्यस्य परम्परायां श्रेष्ठत्वेन सम्मानप्राप्तमिदं खण्डकाव्यं पूर्वः उत्तरश्चेति भागद्वये विभक्तम् अस्ति। अस्य खण्डकाव्यस्य मल्लिनाथटीकायाम् अष्टादशाधिकशतं पद्यानि परिलक्ष्यन्ते। स्वामिनः कुवेरस्य वर्षभोग्येन शापेन स्वदेशं परित्यज्य रामगिरौ अधिवसन् कश्चित् यक्षः प्रियायै वार्तां प्रेषयितुमिच्छन् मेघं प्रार्थयते। सः रामगिरितः आरभ्य अलकापर्यन्तम् मेघं मार्गविषयेऽपि सूचयति। तदनुसारेण रामगिरितः आम्रकूटः, ततः नर्मदा, ततः वेत्रवती, ततः विदिशा, ततः वामदिशि विशाला,

ततः कुरुक्षेत्रं, ततः कनखलं, ततः कैलाशः, ततः मानसं, ततः अलका इति गन्तव्यपन्था। ततश्च अलकानगर्यां गृहपरिचयाद् अनन्तरं सन्देशकथनं विहितमस्ति। सन्देशोऽयं अतीव मार्मिकः वर्तते। यथा-

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिराप्यते मे क्रूरस्तस्मिन् न सहते सङ्गमं नौ कृतान्तः।। [३६]



अग्रगत्याः निरीक्षणम् (ख)

प्रश्न १: अभिज्ञानशाकुन्तलस्य कर्ता कः ?

(क) कालिदासः (ख) भासः (ग) भवभूतिः

.....

प्रश्न २: अधोदत्तेषु शकुन्तलायाः सखी का ?

(क) गौतमी (ख) मालविका (ग) अनसूया

.....

प्रश्न ३: का शकुन्तलया साकं दुष्यन्तराजधानीम् अगच्छत् ?

(क) प्रियंवदा (ख) गौतमी (ग) अनसूया

.....

प्रश्न ४: अभिज्ञानशाकुन्तले विदूषकः कः ?

(क) माधव्यः (ख) वसन्तकः (ग) मैत्रेयः

.....

प्रश्न ५: दुष्यन्तेन परित्यक्ता शकुन्तला कस्याश्रमे अवसत् ?

(क) गौतमस्य (ख) मारीचस्य (ग) वसिष्ठस्य

.....

प्रश्न ६: अभिज्ञानशाकुन्तले सर्वप्रधानः अङ्कः कः ?

(क) 3 (ख) 4 (ग) 5

.....

प्रश्न ७: शकुन्तलायाः अङ्गुलीयकं कुत्र अपतत् ?

(क) शचीतीर्थे (ख) प्रभासतीर्थे (ग) आश्रमे

.....

प्रश्न ८: शकुन्तलायाः पुत्रः कः ?

(क) श्वेतकेतुः (ख) आरुणिः (ग) सर्वदमनः

.....

प्रश्न ९: 'यास्यत्यद्य शकुन्तलेति हृदयम्' कस्य वचनमिदम् ?
(क) कण्वस्य (ख) शार्ङ्गरवस्य (ग) शारद्वतस्य
.....
प्रश्न १०: 'स्मरिष्यति त्वाम् न स बोधितोसपि सन्' कस्य शापवचनमिदम् ?
(क) दुष्यन्तस्य (ख) दुर्वाससः (ग) मारीचस्य
.....

४. **ऋतुसंहारम्** - कालिदासप्रणीतं काव्यमिदं षट्सर्गात्मकम्। अत्र ग्रीष्मऋतोः आरभ्य वसन्तऋतुपर्यन्तं षट्संख्यकानाम् ऋतूणां साङ्गोपाङ्गवर्णनम् उपलभ्यते। ग्रन्थेऽस्मिन् १५३ संख्यकानि नानाछन्दोयुतानि पद्यानि सन्ति। एकैकस्मिन् सर्गे एकैकस्य ऋतोः वर्णनं विदधाति कविः। ग्रन्थोऽयं कालिदासस्य प्रथमकृतित्वेन गृह्यते समालोचकैः। तत्र ग्रीष्मवर्णनं यथा-

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः।
विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम्।। [२९]

वर्षावर्णनं यथा -

निपातयन्त्यः परितस्तटद्रुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः।
स्त्रियः सुदुष्टा इव जातिविभ्रमाः प्रयान्ति नद्यस्त्वरित पयोनिधिम्।। [३०]
पयोधरैर्भीमगभीरनिःस्वनैस्तडिद्भिरुद्वेजितचेतसो भृशम्।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम्।। [३१]

शरद्वर्णनं यथा -

तारागणप्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा।
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रथात्यनुदिनं प्रमदेव बाला।। [३२]

हेमन्तवर्णनं यथा -

बहुगणरमणीयो योषितां चित्तहारी, परिणतबहुशालिव्याकुलग्रामसीमा।
विनिपततितुषारः क्रौञ्चनादोपगीतः, प्रदिशतु हिमयुक्तः काल एषः सुखं वः।। [३३]

शिशिरवर्णनं यथा -

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः, प्रबलसुरतकेलिर्जातकन्दर्पदर्पः।
प्रियजनरहितानां चित्तसन्तापहेतुः, शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम्।। [३४]

वसन्तवर्णनं यथा -

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोभम्।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयान्ति कान्ति प्रमदोजनानाम्।। [३५]

५. **अभिज्ञानशाकुन्तलम्** - महाकविकालिदासेन प्रणीतं शकुन्तलादुष्यन्तयोः प्रणयकथासम्बद्धम् इदं नाटकं कालिदासस्य प्रौढा कृतिः वर्तते। नाटकमिदं सप्तसु अङ्केषु विभक्तमस्ति। मृगयाव्यसनी राजा दुष्यन्तः मृगम् अनुधावन् महर्षेः कण्वस्य तपोवनं प्रविशति।

तत्र स कण्वपालितां शकुन्तलामवलोक्य तया आकृष्टो भवति, शकुन्तलापि राज्ञा आकृष्टा भवति। उभौ गान्धर्वविधिना परिणीतौ स्तः। दुष्यन्तश्च शकुन्तलां आश्वासं दत्वा शीघ्रमेव तां राज्यं प्रति आनयति इति प्रतिज्ञां विधाय नगरीं प्रत्यागच्छति। तद्विरहेन दुःखिता शकुन्तला एकदा दुर्वासामुनेः वाक्यं न शृणोति। तेन सा अभिशप्ता भवति यत् यं विचिन्त्य सा समुपस्थितां मुनिं दुर्वाससं उपेक्षितवती सोऽपि तां विस्मरतु इति। सखीभ्यां सेवया अनन्तरं सन्तुष्टः सः मुनिः कथयति यत् सः राजा पश्चादभिज्ञानदर्शनेन तां शकुन्तलां स्मरिष्यतीति। तीर्थयात्रातः प्रत्यागतः कण्वऋषिः सगर्भां पुत्रीं यथोचितप्रकारेण तां पतिगृहं प्रेषयति। मार्गे शचीतीर्थे स्नानसमये अभिज्ञाननिमित्ता अङ्गुलिमुद्रा जले पतति। शापप्रभावेन प्रियां दुष्यन्तः विस्मरति। तथोपेक्षितां तां तस्याः माता मेनका मारीचमुनेः महर्षेः आश्रमं नयति। तत्रैव सा भरतं सूते। धीवरात् अङ्गुलीयकं प्राप्य लब्धस्मृतिः सः राजा दुष्यन्तः प्रियानिमित्तं भृशम् अनुतप्तो भवति। युधि पुरन्दरसाहाय्यं कृत्वा प्रतिनिवर्तमानो राजा मारीचाश्रमे सपुत्रां शकुन्तलां पश्यति। ततश्च मारीचेन आशिषौ उभौ दम्पतीसुखमनुभवतः। नाटकमिदं सर्वोत्कृष्टकृतिषु अन्यतमम् इति सम्मतम्। उच्यते हि—

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽकस्तत्र श्लोकचतुष्टयम् ॥

६. **मालविकाग्निमित्रम्** – कालिदासप्रणीतं मालविकाग्निमित्रम् इत्याख्यं नाटकं पञ्चसु अङ्केषु विभक्तम् अस्ता। अत्र धीरललितप्रकृतेः अग्निमित्रः इत्याख्यः नायकः वर्तते। नायिका च अस्ति मालविका। नायकः अग्निवर्णः शुङ्गवंशीयः राजा, नायिका च विदर्भदेशस्य राजकुमारी। कालिदासप्रणीतं नाटकमिदम् उत्तरवर्तिनां श्रीहर्षादीनामपि उपजीव्यं भवति। नाटकेऽस्मिन् सर्वत्र वैदर्भी रीतिः प्रसादश्च गुणः च दृश्यते। गणदासहरदत्तयोः विवादप्रसङ्गो नाटकमिदं रञ्जयति विशेषेण। स्त्रीप्रधानमिदं नाटकं नाटिकाप्रकृतिकम् अस्ति।

७. **विक्रमोर्वशीयम्** – कालिदासप्रणीतं विक्रमोर्वशीयम् इत्याख्यं त्रोटकम् पञ्चस्वङ्केषु विभक्तं वर्तते। अत्र पुरुरवोर्वश्योः प्राधान्येन प्रणयकथा वर्णिताऽस्ति। परस्परम् अवलोकनेन तौ स्नेहाद्रचित्तौ भवतः।

८.५ अभिज्ञानशाकुन्तलम् इति नाटकस्य आभासः

महाकविकालिदासेन प्रणीतं शकुन्तलादुष्यन्तयोः प्रणयकथासम्बद्धम् इदं नाटकं कालिदासस्य प्रौढा कृतिः वर्तते। नाटकमिदं सप्तसु अङ्केषु विभक्तमस्ति। मृगयाव्यसनी राजा दुष्यन्तः मृगम् अनुधावन् महर्षेः कण्वस्य तपोवनं प्रविशति। तत्र स कण्वपालितां शकुन्तलामवलोक्य तया आकृष्टो भवति, शकुन्तलापि राज्ञा आकृष्टा भवति। उभौ गान्धर्वविधिना परिणीतौ स्तः। दुष्यन्तश्च शकुन्तलां आश्वासं दत्वा शीघ्रमेव तां राज्यं प्रति आनयति इति प्रतिज्ञां विधाय नगरीं प्रत्यागच्छति। तद्विरहेन दुःखिता शकुन्तला एकदा दुर्वासामुनेः वाक्यं न शृणोति। तेन सा अभिशप्ता भवति यत् यं विचिन्त्य सा समुपस्थितां दुर्वासामुनिं उपेक्षितवती सोऽपि तां विस्मरतु इति।

सखीभ्यां सेवया अनन्तरं सन्तुष्टः सः मुनिः कथयति यत् सः राजा पश्चात् भिज्ञानदर्शनेन तां शकुन्तलां स्मरिष्यतीति। तीर्थयात्रातः प्रत्यागतः कण्वऋषिः सगर्भां पुत्रीं यथोचितप्रकारेण तां पतिगृहं प्रेषयति। मार्गे शचीतीर्थे स्नानसमये अभिज्ञाननिमित्ता अङ्गुलिमुद्रा जले पतति। शापप्रभावेन प्रियां दुष्यन्तः विस्मरति। तथोपेक्षितां तां तस्याः माता मेनका मारीचमुनेः महर्षेः आश्रमं नयति। तत्रैव सा भरतं सूते। धीवरात् अङ्गुलीयकं प्राप्य लब्धस्मृतिः सः राजा दुष्यन्तः प्रियानिमित्तं भृशम् अनुतप्तो भवति। युधि पुरन्दरसाहाय्यं कृत्वा प्रतिनिवर्तमानो राजा मारीचाश्रमे सपुत्रां शकुन्तलां पश्यति। ततश्च मारीचेन आशिषौ उभौ दम्पतीसुखमनुभवतः। इत्यस्य कथासारः।

नाटकमिदं सर्वोत्कृष्टकृति इति सम्मतम्। काव्येषु नाटकं रम्यं तत्रापि अभिज्ञानशाकुन्तलं रम्यतमम्। शाकुन्तलेऽपि चतुर्थोऽस्तत्राऽपि श्लोकचतुष्टयं तु विशिष्टतमं मतम्।

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥

८.६ नाटकस्य परिचयः

काव्यस्य स्वरूपदृष्टया द्विविधो भागो वर्तते। तद्यथा - दृश्यकाव्यं श्रव्यकाव्यं च। श्रव्यकाव्यं श्रोतुमेव शक्यते। दृश्यकाव्यं द्रष्टुमपि शक्यते। अर्थात् दृश्यकाव्यम् अभिनयेन प्रदर्शयितुं शक्यते। दृश्यकाव्यस्य अपरं नाम अस्ति रूपकम् इति। यतो हि रूपके नटे अनुकार्यस्य रामादेः स्वरूपस्य आरोपः भवति। विभाजनमिदं प्रस्तुय विश्वनाथकविराजेन साहित्यदर्पणस्य षष्ठपरिच्छेदे उल्लिख्यते यत् --

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्॥ (साहित्यदर्पणः, ६/१)

रूपकस्य दशप्रकाराः सन्ति। तथा हि - नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथिः, प्रहसनम्, च। यथोच्यते विश्वनाथेन-

नाटकमथप्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥ (साहित्यदर्पणः, ६/३)

तथैव अष्टादश उपरूपकाणामपि विभाजनं प्रदर्शयति असौ। तानि यथा - नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका च। यथोच्यते विश्वनाथेन --

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकं च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥
अष्टादश प्राहुरूपरूपकाणि मनीषिणः।

विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्॥ (साहित्यदर्पणः, ६/४,५,६)

नाटकस्य लक्षणं विश्वनाथकविराजेन इत्थमुक्तं --

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासद्धैर्यादिगुणवद्युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्॥
दिव्योऽथ दिव्याऽदिव्यो वा गुणवान्नायको मतः॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तत्र कीर्तितम्॥ (साहित्यदर्पणः, ६/७-११-)

अस्य अयमेव अर्थो यत्- नाटकस्य कथावस्तु प्रसिद्धं स्यात्। तत्र मुखं, प्रतिमुखं, गर्भः, विमर्शः, उपसंहृतिः चेति पञ्च सन्धयो स्युः। नाटकं विलासः, समृद्धिः इत्यादिभिः गुणैः तथा बहुविभूतिभिः युक्तं स्यात्। नाटके सुखस्य दुःखस्य च समुद्भवो भवति। विभिन्नाः रसाः अनवरतं प्रकाशिताः स्युः। नाटके पञ्चतः दशसंख्यकपर्यन्तम् अङ्काः स्युः। नाटके नायकः प्रख्यातवंशोत्पन्नः अथवा राजर्षिः स्यात्। सः च नायकः धीरोदात्तगुणोपेतः , प्रतापशाली, देवलोकवासी, मर्त्यलोकवासी अथवा देवः सन्नपि मर्त्यलोकवासी, गुणगणैश्च युक्तः स्यात्। नाटके शृङ्गारवीरयोः कश्चिदेक एवाङ्गी इत्युक्ते मुख्यः रसः स्यात्। अन्ये च हास्यकरुणरौद्रभयानकबीभत्साद्भुतशान्ताः अङ्गत्वेन प्रयुक्ताः स्युः। नाटके निर्वहणसन्धौ अद्भुतरसस्य प्रयोगः करणीयः। नाटके तेषु तेषु प्रमुखकार्येषु चत्वारः अथवा पञ्च प्रधानपुरुषाः भवन्ति। नाटकीयाअङ्काः गोपुच्छाग्र इव क्रमशः बृहतः सुक्ष्मपर्यन्तं बन्धनं अर्थात् निर्माणं कर्तव्यम्।

८.७ नाटकस्य नामकरणस्य तात्पर्यम्

अभिज्ञायते अनेन इति अभिज्ञानम्। अभिज्ञानम् इत्युक्ते चिह्नमिति, अभिपूर्वकं ज्ञाधातोः ल्युट्-प्रत्यये परे ज्ञानं शब्दः सञ्जायते। शकुन्तैः लालिता शकुन्तला। शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम् 'अधिकृत्यकृते ग्रन्थे' इति सूत्रेण 'अण्' प्रत्ययः। अभिज्ञानप्रधानं शाकुन्तलम् 'अभिज्ञानशाकुन्तलम्' इति। अभिज्ञानसहितं शाकुन्तलम् अभिज्ञानशाकुन्तलम् अथवा अभिज्ञानञ्च शकुन्तलाञ्च इति अभिज्ञानशाकुन्तलम्। कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्।

८.८ नाटके प्रयुक्तः रसः

आभिज्ञानशाकुन्तलनाटकस्य मुख्यरसः अस्ति शृङ्गाररसः। शृंगाररसस्य संभोगविप्रलम्थयोः

उभयोः भेदयोः प्राधान्यं सयोगशृंगारस्य एव। यद्यपि विप्रलम्भस्य न्यूनः प्रकाशो भवति तथापि सम्थोगश्रृंगारमात्रस्य प्राधान्यं वर्तते। अभिज्ञानशाकुन्तलस्य प्रथमतः त्रिषु अङ्केषु संभोगशृङ्गारः प्रमुखः अस्ति। विप्रलम्थः, वीरः, हास्यः, अद्भुतः तथा शान्तः इत्यादयः अपि अङ्गरूपेण सन्ति। यद्यपि विप्रलम्भशृंगारः सम्भोगापेक्षया अधिकविस्तृततया दृश्यते। तथापि प्राधान्यं शृङ्गारसम्बन्धस्य, यतो हि नाटकमिदं सम्भोगशृङ्गारेण एव आरभ्यते अन्ते च दुष्यन्तशकुन्तलयोः मिलनरूपेण सम्भोगशृङ्गारो भवति।

प्रथमाङ्के दुष्यन्तः वृक्षसेचननिरतां स्वमित्रैः सह शान्ततया उपविष्टां शकुन्तलां दृष्ट्वा दुष्यन्तहृदि तां प्रति प्रणयभावः उद्भवति। अतः सः 'मधुमासा दर्शनम्' इति, 'शुद्धान्तदुर्लभमीदं वपुः' इत्यादीनि वाक्यानि वदति। तदनन्तरं सः तां प्रति पूर्णतया आकृष्टः भवति तथा च तस्याः अद्भुतं सौन्दर्यं मनसि एवं प्रशंसति – 'इदं किलाव्याजमनोहरं वपु' 'सरसिजमनुबिद्धं शैवलेनापि रम्यम्' इति। तस्याः जीवनवृत्तान्तं, तां क्षत्रियकन्यां चेति ज्ञात्वा राजा तां परिणेतुम् उत्सुकः भवति, अतः शकुन्तलायाः मुखमण्डले भ्रमितुं प्रयत्नरतान् भ्रमरान् प्रति अपि इर्ष्यां प्रकटयति। तृतीये अङ्के राज्ञः कामुकदशा चित्रिता यत्र सः शकुन्तला प्राप्तुं बहुविधं मार्गं चिन्तयति परन्तु किमपि कर्तुं असमर्थः इति दुःखितः भवति। प्रेमपत्रं श्रुत्वा अपमानभयभीता शकुन्तलाम् आह – 'अयं स ते तिष्ठति संगमोत्सुक विशङ्कसे भीरु यतोऽवधीरणाम्।' शकुन्तला राजा च विरहेण पीडितौ कामातुरौ च अङ्कितौ अस्मिन् अङ्के। एतत् विरहदुःखम् अङ्कस्य अन्तमभागे गन्धर्वविवाहरूपेण समाप्तं भवति। शकुन्तलदुष्यन्तयोः मिलनं तृतीयाङ्के एव जायते। अस्मिन् अङ्के सम्भोगशृङ्गारस्य प्रधानता वर्तते। चतुर्थे अङ्के शकुन्तलायाः प्रस्थानेन तपोवने दुःखदं वातावरणं समागच्छति। अस्य अंकस्य मुख्यरसो वर्तते करुणरसः। पञ्चमे अङ्के राज्ञा परित्यक्तायाः शकुन्तलायाः करुणदशा वर्णिता अस्ति तथा राजभवने चमत्कारज्योतिरूपा अप्सरसः आगमनेन अङ्कस्य अन्तिमभागे रहस्यमपि उद्भवति। षष्ठे विप्रलम्भकरुणसहितं विदूषकस्य हास्यं सप्तमे च शान्तरसः प्रमुखः वर्तते।

८.९ अभिज्ञानशाकुन्तलनाटकस्य अङ्कानां सारांशः

प्रथमः अङ्कः-- अभिज्ञानशाकुन्तलम् इति नाटकस्य प्रारम्भे आशीर्वादरूपां 'या सृष्टिः स्रष्टुराद्या' इति अष्टपदीं नान्दीं विघ्ननाशाय ग्रन्थस्य सफलसमाप्त्यर्थं च सूत्रधारः पठति। ततः सूत्रधारनट्योः संलापेन प्रस्तावना समाप्यते। तदनन्तरं मृगाय आश्रममृगम् अनुवर्तमान राजा दुष्यन्तः प्रविशति। धनुषि शरं संधत्ते, द्वो वैखानसौ आश्रमतपस्विनौ 'आश्रममृगोऽयं न हन्तव्यो न हन्तव्य' इति निषेधयन्तौ दुष्यन्तं निवारयतः। सोऽपि तयोः आदेशानुसारं तत्क्षणादेव तीरं प्रतिसंगृहीतवान्। ततः तौ राजानं चक्रवर्तिनं पुत्रं प्राप्नूहि इति आशिषं प्रदाय राज्ञः सत्काराय कण्वाश्रमे नीतवन्तौ। आश्रमं प्रविश्य तत्र सखीभ्यां समेताम् आम्रसिञ्चन्तीं शकुन्तलाम् अवलोक्य राजा स्वमनसि चिन्तयति–

इदं किल व्याज मनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नोलोत्पल पत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥ २

सरसिजमनुविद्धं शैवलेनापि रम्यं, मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव मधुराणां मण्डनं नाकृतीनाम् ॥ २० ॥

तदनन्तरं भ्रमरेण पीडिता शकुन्तला यदा आत्मानं रक्षितुं सख्योः पुरतः प्रार्थितवती। तदा ते व्याजेन परिहासं कृत्वा वदतः यत् - के आवां परित्रातुम्। राजरक्षितव्यानि तपोवनानि। अतो दुष्यन्तनमाक्रान्द। स एवागत्य त्वां परित्रास्यति इति। तेनैव व्याजेन दुष्यन्तशकुन्तलयोः मध्ये परिचयः जातः। परिचयमाध्यमेन राजा ज्ञातवान् यत्। कण्वमुनिना पालिता शकुन्तला मूलतः विश्वामित्रमेनकयोः सुता इति। सा क्षत्रियकन्या इति ज्ञात्वा तथा तस्याः रूपयौवनेन मोहितः राजा तां परिणेतुम् इष्टवान्। शकुन्तलायाः मनसि अपि राजानं प्रति प्रेमाभावः उत्पन्नोऽभवत्। अस्य अङ्कस्य अन्तिमे भागे राजा पुनः कार्यवशतः स्वराज्यं प्रत्यागमनं कृतवान्।

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।

न प्रभातरलं ज्योतिरुदेति वसुधातलात्।। [३]

द्वितीयाङ्कः -- द्वितीयाङ्कस्य प्रारम्भे राज्ञः विदूषकः मृगयाश्रमेण व्याकुलः दृश्यते। सः मन्यते यत् तस्यैव दुर्भाग्यवशात् यदा राजा मुनिकन्यां शकुन्तलां दृष्टवान् तदा आरभ्य अस्य राजा नगरं प्रति प्रत्यागन्तुं न इष्टवान् इति। तस्मिन् समये एव राजा स्वयं विदूषकसमीपं गतवान्। न तु हास्यकर्तुः कथनेन परन्तु शकुन्तलायाः हेतोः राजा मृगयायाः निवारणं कर्तुं आज्ञापयति। सः स्वस्य असहायमित्रं प्रति प्रेमभावनानां वर्णनं कृतवान्। तदा ऋषिकुमारः आगत्य राक्षसेभ्यः आश्रमस्य रक्षणार्थं याचते। अयं अवसरः अनुकूलः इति मत्वा राजा अनुमोदनं ददाति। अथ दूतः सन्देशं ददाति यत् राज्ञः माता उपवासविच्छेदनिमित्तं राजानम् आहूतवती। परन्तु राजा विदूषकं स्वप्रतिनिधित्वेन राजधानीम् प्रेषितवान्। शकुन्तलायाः प्रेमप्रसङ्गः अन्तःपुरं प्रति न गच्छेत् इति चिन्तयित्वा राजा शकुन्तलायाः विषये उक्तानि वचनानि सत्यं न सन्ति इति विदूषकं आश्वासयति स्म। तत् सर्वं केवलं हास्यार्थं उक्तं न तु वास्तविकं मन्तव्यम् इति विदूषकम् उक्तवान्।

तृतीयाङ्कः-- तृतीयाङ्के शकुन्तला मित्रैः सह चित्रिता। सा कामार्ता परिलक्ष्यते अस्मिन् अङ्के। दुष्यन्तं प्रति आसक्तित्वात् सा शिरच्छिन्ना नवमालिका इव विवर्णा दृश्यते। तस्याः शरीरे केवलं सुन्दरच्छाया एव अवशिष्टा परिलक्ष्यते। एषा विरहदुःखं सा स्वसखिभिः सह आलोचितवती। सखीनां उत्साहप्रदानेन सा राजानं प्रेमपत्रं लिखति स्म। शकुन्तला राज्ञः पक्षतः प्रणयसन्दर्भे आशङ्कितः आसीत्। एतानि संदिग्धवार्तानि पृष्टतः सर्वं श्रुतवान् राजा। राजा शुभावसरं दृष्ट्वा शकुन्तलायाः पुरतः आगत्य तस्याः प्रति प्रेम्णः अभिव्यक्तिं कृतवान्। तस्मिन् समये शकुन्तलायाः सखी ततः प्रस्थानं कृतवत्यौ। शकुन्तलाम् एकान्तेन प्राप्य राजा गन्धर्वविवाहस्य कृते आशान्वित अभवत्। किन्तु शकुन्तला स्वस्याः अनिच्छां प्रकटितवती। उभौ अपि स्वमनोभावं परस्परं प्रकटितवन्तौ। दृश्यस्य समाप्तिः भवति तापसी गौतम्याः आगमनेन या शकुन्तलाम् नेतुम् आगता आसीत्। राजा अपि यज्ञीयविघ्ना अपाकर्तुं प्रस्थितवान् ७

चतुर्थः अङ्कः - चतुर्थाङ्कस्य प्रारम्भे विष्कम्भके शकुन्तलायाः प्रियसख्योः प्रियम्वदा-अनसूययोः कथोपकथनेन ज्ञायते यत् शकुन्तलया सह गन्धर्वविवाहानन्तरं राजा गतः, तयोः शङ्का

अभवत् यत् राज्ञः पुरुषाः शकुन्तलाम् आनयितुं आगमिष्यन्ति न वा इति। एतत् सर्वं चिन्तयन्त्यः ताः सहसा उच्चैः क्रोधितस्वरं श्रुत्वा स्तब्धाः अभवन्। वस्तुतः चिन्तनमग्ना कामार्ता शकुन्तला आश्रमम् आगतस्य तपस्विनः दुर्वाससः सम्यक् आदरं कर्तुं न शक्तवती, यस्मात् कारणात् सः क्रुद्धः सन् अभिशापं दत्तवान् यत् यं स्मरणं कृत्वा सा आश्रमागतं मुनिं अवधानं दातुं न शक्तवती सोऽपि शकुन्तला विस्मरिष्यति इति। अनन्तरं तस्याः सखीनाम् अनुरोधेन दुर्वासा आश्वासयति स्म यत् एषा विस्मृतिः तावत् भविष्यति यावत् तस्य पुरतः तेनैश प्रदत्तः अलङ्कारः न प्रदर्शयति। परस्परं विषयमिमम् आलोच्य अभिशापवृत्तान्तं गोपनीयं स्थापितवत्यः। शकुन्तलायाः समीपं राज्ञा दत्तं अङ्गुलीयकमेक आसीत्, येन राजा तां स्मरिष्यति, अतः अभिशापस्य कोऽपि प्रभावः न भविष्यति। नाटकस्य सम्पूर्णः व्यापारः अस्मिन् अङ्के एव आधारितः वर्तते। अत्रैव विष्कम्भकस्य समाप्तिः भवति। तदनन्तरं कण्व ऋषिः तीर्थयात्रातः प्रत्यागच्छति स्म। मार्गे प्रविश्य एव आकाशवाणीद्वारा ज्ञातवान् यत् शकुन्तला राज्ञा दुष्यन्तेन सह गन्धर्वविवाहं कृतवती। ऋषिः अस्य विवाहस्य समर्थनं कृतवान् यतो हि संयोगेन एव अनुकूलेन पतिना सह शकुन्तला संयोजिता आसीत् इति। राजा दुष्यन्तः दुर्वाससः अभिशापात् विवाहसन्दर्भं विस्मृतवान्, यदा सः शकुन्तलाम् आनेतुं कमपि न प्रेषितवान् तदा मुनिः कण्वः अनुरक्षकैः सह शकुन्तलां राज्ञः समीपं प्रेषयितुं निश्चयं कृतवान्। वृद्धा तपस्वी पालितकन्यायाः भविष्यजीवनस्य विषये उपदिष्टवती। शकुन्तलायाः गर्भधारणस्य लक्षणं प्रादुर्भवितुं आरभते स्म। कण्वः तां भर्तुः समीपं प्रेषयितुं व्यवस्थां कृतवान्। शकुन्तलायाः विदायस्य सज्जता क्रियते स्म। वन्यवृक्षादिभिः प्रदत्ताभूषणैः वस्त्रैः च अलङ्कृता शकुन्तला सर्वान् परित्यज्य प्रस्थितवती। गौतमी कण्वशिष्यः शार्ङ्गरवः शारद्वतः च तया सह गतवन्तः।

पञ्चमः अङ्कः - अस्य अङ्कस्य आरम्भे दुष्यन्तः शासनकार्य्ये व्यस्तः दृश्यते। अत्र दुष्यन्तः महाकविना कालिदासेन महान् समर्थः राजा इति चित्रितः अस्ति। राज्ञः प्रिया हंसवती संगीतशालायां उपविश्य 'अभिनव मधुलुपस्त्यं.....' इत्यादि गायति। तस्मिन् अवसरे कञ्चुकीतः सूचना प्राप्यते यत् शकुन्तला कण्वस्य शिष्यैः शार्ङ्गरव-शारद्वत-गौतमीभिः सह प्रासादं प्राप्तवती। राजा सर्वान् प्रासादं आहूतवान्। शापितः सन् राजा शकुन्तलया सह विवाहप्रकरणं सर्वथा विस्मृतवान्। शार्ङ्गरवः स्वगुरोः कण्वस्य सन्देशं दत्वा तां स्वीकर्तुं राजानम् आमन्त्रितवान्। शकुन्तलया सह विवाहवृत्तान्तम् असत्यमिति राजा उक्तवान्। गौतमी राजानम् आश्वासनप्रदानाय शकुन्तलायाः मुखावरणम् अपसारयति स्म। राजा तथापि तां न स्मृतवान्। शकुन्तला राज्ञा प्रदत्तं अङ्गुलीयकं यदा प्रदर्शयितुं प्रयत्नं कृतवती तदा सा स्मृतवती यत् तेन प्रदत्तम् अङ्गुलीयकं शचितीर्थे पतितम् इति। शार्ङ्गरवस्य राज्ञः च मध्ये भावपूर्णः संभाषणं जातम्। शकुन्तला अपि राजानं प्रति कठोरं उक्तवती। तथापि राजा शकुन्तलाम् स्वपत्नीरूपेण नाङ्गीकृतवान्। परन्तु पुरोहितः राजानं पुत्रजन्मपर्यन्तं शकुन्तलां स्वगृहे स्थापयितुम् उपदिष्टवान्। सः तां शकुन्तलां प्रकोष्ठं प्रति नीतवान्। तदा एव ज्योतिरूपा अप्सरा एका आगत्य शकुन्तलां हरति स्म। पुरोहितः एतादृशम् आश्चर्यजनकं वृत्तान्तं राजानं सूचितवान्। अत्रैव पञ्चमाङ्कस्य समापनं भवति।

षष्ठाङ्कः - शचीतीर्थे पूजनसमये शकुन्तलाहस्तात् राज्ञा प्रदत्तम् अङ्गुलीयकं पतितम्। तत् अङ्गुलीयकं मत्स्यस्य उदरात् धीवरः प्राप्नोति। सः तस्य अङ्गुलीयकस्य विक्रयणार्थं विपणीं गच्छति। तत्र विपण्यां सः धीवरः चौर इति भ्रान्त्या सैनिकैः राज्ञः समीपम् आनीतः। तम् अङ्गुलीयकं दृष्ट्वा राज्ञः उपरि मुनेः दुर्वाससः मुनिशापप्रभावः समाप्तो भवति। तेनैव शकुन्तलया सह गन्धर्वविवाहस्य समग्रां घटनां राजा स्मरति। शकुन्तलां स्मृत्वा राजा अतीव दुःखी भवति। राजा वसन्तोत्सवम् आचरितुम् आदेशं ददाति। मेनकायाः सखी सानुमती अदृश्यरूपेण राज्ञः समीपम् आगत्य तस्य स्थितिं पश्यति। राजा मित्रेण विदूषकेण सह सह वार्तालापं करोति तथा च शकुन्तलायाः अपूर्णं चित्रं क्रमेण पूर्णं कर्तुं व्यवस्थां करोति। ततः प्रतिहारी मन्त्रीतः पत्रम् आनयति यत् धनमित्रः नाम व्यापारी नौकाभग्नहेतोः समुद्रे मृतः। तस्य सन्तानं नास्ति, अतः तस्य सर्वं धनं कोषं प्रति आगच्छति इति। एतत् श्रुत्वा राजा अतीव दुःखितः भवति यत् अपत्यत्वात् तस्य सर्वं धनं अन्येषां जनानां पार्श्वे गमिष्यति। एतत् चिन्तयित्वा राजा मूर्च्छितो भवति। तस्मिन् एव काले इन्द्रस्य सारथिः मातलिः आगच्छति। सः देवराजस्य इन्द्रस्य सन्देशं राजानं दुष्यन्तं प्रति कथयति यत् राक्षसानां विनाशाय इन्द्रेण सः राजा सद्यः एव आहूतः। इन्द्रराजस्य रथमारुह्य राजा दुष्यन्तः स्वर्गं प्रति प्रस्थानं करोति।

सप्तमः अङ्कः- राजा दुष्यन्तः राक्षसान् जित्वा। इन्द्रः दुष्यन्तं विशेषोपचारं दत्त्वा विदायं कृतवान्। स्वर्गात् प्रत्यागच्छन्, राजा दुष्यन्तः हेमकुटपर्वते मारीचऋषेः आश्रमं दृष्टवान्। राजा मुनिं मिलितुं तत्र आश्रमे गतवान्। आश्रमे राज्ञः अद्भुतप्रतिभायुतम् एकं बालकं दृष्टवान् यः सिंहशावकस्य दन्तं गणयितुं प्रयतते स्म।तस्य बालस्य शारीरिकः आकारः राज्ञः सदृशः आसीत्, अतः राजा तस्मै बालकस्य पुत्रस्नेहं दातुं आरब्धवान्। बालकः अपि राज्ञः आज्ञापालनं आरभते। बालेन सह वर्तमानायाः तपस्विन्याः अस्य बालस्य मातुः नाम शकुन्तला तथा बालकः पुरुवंशीय अस्ति इति राजा ज्ञातवान्। तस्य पिता मातरं त्यक्तवान् अस्ति। अपराजिता नाम्नो भेषजस्य प्रसङ्गात् बालोऽयं राज्ञः पुत्र इति निश्चयः जातः। तस्मिन् एव काले शकुन्तला राज्ञः पुरतः आगत्य नमस्कारं करोति। राजा शकुन्तलायाः पादयोः पतित्वा तस्याः प्रति अनुचितव्यवहारहेतो क्षमां प्रार्थितवान्। तदनन्तरं राजा शकुन्तला च मारीचमुनिं द्रष्टुं गच्छतः। तत्र दुर्वाससः शापावशात् राजा शकुन्तलां न स्मृतवान् इति मारीचऋषिः सर्वं वृत्तान्तं कथयति। चिह्नितम् अङ्गुलीयकं दृष्ट्वा एव शापः समाप्तः जातः तथा स शकुन्तलां स्मृतवान्। स मुनिः राजानं निर्दोषत्वं विज्ञाप्य तौ आशीषं दत्त्वा शक्ररथम् उपस्थापयति स्म। तथा सः तौ स्वराजधानीम् प्रेषितवान्। राजा शकुन्तला च तत्र सुखेन निर्वासं आरब्धवन्तौ तथा च भारतवाक्येन अस्य नाटकस्य अत्रैव समाप्तिः भवति।

८.१० अभिज्ञानशाकुन्तले सौन्दर्यतत्त्वम्

कालिदासस्य कृतिषु सौन्दर्यावधारणा इति एक असाधारणचर्चाविषयो वर्तते। तत्प्रणीतेषु काव्यनाटकेषु विशेषतः सौन्दर्याधायकानि तत्त्वानि प्रकृष्टेन दरीदृश्यते। अभिज्ञानशाकुन्तलनाटके कविना शकुन्तला प्रकृतेः प्रत्येकोपादानेभ्यस्सह तुल्यते। 'विटपानुकारिणौ बाहू' इत्यत्र शकुन्तलायाः

हस्तौ पादपशाखया सह तुल्यते। महाकविना कालिदासेन प्राकृतिकसौन्दर्यं श्रेष्ठरूपेण परिगण्यते। तेन अभिज्ञानशाकुन्तले सरसिजमनुविद्धमित्यादिना श्लोकेमाध्यमेन सौन्दर्यतत्वं बहूधा समुपस्थापितम् कालिदासप्रणीतासु निर्मितिषु अनाहार्यसौन्दर्यस्य मान्यता समधिका वर्तते। स्वाभाविकं वस्तु अनाहार्यस्वरूपं तथा कृत्रिमत्वम् आहार्यस्वरूपं भवति। तत्प्रणीतकाव्यनाटकेषु विविधावसरेषु स्वाभाविकसौन्दर्यजातस्य वस्तुनः उपस्थिति आधिक्येन परिलक्ष्यते। तेन प्रतिपादिता अनाहार्यसौन्दर्यस्य निदर्शनानि अग्रे सप्रपञ्चं आलोच्यते।

रमणीयत्वं तत्रैव वर्तते यत् प्राकृतिकरूपेण सौन्दर्य भवति। अतः कलिदासः स्वकाव्येषु प्राकृतिकसौन्दर्यम् अत्यधिकं महत्वं प्रदीयते। कालिदासप्रणीतम् अभिज्ञाशाकुन्तलं प्रकृतिमानवोभयसौन्दर्यस्य उत्कृष्टं निदर्शनं वर्तते। सर्वोत्कृष्टं वैशिष्ट्यमेतदेव यत् कालिदासस्य प्रकृतिवर्णने मनुष्यसत्ता अन्तर्निहिता वर्तते। शकुन्तलायाः सौन्दर्यवर्णनं प्राकृतिकोपादानेन समाबद्धं प्रतिभाति। कवेः सौन्दर्यनिरीक्षणशक्तिः सूक्ष्मा वर्तते। अनेन सूक्ष्मदृष्ट्या चित्रितस्य प्रकृतेः सूक्ष्मातिसूक्ष्मं रहस्यं मानवहदयम् आह्लादयति। अनेन प्रतिपादिते प्रकृतिवर्णने एतावता सजीवता समागच्छति यत् पाठकानां नेत्रसमक्षं प्रकृतिः नृत्यन्तीति प्रतिभाति। कालिदासेन तत्कृतेषु प्रत्येककाव्येषु नाटकेषु च प्रकृतिवर्णनं साधितमेव। अभिज्ञानशाकुन्तले शकुन्तला, विक्रमोर्वशीये उर्वशी, कुमारसम्भवे पार्वती, मेघदूते यक्षिणी चेत्यादीनि चरित्राणि पाठकसमाजे सोन्दर्यसूत्ररूपेण हृदयानि आकर्षयन्ति। महाकविकालिदासवर्णितानि काव्यगतचरित्राणि सौन्दर्याधायकानि दृश्यन्ते। महाकवेः काव्यकृतिषु सौन्दर्यतत्वस्य केन्द्ररूपेण नारीचरित्राणि मुख्यानि वर्तन्ते। अनेन न केवलं मानवसौन्दर्यस्य प्रकृतिसौन्दर्यस्यापि हृदयाकर्षकं चित्रं चित्रितम्। नारीदेहे यथा अलौकिकसौन्दर्य वर्तते तथैव अलौकिककान्तिः प्रकृतेः विविधोपकरणेष्वपि अवलोक्यते। प्रकृतिगतं वस्तु सुन्दरं प्रतिभातीति प्रकृतिसमराजा कालिदासेन विविधस्थलेषु वर्णितम्। यथा अभिज्ञानशाकुन्तले शकुन्तला प्रकृत्या रमणी कन्या अस्ति। तत्र शकुन्तलाया अवयववर्णनावसरे प्राकृतिकोपादानस्य मनोज्ञसन्निवेशः रक्षणीयो वर्तते। यथा –

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

श्लोकेऽस्मिन् प्रकृतेः यादृशं चित्रं चित्रितं तत् केवलं कालिदास इव सूक्ष्मद्रष्टा एव चित्रितुं प्रभवति न चान्ये चित्रितुं प्रभवन्ति। तथैव महाकविः शकुन्तलायाः पतिगृहगमनानुमतिप्रदाने प्राकृतिकोपादानेषु चैतन्यम् आरोप्य पाठकहृदयम् अभिव्यञ्जयति। यथा–

अनुमतगमना शकुन्तला सा तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यदासीत्प्रतिबचनीकृतमेभिरात्मनः॥

इत्थं बहुषु स्थानेषु महाकविकालिदासप्रख्यापिता सौन्दर्यावधारणा स्फुटरूपेण निगदिता वर्तते। रूपचर्चायां कविकुलगुरोः कालिदासस्य अद्वितीयं स्थानं वर्तते।

कविकालिदासेन तत्कृतकाव्येषु अलङ्कार– भूषणादयः शब्दाः प्रायः स्वर्णमणिभिः निर्मितालडकारिकाणां कृते प्रयुक्ताः। मण्डनशब्दः प्राकृतिकोपादानानां पुष्पचन्दनपल्लवादीनां

वर्णनप्रसङ्गे प्रयुज्यते। अनेन रूपचर्चायाम् अलङ्काराणां उपयोगिता तथा नापक्षीयते इति प्रतिभाति। यतो हि वल्कलधारिणी अपि शकुन्तला तथैव रम्यते यथा पङ्कमध्ये शैवलेन अनुविद्धं कमलम्। यथोक्तं तेन --

सरसिजमनुविद्धं शैवालेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

वल्कलप्रभृतिना प्राकृतिकोपादानेन कृतसज्जाया अपि शकुन्तलायाः सौन्दर्यं नूनमपि ह्रासं न जातम्।

नारीसौन्दर्यवर्णनप्रसङ्गे दुष्यन्तमुखकमलव्याजेन शकुन्तलायाः कृते निःसृताः महाकविकृताः नैकाः श्लोकाः प्रेक्षनीयाः वर्तन्ते। दुष्यन्तदृष्ट्या शकुन्तला सृष्टिकर्तुः ब्रह्मणो मानसिकक्ल्पनायाः श्रेष्ठा रचना वर्तते। विधातोः निर्मानकौशलम् अवलोक्य एतदेव जायते यत् सः सम्पूर्णसंसारस्य सौन्दर्यं संकलयन् एकस्मिन् शरीरे समावेशं करोति। तदेवोक्तं निम्नोक्तेन श्लोकमाध्यमेन--

चित्रे निवेश्य परिकल्पितसर्वयोगा।
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सामे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः

पुनः शकुन्तलायाः सौन्दर्यं दिव्यरूपे चित्रितं महाकविना। यथोक्तं तेन --

मानुषीषु कथं वा स्यादस्य रुपस्य संभवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्।



८.११ अध्यायात् किमवगतम्

- महाकविकालिदासस्य जीवनवृत्तं जानीमः।
- महाकविकालिदासेन विरचितानां ग्रन्थानां परिचयं जानीमः।
- नाटकस्य स्वरूपं विश्लेषेण जानीमः।
- अभिज्ञानशाकुन्तलम् इति नाटकस्य परिचयं प्राप्नुमः।
- अभिज्ञानशाकुन्तलनाटके नाटकीयतत्त्वानां परिचयं जानीमः।
- अभिज्ञानशाकुन्तले सौन्दर्यतत्त्वम् केन प्रकारेण प्रयुज्यते तत् जानीमः।
- अभिज्ञानशाकुन्तलनाटकस्य अङ्कानां सारांशं जानीमः।



८.१२ ज्ञानाधिक्यम्

१) कालिदास का सौन्दर्यबोध – रानी त्रिपाठी मुकुल, परिमल पब्लिकेशन, दिल्ली, २०१५

२) अभिज्ञानशाकुन्तलम्—कालिदास, द्विवेदी कपिलदेव, रामनारायण लाल बेनी माधव, इलाहाबाद, द्वितीय संस्करण, १९६२

३) कालिदास ग्रन्थावली, चतुर्वेदी सीताराम, अखिल भारतीय विक्रम परिषद्, काशी, द्वितीय संस्करण, २००७

४) संस्कृत नाट्यकला, शुक्ल रामलखन, मोतीलाल बनारसीदास, दिल्ली १९७१

५) संस्कृत नाटक समीक्षा, सिंह इन्द्रपाल, साहित्य निकेतन, कानपुर, प्रथम संस्करण, १९६०

६) सौन्दर्यतत्वम् – Surendra Dr. Gupta – भारती भण्डार लीडर प्रेस।

७) अभिज्ञानशाकुन्तलम् – द्विवेदी शिवप्रसाद– भारतीय विद्या प्रकाशन,वाराणसी।

८) अभिज्ञानशाकुन्तलम् – सुधाकर डाए मालवीयः – चौखम्बा कृष्णदास अकादमी, वाराणसी, २०११

९) मेघदूतम् – शास्त्री डाए दयाशङ्करः – चौखम्बा सुरभारती प्रकाशन, वाराणसी।



८.१३ अग्रगत्याः निरूपणम्

(क) अग्रगत्याःनिरीक्षणम्

प्रश्नः १ उत्तरम् : नाटकम्।

प्रश्नः २ उत्तरम् : भरतः।

प्रश्नः ३ उत्तरम् : सप्त।

प्रश्नः ४ उत्तरम् : कालिदासः।

प्रश्नः ५ उत्तरम् : नवदश।

प्रश्नः ६ उत्तरम् : त्रीणि।

प्रश्नः ७ उत्तरम् : मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् चेति।

प्रश्नः ८ उत्तरम् : षड्ऋतुणाम् वर्णनम् अस्ति।

(ख) अग्रगत्याःनिरीक्षणम्

प्रश्नः १ उत्तरम् : कालिदासः

प्रश्नः २ उत्तरम् : अनसूया

प्रश्नः ३ उत्तरम् : गौतमी

प्रश्नः ४ उत्तरम् : माढव्यः

प्रश्नः ५ उत्तरम् : मारीचस्य

प्रश्नः ६ उत्तरम् : ४

प्रश्नः ७ उत्तरम् : शचीतीर्थे

प्रश्नः ८ उत्तरम् : सर्वदमनः

प्रश्नः ९ उत्तरम् : कण्वस्य

प्रश्नः १० उत्तरम् : दुर्वाससः



८.१४ अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः १: दुष्यन्तशकुन्तले केन विधिना परिणीते ?

प्रश्नः २: शकुन्तला कस्य मुनेः पालिता पुत्री आसीत् ?

प्रश्नः ३: मेनका का ?

प्रश्नः ४: कस्य मुनेः अभिशापेन राजा दुष्यन्तः शकुन्तलां विस्मृतवान् ?

प्रश्नः ५: अभिज्ञानशाकुन्तलम् इति नाटके कति अङ्काः सन्ति ?

प्रश्नः ६: कालिदासः कस्य रीतेः कविः आसीत् ?

प्रश्नः ७: काव्येषु रम्यं किम् ?

प्रश्नः ८: दुष्यन्तशकुन्तलयोः पुत्रस्य किं नाम ?

प्रश्नः ९: सप्तमे अङ्के कस्य मुनेः वर्णनं प्राप्यते ?

प्रश्नः १०: मेनका शकुन्तलां कस्य आश्रमे नीतवती ?

प्रश्नः ११: सर्वदमनः कः ?

प्रश्नः १२: कण्वमुनेः शिष्यौ कौ ?

प्रश्नः १३: गौतमी का ?

टिप्पणी

१. कालिदासः

२. उपमा कालिदासस्य

३. अभिज्ञानशाकुन्तलम्

४. काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।

५. तत्रापि च चतुर्थोऽकस्तत्र श्लोकचतुष्टयम्॥

दीर्घप्रश्नाः

१. महाकविकालिदासस्य परिचयं लिखत।

२. कालिदासप्रणीते अभिज्ञानशाकुन्तलनाटके सौन्दर्यतत्त्वं कथम् उपन्यस्तं लिखत।

३. कालिदासविरचितानां नाटकानां विश्लेषेण परिचयं लिखत।

४. नाटकस्य स्वरूपम् आलोचयत्।

५. नाटकस्य स्वरूपं विलिख्य अभिज्ञानशाकुन्तले नाटकीयतत्त्वानां विश्लेषणं कुरुत।

६. अभिज्ञानशाकुन्तलम् इति नाटकस्य चतुर्थाङ्कस्य सप्तमाङ्कस्य च सारांशं लिखत।

*** ***** ***

अध्यायः ९ : अभिज्ञानशाकुन्तलम् (प्रथमाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

९.१ उद्देश्यम्

९.२ परिचयः

९.३ अभिज्ञानशकुन्तलम् नाटकस्य प्रथम अङ्कस्य मूल संस्कृत पाठः

९.४ प्रथम अङ्कस्य मूल संस्कृत पाठ्यांशस्य असमीया अनुवादः

९.५ व्याकरणटिप्पणी

९.६ श्लोकानां संस्कृतव्याख्या

९.७ अध्यायात् किमवगतम्

९.८ ज्ञानाधिक्यम्

९.९ अग्रगत्याः निरूपणम्

९.१० अभ्यासप्रश्नाः

९.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- अभिज्ञानशाकुन्तलम् इति नाटकस्य प्रथमाङ्कस्य विषये ज्ञातुं शक्नोन्ति।
- नाटकस्य मुख्यपात्रैः तथा आश्रमस्य परिचयः प्राप्तुं शक्नोन्ति।
- नाटकस्य मूलपाठः तस्य असमियानुवादःच ज्ञातवन्ति।

९.२ परिचयः

अस्मिन् अध्याये कालिदासस्य 'अभिज्ञानशाकुन्तलम्' नाटकस्य प्रथमखण्डस्य पाठः तदनुवादश्च प्रस्तुतः भविष्यति। संस्कृतसाहित्यस्य बहूनां पाठ्यपुस्तकानां भवद्भिः परिचयः प्राप्तः एव। संस्कृतसाहित्ये नाटकसाहित्यस्य पर्याप्तं स्थानम् अस्ति। नाट्यसाहित्यं सर्वकाव्येषु सुन्दरतमं कथ्यते। तत्र बहवः उपायाः सन्ति येन भवन्तः स्वस्य आत्मविश्वासं वर्धयितुं शक्नुवन्ति। अस्य उत्तमनाटकस्य प्रत्येकभागः सुन्दरः अस्ति। अस्मिन् अध्याये भवन्तः नाटकस्य प्रथमाङ्कस्य मूलपाठःतदनुवादाः च अध्ययनं करिष्यन्ति।

९.३ अभिज्ञानशाकुन्तलम् नाटकस्य प्रथम अङ्कस्य मूल संस्कृत पाठः

'अभिज्ञानशाकुन्तलम्' नाटकस्य सप्त कृतयः सन्ति। नाटकस्य सप्त-अङ्कानां माध्यमेन कालिदासः महाभारतस्य प्रथमे अध्याये प्राप्यमाणानां शकुन्तलोपनिषदस्य हास्यरहितघटनानां रसपूर्णविषयत्वेन प्रस्तुतं करोति। प्रथमाङ्कस्य आरम्भः नन्दीश्लोकेन भवति। ततः परिचयः

आरभ्यतेयेन राज्ञः प्रवेशं सूचयति। अस्मिन् अङ्के नायकः नायिका च प्रथमवारं मिलित्वा प्रेम्णा पतन्ति।

अथ प्रथमोऽङ्कः

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च)।

सूत (राजानं मृगं चावलोक्य) आयुष्मन्,
कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥ ६ ॥
(अन्वय-- कृष्णसारे अधिज्यकार्मुके त्वयि च चक्षुः ददत् (अहं) मृगानुसारिणं साक्षात् पिनाकिनम् पश्यामि इव।।)

राजा सूत, दूरममुना सारङ्गेणवयमाकृष्टाः।
अथपुनरिदानीमपि –
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्या प्रयाति ॥ ७ ॥
(अन्वय--पश्य, अनुपतति स्यन्दने ग्रीवाभङ्गाभिरामं दत्तदृष्टिः, शरपतनभयात् भूयसा पश्चार्धन पूर्वकायं प्रविष्टः, श्रमविवृतमुखभरंशिभिः अर्धावलीदैः दर्भैः कीर्णवर्त्मा, उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्या स्तोकं प्रयाति।)
तदेष कथमनुपतत एव प्रयत्नप्रेक्षणीयः संवृत्तः ?

सूत आयुष्मन्, उद्धातिनी भूमिरिति मया रश्मिसंयमनाद् रथस्य मन्दीकृतो वेगः।
तेन मृग एष विप्रकृष्टान्तरः संवृत्तः। स म्प्रति समदेशवर्तिनस्तेन दुरासदो भविष्यति।

राजा तेन हिं मुच्यतामभीषवः।

सूत यदाज्ञापयत्यायुष्मान्। (रथवेगं निरूप्य) आयुष्मन्, पश्य पश्य –
मुक्तेषु रश्मिषु निरायत पूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः॥ ८॥

राजा सत्यम्, अत्तत्यै हरित्यऽपि हरीन् वर्तन्ते बाजिनः।
तथा हि –
यदालोके सूक्ष्मं व्रजति सहसा तद् विपुलतां
यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद् वक्रं तदपि समरेखं नयनर्यो
न मे दूरे किंचित् श्रणमपि न पा पार्श्वौ रथजवात् ॥ ९॥

नान्दीः नाटकस्य प्रारम्भे स्थिता मङ्गलवाचकश्लोकः। नाटकस्य रचनायाः तथा उपस्थापनायाः क्षेत्रे बिघ्नः न भवेत् इत्यर्थे एषः श्लोकः पठ्यते।

प्रस्तावनाः आरम्भे स्थिता एका भूमिका। अत्र नाटकस्य विषये तथा नाटककर्तुः विषये सामान्यतया एकः आभासः प्रदीयते।

सूत पश्यैनं व्यापाद्यमानम्। (इति शरसन्धानं नटियति)।

(नेपथ्ये)

भो भो राजन्, आश्रममृगोऽयं न हन्तव्यो न इन्तव्यः।

सुत (आकर्ण्यावलोक्य च) आयुष्मन्, अस्य खलु ते बाणपातवर्तिनः कृष्णसारस्यान्तरे, तपस्विन उपस्थिताः।

राजा (ससम्भ्रमम्) तेन हि प्रगृह्यन्तां वाजिनः।

सूत तथा। (इति रथे स्थापयति)।

(ततः प्रविशत्यात्मनातृतीयों वैखानसः)।

वैखानस (हस्तमुद्यम्य) राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यो।

द्वितीयं खलु न खलु बाणः सनिपात्योऽयमस्मिन्।
मृदुनि मृगशरीरे तुलाराशाविवाग्निः।

तृतीयं वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥ १० ॥

वैखानस तत्साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ ११ ॥

राजा एष प्रतिसंहृतः। (इति यथोक्तं करोति)।

बेखानस सदृशमेतत् पुरुवंशप्रदीपस्य।
जन्म यस्य पुरोवंशे युक्तरूपमिदं तव।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमान्पुहि॥ १२ ॥

इतरौ (बाहू उद्यम्य) सर्वथा चक्रवर्तिनं पुत्रमाप्नुहि।

राजा (सप्रणामम्) प्रतिगृहीतम्।

वैखानस राजन्, समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्य-कार्य्यातिपातः, प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः।

अपि च -

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद् भूजो मे रक्षति मोर्वीकिणाङ्क इति ॥ १३ ॥

राजा अपि संनिहितोऽत्र कुलपतिः ?

वैखानस इदानीमेव दुहितरं शकुन्तलाम् अतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

राजा भवतु। तामेव पश्यामि। सा खलु विदितभक्तिं मां महर्षेः करिष्यति।

वैखानस साधयामस्तावत् (इति सशिष्यो निष्क्रान्तः)।

राजा सूत, चोदयाश्वान्। पुण्याश्रमदर्शनेन तावदात्मानंपुनीमहि।

सूत यदाज्ञापयत्यायुष्मान्। (इति भूयो रथवेगं निरूपयति)।

राजा (समन्तादवलोक्य) सूत, अकथितोऽपि ज्ञायत एव यथा अयमाभोगस्तपोवनस्येति।

सूत कथमिव।

राजा किं न पश्यति भवान्? इह हि –

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामध :
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा–
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥ १४॥

सूत सर्वमुपपन्नम्।

राजा (स्तोकमन्तरं गत्वा)तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय। यावदवतरामि।

सूत धृताः प्रग्रहाः। अवतरत्वायुष्मान्।

राजा (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः प्रत्यवेक्ष्य. अहमुपावर्ते तावदार्द्रपृष्ठः क्रियन्तां वाजिनः।

सूत तथा। (इति निष्क्रान्तः)।

राजा (परिक्रमावलोक्य च) इदमाश्रमद्वारम्। यावत्प्रविशामि।

(प्रविश्य, निमित्तं सूचयन्)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥ १५॥

(नेपथ्ये)।

इत इतः सख्यौ।

राजा (कर्ण दत्वा) अये, दक्षिणेन वृक्षवाटिकाम् आलाप इव श्रूयते। यावदत्र गच्छामि। (परिक्रम्यावलोक्य च)अये। एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते। (निपुनं निरूम्य) अहो, मधुरमासां दर्शनम् –

शुद्धान्त दुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥ १६॥
यावदिमां छायामाश्रित्य प्रतिपालयामि (इति विलोकयन् स्थितः)
(ततः प्रविश्यति यथोक्त व्यापारा सह सखीभ्यां शकुन्तला)।

शकुन्तला इत इतः सख्यौ।

अनसूयाहला शकुन्तले? त्वत्तोऽपि तात काश्यपस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि, येन नवमालिकाकुसुमपेलवा त्वमपि एतेषामालवालपूरणे नियुक्ता।

शकुन्तला न केवलं तातनियोग एव, अस्ति मे सोदर स्नेहो एतेषु।

(इति वृक्षसेचनं रूपयति)।

राजा (आत्मगतम्)कथमियं सा कण्वदुहिता? असाधुदर्शी खलु तत्रभवान् काश्यपः,
य इमामाश्रमधर्मे नियुंक्ते।
इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पल पत्रधारया
समीलतां छेतुमृषिर्व्यवस्यति॥ १७॥
भवतु; पादपान्तर्हितएव विश्रब्धं तावदेनां पश्यामि। (इति तथा करोति)।

शकुन्तला हला अनसूये। अतिपिनद्धेन वल्कलेन प्रियंवदया दृढं नियन्त्रितास्मि। शिथिलय तावदेतत्।

अनसूया तथा। (इति शिथिलयति)।

प्रियम्बदा (सहासम्) अत्र पयोधरविस्तारयितृ आत्मनो यौवनमुपालभस्व।

राजा कामम् अननुरूपमस्य बयसः बल्कलं, न पुनरलंकार श्रियं न पुष्यति। कुतः -
सरसिजमनुविद्धं शैबलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा बल्कलेनापि तण्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।। १८।।

शकुन्तला (अग्रतोऽवलोक्य) सख्यौ, एष वातेरित पल्लवाङ्गुलीभिस्त्वरयतीव मांकेसर वृक्षकः। यावदेन संभावयामि। (इति परिक्रामति)।

प्रियम्बदा हला शकुन्तले, अत्रैव तावन्मुहूर्तं तिष्ठ, यावत् त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति।

शकुन्तला अतः खलु प्रियम्बदासि त्वम्।

राजा प्रियमपि तथ्यमाह शकुन्तलां प्रियम्बदा। अस्याः खलु -
अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥ १९॥

अनसूया हला शकुतन्ले, इयं स्वयम्वरवधूः सहकारस्य त्वया कृत नामधेया वनज्योत्स्नेति नवमालिका। एनां विस्मृतवत्यसि।

शकुन्तला तदात्मानमपि विस्मारष्यामि (लतामुपेत्यावलोक्य च)।
हला, रमणीये खलु काले एतस्य लतापादपमिथुनस्य व्यातिकरः संवृत्तः। नवकुसुम यौवना वनज्योत्स्ना, स्निग्धपल्लवतया च उपभोगक्षमः सहकारः (इति पश्यन्ती तिष्ठति)।

प्रियम्बदा अनुसूये, जानासि किंनिमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यतीति।

अनसूया न खलु विभावयामि। कथय।

शकुन्तला एष नूनं तवात्मगतो मनोरथः। (इति कलशमावर्जयति)

प्रियम्बदा यथा वनज्यत्स्ना अनुरूपेण पादपेन संगता, अपि नाम एवमहमप्यात्मनोऽनुरूपं वरं लभयति।

राजा अपि नाम कुलपतेरियमसवर्ण क्षेत्रसम्भवा स्यात्? अथवा कृतं सन्देहेन –
असंशयं क्षत्र परिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ २० ॥
तथापि तत्त्वत एवैनामुपलप्से।

शकुन्तला (ससम्भ्रमम्) अहो, सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते (इति भ्रमरबाधां रूपयति)।

राजा (सस्पृहं विलोक्य) –
चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्बत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वाण्वेषान्मधुकर, हतास्त्वं खलु कृती ॥ २१ ॥

शकुन्तला न एष धृष्टो विरमति। अन्यतो गमिष्यामि। (पदान्तरे स्थिता सदृष्टिक्षेपनम्)। कथमितोऽप्यागच्छति। हला, परित्रायेथां मां अनेन दुर्विनीतेन दुष्टमधुकरेण अभिभूयमानाम्।

उभे (सस्मितम्) के आवां परित्रातुम्? दुष्यन्तमाक्रन्द। राजरक्षितव्यानि तपोवनानि नाम।

राजा अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यं न भेतव्यम् (अर्धोक्ते स्वगतम्) राजहमस्मीति परिज्ञानं भविष्यति। भवतु। एवं तावदभिधास्ये।

शकुन्तला (पदान्तरे स्थित्या, सदृष्टिक्षेपम्) कथमितोऽपि मामनुसरति?

राजा (सत्वरमुपसृत्य)।
कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ २२ ॥
(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः)।

अनसूया आर्य, न खलु किमप्यत्याहितम्। इयं नो प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता। (इति शकुन्तलां दर्शयति।)

राजा (शकुन्तला अभिमुखो भूत्वा अपि तपो वर्धते।
(शकुन्तला साध्वसादवचना तिष्ठति)

अनसूया इदानीमतिथिविशेषलाभेन। (शकुन्तलामुद्दिशा) हला शकुन्तले, गच्छोटजम्; फलमिश्रमर्घमुपहर। इदं पादोदकं भविष्यति।

राजा भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

प्रियम्बदा तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्य्यः।

राजा नुनं यूयमप्यनेन कर्मणा परिश्रान्ताः।

अनसूया हला शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्; अत्रोपविशामः (इति सर्वा उपविशन्ति)।

शकुन्तला (आत्मगतम्) किं नु खल्विमं प्रेक्ष्य तपोवन विरोधिनो विकारस्य गमनीयस्मि संवृत्ता।

राजा (सर्वा विलोक्य) अहो, समानवयोरूपरमणीयं भवतीनां सौहार्दम्।

प्रियम्बदा (जनान्तिकम्) अनसूये, को नु खल्वेष, चतुरगम्भीराकृतिश्चतुरं प्रियमालपन् प्रभाववानिव लक्ष्यते ?।

अनसूया हला, ममापि अस्ति कौतूहलम्। पृच्छामि तावदेनम्। (प्रकाशम्) आर्यस्य मधुरालापजनित विश्रम्भो मां मन्त्रयते-कतमो वा आर्येन राजर्षेर्वंशः अलंक्रियते ? कतमो वा विरहपर्य्युत्सुकजनः कृतो देशः ? किं निमित्तं वा सुकुमार तरोऽपि तपोवनगमनपरिश्रमस्य आत्मा पदमुपनीतः।

शकुन्तला (आत्मगतम्) हृदय, मा उत्ताम्य। एषा त्वया चिन्तितानि अनसूया मन्त्रयते।

राजा (आत्मगतम्) कथमिदानीमात्मानं निवेदयामि ? कथं वा परिहारं करोमि ? भवतु; एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति, यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोहम विघ्नक्रियोपलम्थाय पुण्याश्रमदर्शनप्रसङ्गेन धर्मारण्यमिदमायातः।

अनसूया सनाथा इदानीं धर्मचारिणः। (शकुन्तला शृङ्गारलज्जां रूपयति)।

सख्यौ (उभयोराकारं विदित्या, जनान्तिकम्) हला शकुन्तले। यदि अत्र अद्य तातः सन्निहितो भवेत्।

शकुन्तला (सरोषमिव) ततः किं भवेत्।

सख्यौ इमं जीवित सर्वस्वेनापि अतिथिविशेषं कृतार्थं करिष्यति।

शंकुन्तला (सकृतककोपम्) युवामपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे। न वां वचनं श्रोष्यामि।

राजा वयमपि तावद्भवत्योः सखीगतं किमपि पृच्छामः।

सख्यौ आर्यः अनुग्रह इव इयमभ्यर्थना।

राजा भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत्।

अनसूया शृणोत्वार्यः। अस्ति कोऽपिकौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।

राजा अस्ति। श्रूयते।

अनसूया तमावयोः प्रियसख्याः प्रभवमवगच्छथ।
उज्झिताया: शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता।

राजा 'उज्झित' -शब्देन जनितं मे कौतूहलम्। आ मूलाच्छ्रोतुमिच्छामि।

अनसूया शृणोत्वार्यः, गौतमीतीरे पुरा किल तस्य उद्रे तपसि वर्तमानस्य किमपि जातशङ्कैः देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी।

राजा अस्त्योतदन्यसमाधिमीरुत्वं देवानाम्।

अनसूया ततो वसन्तोदाररमनीये समये तस्या उन्मादयितृरूपं प्रेक्ष्य - (इति अर्धोक्ते लज्जया

विरमति)।

राजा परस्ताज्ज्ञायत एव। सर्वथा अप्सरः सम्भवैषा।

अनसूया अथ किम्।

राजा उपपद्यते,

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २३॥

(शकुन्तलाऽधोमुखी तिष्ठति)।

राजा (आत्मगतम्) लब्धावकाशो मे मनोरथः। किन्तु तस्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा द्वैधीभावकातरं मे मनः।

प्रियम्बदा (सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा)।

पुनरपि वक्तुकाम इवार्य्यः।

(शकुन्तला सखीमङ्गुल्या तर्जयति)।

राजा सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्।

प्रियम्बदा अलं विचार्य्य। अनियन्त्रणानुयोगस्तपस्विजनो नाम।

राजा एतद् पृच्छामि –

वैखानसं किमनया व्रतमाप्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम्।
अत्यन्तमेव सदृशेक्षणवल्लभाभि –
राहो निवत्स्यति समं हरिणाङ्गनाभिः॥ २४॥

प्रियम्बदा आर्य, धर्माचरणेऽपि परवशोऽयं जनः गुरोः पुनरस्या अनुरूपवर प्रदाने संकल्पः।

राजा (आत्मगतम्) न दुरवापा इयं खलु प्रार्थना।

भव हृदय, साभिलाषं सम्प्रति संदेहनिर्णयो जातः।
आशंकसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २५॥

शकुन्तला (सरोषमिव) अनसूये, गमिष्याम्यहम्।

अनसूया किं निमित्तम्।

शकुन्तला इमामसंबद्धप्रलापिनीं प्रियम्बदामार्यायै गौतम्यै निवेदयिष्यामि।

अनसूया सखि, न युक्तं ते अकृतसत्कारमतिथि विशेषं विसृज्य स्वछन्दतो गमनम्।

(शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव)।

राजा कथं गच्छति? (ग्रहीतुमिच्छनिगृह्यात्मानम्, आत्मगतम्) अहो। चेष्टा प्रतिरूपिका कामिजनमनोवृत्तिः। अहं हि –

अनुयास्यन् मुनितनयां सहसा विनयेन बारितप्रसरः।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ २६॥

प्रियम्बदा (शकुन्तलां निरुध्य) हला। न ते युक्तं गन्तुम्।

शकुन्तला (सभ्रुभङ्गम्) किंनिमित्तम्।

प्रियम्बदा वृक्षसेचने द्वे धारयसि मे। एहि तावत्, आत्मानम् मोचयित्वा ततो गमिष्यासि।
(इति बलादेनां निवर्तयति)

राजा भद्रे, वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये। तथाहि अस्याः –
स्रस्तांसावतिमात्र लोहिततलौ बाहू घटोत्क्षेपणा
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
स्रस्तं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्नंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः॥ २७॥
तदहमेनामनृणां करोमि। (इत्यङ्गुलीयं दातुमिच्छति)
(उभे नाममुद्राक्षराणि अनुवाच्य परस्परमवलोकयतः)।

राजा अलमन्यथा संभाव्य। राज्ञः परिग्रहो अयम्।

प्रियम्बदा तेन हि नार्हत्येतदङ्गुलीयकमङ्गुली वियोगम्।
आर्यस्य वचनेनैव अनृणा एषा।
(किञ्चिद्विहस्य) हला शकुन्तले, मोचितासि अनुकम्पिना आर्येन, अथवा महाराजेन,
गच्छेदानीम्।

शकुन्तला (आत्मगतम्) गमिष्यामि, यद्यात्मनः प्रभविष्यामि। (प्रकाशम्) का त्वं विसर्जितव्यस्यरोद्धव्यस्य वा।

राजा (शकुन्तलां विलोक्य) (आत्मगतम्) किं नु खलु यथा वयम् अस्याम्, एवम् इयमपि अस्मान्प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुतः –
वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहितामयि भाषमाने।
कामं न तिष्ठति मदाननसंमुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ २८॥
(नेपथ्ये)
भो भोस्तपस्विनः, संनिहितास्तपोवनसत्त्वरक्षायै भवत।
प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः।
तुरगखुरहतस्तथा हि रेणु
विटप-विषक्त-जलाद्रवल्कलेषु।
पतति परिणतारुण प्रकाशः
शलभसमूह इवाश्रमद्रुमेषु ॥ २९॥
अपि च –
तीव्राघातादतिमुख तरुस्कभग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्ग सञ्जातपाशः।

मूर्तो विध्नस्तपस इव नो भिन्नसारङ्गयूथो
र्मारण्यं विरुजति गजः स्यन्दनालोकभीतः ॥ ३० ॥
(सर्वाः कर्ण दत्त्वा किञ्चिदिव संभ्रान्ताः)।

राजा (आत्मगतम्) अहो धिक्। पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु, प्रतिगमिष्यामस्तावत्।

सख्यौ आर्य, अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि नः उटजगमनाय।

राजा (ससंभ्रमम्) गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे।
(सर्वे उत्तिष्ठन्ति)।

सख्यौ आर्य असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जावहे आर्यं विज्ञापयितुम्।

राजा मा मैवम्; दर्शनेनैव अत्र भवतीनां पुरुस्कृतोऽस्मि।

शकुन्तला अभिनवकुशसूचि-परिक्षितौ मे चरणौ कुरबकशाखा परिलग्नं च मे वल्कलम्।
तत् प्रतिपालयतं मां, यावदेतद् मोचयामि।
(शकुन्तला राजानमवलोकयन्ती सव्याजं बिलम्ब्य सह सखीभ्यां निष्क्रान्ता)

राजा (निश्श्वस्य) हन्त। गता सर्वाः। अहं पुनः मन्दोत्सुकयोऽस्मि गमनं प्रति। यावदानुयात्रिकान् समेत्य नातिदूरे तपोवनस्य निवेशयेयम्। (द्विपदिकया) न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम्। मम हि -
गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३१ ॥
(निष्क्रान्ताः सर्वे)(इति प्रथमोऽङ्कः)।।

९.४ प्रथम अङ্কস্য মূল संस्कृत पाठ্যাংशস্য অসমীয়া অনুবাদঃ

ওপৰত বৰ্ণনা কৰা অভিজ্ঞান শকুন্তলম্ নাটকৰ প্ৰথম অঙ্কৰ মূল সংস্কৃত পাঠৰ অসমীয়া অনুবাদ তলত দিয়া হ'ল —

(তাৰ পাছত সাৰথিৰ সৈতে ৰজা (দুষ্যন্তই) হাতত ধনু-শৰ লৈ ৰথত উঠি হৰিণ এটাক অনুসৰন কৰি প্ৰৱেশ কৰে।)

সাৰথি (ৰজা আৰু হৰিণটোলৈ চাই) আয়ুষ্মান* হৰিণটোলৈ আৰু ধনু-শৰ হাতত লৈ থকা আপোনালৈ চাই মোৰ মনত হৈছে যেন মৃগ অন্বেষণ কৰা পিনাকপাণি মহাদেৱকহে দেখিছো।।

ৰজা সাৰথি* এই হৰিণটোৱে আমাক বহু দূৰলৈ আকৰ্ষণ কৰি আনিলে। কিন্তু সি এতিয়াও মনোহৰভাৱে ডিঙি বেঁকা কৰি বাৰে বাৰে তাৰ পাছে পাছে যোৱা ধাৱমান ৰথৰ ফালে উভতি চাইছে, শৰ পৰাৰ ভয়ত তাৰ শৰীৰৰ আগছোৱা পাছচোৱাত কোঁচ খুৱাই সুমুৱাইছে, পৰিশ্ৰমত ক্লান্ত হৈ তাৰ মেল খোৱা মুখৰ পৰা কুশঘাঁহবোৰ বাটত সিচৰতি হৈ পৰিছে, চোৱাচোন সি তীব্ৰবেগে জঁপিয়াই যোৱা কাৰণে তাৰ

শৰীৰ শূন্যতে বেছিভাগ আৰু মাটিত কমেই কিন্তু এইটো কেনেকৈ হ'ল যে আমি তাৰ পিছে পিছে যোৱা সত্ত্বেও এতিয়া আছে। তাক ভালদৰে দেখা পোৱা নাই ।

সাৰথি আয়ুষ্মন্ ❋ এই ভূমি ভাগ ওখ-চাপৰ হোৱা বাবে মই (ঘোঁৰাৰ) লেকাম টানি ধৰাত ৰথৰ বেগ কমিছে, সেয়ে হৰিণটো আমাৰ পৰা অধিক আঁতৰলৈ গৈছে । এতিয়া আমি সমতল পালোহি গতিকে এতিয়া আপুনি তাক সহজে লগ পাব।

ৰজা তেনেহ'লে তুমি লেকাম ঢিলাই দিয়া।

সাৰথি সেয়ে হওক হে আয়ুষ্মান্ ❋ (ৰথৰ গতি নিৰূপণ কৰি) আয়ুষ্মান্ চাওঁক চাওঁক। লেকাম ঢিলাই দিয়াত ঘোঁৰাবোৰে যেনিবা হৰিণটোৰ বেগ সহিব নোৱাৰি কেনেকৈ লৰি গৈছে। সিহঁতৰ শৰীৰৰ আগচোৱা দীঘলীয়া হৈ পৰিছে, মুৰত বন্ধা চামৰৰ আগবোৰ থিৰে আছে, কান বোৰ থিয় আৰু নিশ্চল হৈছে। আৰু সিহঁতৰ খুৰাৰে উৰুৱা ধূলিবোৰে সিহঁতৰ শৰীৰ স্পর্শ কৰিব পৰা নাই।। ⓘⓘ

ৰজা ঠিকে কৈছা। এই ঘোঁৰাবোৰে সূর্য আৰু ইন্দ্রৰ ঘোঁৰাকো চেৰ পেলাইছে । তাৰ ফলত যিটো সৰু যেন দেখা গৈছিল হঠাৎ তে সি ডাঙৰ হৈ পৰিছে । যাৰ মাজত ফাক আছিল, সেয়া যেন জোৰা লাগিছে। যিটো বাস্তবিকৰূপত বেঁকা তাকো পোন যেন দেখা গৈছে । ৰথৰ বেগত কোনো বস্তু এখন্তেকো আমাৰ পৰা দূৰত বা ওচৰতে নাই।

সাৰথি, চোৱা, এইবাৰ হৰিণটো মৰিল। (ধনুত শৰ লগোৱাৰ অভিনয় কৰিলে)। (নেপথ্যত)

হে ৰাজন্ এইটো আশ্রমৰ মৃগ। ইয়াক নামাৰিব, নামাৰিব।

সাৰথি (শুনি আৰু আগলৈ চাই) হে আয়ুষ্মান্। আপোনাৰ শৰ আৰু হৰিণৰ মাজত কেইজনমান তপস্বী আহি ওলাইছে।

ৰজা (ব্যগ্রভাৱে) তেনেহ'লে ঘোঁৰাকেইটাক সংযত কৰা।

সাৰথি বাৰু যেয়ে হওক। (ৰথখন ৰখালে)।

(তাৰ পাছত বৈখানসে শিষ্যসহ প্রবেশ কৰে)।

বৈখানস (হাত তুলি) হে ৰাজন্। এয়া আশ্রমৰ হৰিণ; তাক নামাৰিব, নামাৰিব।

দ্বিতীয় তুলাৰ দমত জুই লগোৱাৰ দৰে হৰিণটোৰ কুমলীয়া শৰীৰত শৰ নিক্ষেপ নকৰিব।

তৃতীয় ক'ত এই হৰিণ পোৱালিৰ তেনেই ক্ষনিক জীৱন আৰু ক'ত বজ্রৰ দৰে কঠোৰ সুতীক্ষ্ণ বাণ।

বৈখানস গতিকে আপুনি নিপুণভাবে লক্ষ্য কৰা আপোনাৰ শৰ সম্বৰণ কৰক, কিয়নো আপোনাৰ অস্ত্র আতুৰজনৰ ত্রাণৰ কাৰণেহে, ই নির্দোষীৰ ওপৰত প্রহাৰ কৰিবলৈ নহয়।

ৰজা মই এয়া সামৰিছো। (শৰ সম্বৰণ কৰে)।

বৈখানস এয়া পুৰুবংশৰ প্রদীপ স্বৰূপ আপোনাৰ পক্ষে যথাযোগ্য হৈছে । পুৰুবংশত জন্ম



নেপথ্য ঃ নেপথ্য হৈছে ৰঙ্গমঞ্চৰ পশ্চাৎ ভাগ, য'ত ভাৰৰীয়াসকলে সাজপাৰ পিন্ধে, প্রসাধন কৰে ।

বৈখানস ঃ এজন বান-প্রস্থী তপস্বী।

যাৰ হৈছে তেনে জনৰ বাবে যথাযোগ্য হৈছে। আপুনি এনেকুৱা গুণৱান চক্রৱর্তী পুত্র লাভ কৰক।

আনসকল সর্বথা চক্রৱর্তী পুত্র লাভ কৰক। (হাত তুলি ক'লে)।

ৰজা (প্রণাম জনাই) আপোনাৰ আশীর্বাদ গ্রহণ কৰিলো।

ৱৈখানস ৰাজন্ আমি (যজ্ঞ কাষ্ঠ) সমিধ আহৰণ কৰিবলৈ ওলাইছো। সৌৱা মালিনী নৈৰ তীৰত কুলপতি কন্বৰ আশ্রম দেখা গৈছে। যদি আপোনাৰ ৰাজকার্যত ব্যাঘাত নহয় তেনেহ'লে তালৈ গৈ আতিথ্য সৎকাৰ গ্রহণ কৰিব পাৰে। তদুপৰি তপস্বীসকলৰ দ্বাৰা বিঘিনিশূন্য আৰু ক্রিয়া কর্মক দেখি বুজিব পাৰিব আপোনাৰ জ্যা চিহ্নিত দুবাহুয়ে কিমান দূৰলৈ প্রজাসাধাৰণক ৰক্ষা কৰে।

ৰজা কুলপতি কন্বদেৰ এতিয়া আশ্রমত আছেনে?

ৱৈখানস সম্প্রতি তেখেতে তেখেতৰ কন্যা শকুন্তলাৰ ওপৰত অতিথি সৎকাৰৰ দায়িত্বভাৰ দি তেওঁৰ (কন্যাৰ) প্রতিকূল দৈৱ প্রশমনৰ বাবে সোমতীর্থলৈ গৈছে।

ৰজা বাৰু। মই তেওঁকে দেখা কৰিম। তেৱেঁই মহর্ষিৰ ওচৰত ভক্তি নিবেদন কৰিব।

ৱৈখানস তেনেহ'লে আমি নিজকার্য কৰোগৈ। (শিষ্যসহ ওলাই যায়)।

ৰজা সাৰথি ঘোঁৱা চলোৱা। পুণ্যাশ্রমত এভূমুকি মাৰি নিজকে পবিত্র কৰোঁগৈ।

সূত আয়ুষ্মানে যি আদেশ কৰিছে, তাকে কৰো। (আকৌ ৰথৰ বেগ নিৰীক্ষণ কৰে)।

ৰজা (চাৰিওফালে চাই) সাৰথি। কোনেও নকলেও অনায়াসে বুজিব পাৰি যে এয়া তপোৱন।

সাৰথি কেনেকৈ বুজিলে ?

ৰজা এয়া, তুমি দেখা নাইনে ? ইয়াতে — গছৰ ধোন্দত বাহ লোৱা ভাটোৰ মুখৰ পৰা সৰি পৰা ধানবোৰ গছৰ তলত পৰি আছে, কোনোবা ঠাইত তেল লগা নিমজ শিলবোৰ দেখি বুজা যায় যে তপস্বীসকলে সেই শিলবোৰৰ ওপৰত ঈঙ্গুদী গুটিবোৰ থেতালি তেল উলিয়াইছিল, হৰিণবোৰে ইমান ভয়-ভীত নোহোৱাকৈ আমাৰ ৰথৰ শব্দ শুনিও পলোৱা নাই, আৰু জলাশয়লৈ যোৱা বাটতো তপস্বীসকলৰ বল্কলৰ আগৰ পৰা নিগৰি পৰা পানীৰ দাগ লাগি আছে।

সাৰথি সকলো অনুমান সচাঁ।

ৰজা (অলপ দূৰ গৈ) তপোবনবাসীসকলৰ কোনো প্রকাৰৰ অসুবিধা নহয় তালৈ চাব লাগিব। সেইবাবে ইয়াতে ৰথ ৰাখা, মই নামি যাওঁ।

সাৰথি মই ঘোঁৰাৰ লেকাম টানি ধৰিছোঁ; আয়ুষ্মানে নামি যাওঁক।

ৰজা (অৱতৰণ কৰি) সাৰথি; বিনীতবেশেৰে তপোবনলৈ যাব লাগে; সেয়ে এইবোৰ ইয়াতে ৰাখি থোৱা (ধনু আৰু আভৰণ আদি খুলি সাৰথিৰ হাতত দিলে)। সাৰথি মই আশ্রমবাসীসকলক দেখা কৰি উভতি নাহোমানে তুমি ঘোঁৰাবোৰৰ গা ধুওঁৱা।

সাৰথি হয়, বাৰু তাকে কৰো। (ওলাই যায়)।

কুলপতি ঃ কুলপতি হৈছে দহ হাজাৰ শিষ্য থকা আচাৰ্য্য ।

ৰজা (অলপ দূৰ খোজ কাঢ়ি আৰু চাৰিওফালে চাই) এয়া আশ্রমৰ দুৱাৰ মুখ, সোমাই যাওঁ। (প্রবেশ কৰি, গাৰ অঙ্গ কঁপা অনুভৱ কৰি) এই আশ্রমস্থলী শান্তি ক্ষেত্র; তথাপি মোৰ সোঁৱাহুটো কঁপিছে। ইয়াত তাৰ ফল কেনেকৈ সম্ভৱ হ'ব পাৰে? অথবা হ'ব লগাটোৰ দুৱাৰ সকলো ঠাইতে খোলা থাকে।

(নেপথ্যত)

এইফালে, এইফালে সখীহঁত।

ৰজা (কাণ দি) সেই গছৰ শাৰীৰ সোঁফালে কাৰোবাৰ কথা-বতৰাৰ শব্দ শুনিবলৈ পাইছো। সেই ফালে যাওঁচোন। (অলপ দূৰ আগুৱাইগৈ) আহা। তপস্বী কন্যা কেইজনীয়ে নিজৰ দেহৰ অনুৰূপ কলহ হাতত লৈ সৰু-সুৰা গছৰ গুৰিত পানী দিবলৈ এইপিনে আহিছে যেন লাগিছে। (ভালদৰে চাই) আহা❋ এওঁলোক দেখিবলৈ কিমান ধুনীয়া। আশ্রমবাসী কন্যাসকলৰ যদি এনেটো ৰূপ হয় যিটো ৰাজ অন্তঃপুৰত দুর্লভ তেনেহ'লে ক'ব লাগিব যে বনলতাৰ শোভাই উদ্যানলতাক চেৰ পেলাইছে। বাৰু❋ এই গছৰ ছাঁতে থাকি এওঁলোকক ছাই থাকোঁচোন। (ৰজাই তেনেকৈ ৰৈ আশ্রম কন্যাসকলক চাই ৰ'ল)।

(দুই গৰাকী সখীৰে সৈতে ওপৰত কোৱাৰ দৰে শকুন্তলাই প্রৱেশ কৰে)।

শকুন্তলা এই ফালে, এই ফালে সখীদ্বয়।

অনসূয়া হেৰা সখী শকুন্তলা❋ আশ্রমৰ সৰু-সুৰা গছবোৰক পিতা কাশ্যপে তোমাতকৈও অধিক ভাল পাই যেন পাওঁ, কিয়নো তুমি নৱমালিকা ফুলতকৈও কোমলতৰ হ'লেও তেওঁ তোমাক এই গছবোৰৰ গুৰিত পানী দিবলৈ নিয়োগ কৰিছে।

শকুন্তলা কেৱল পিতাই কোৱা বাবেই নহয়, ইহতঁৰ প্রতি মোৰ সহোদৰ সুলভ চেনেহো আছে নহয়। (তাকে কৈ গছৰ গুৰিত পানী দিয়াৰ অভিনয় কৰে)।

ৰজা (নিজৰ মনতে) এইগৰাকীয়ে কন্বৰ দুহিতা নেকি? মাননীয় কাশ্যপে এওঁক আশ্রমধর্মৰ কামত লগাই সুবিবেচনাৰ পৰিচয় দিয়া নাই। সঁচাকৈয়ে কোনো কৃত্রিম প্রসাধন অবিহনে স্বভাৱতে মনোহৰ এনে শৰীৰক যিজনে তপঃক্ষম কৰাৰ চেষ্টা কৰে, সেই গৰাকী ঋষিবৰে নিশ্চয় নীল পদুমৰ পাপৰিৰ ধাৰেৰে শমী গছ কটাৰ (বৃথা) যত্ন কৰে। বাৰু, গছৰ আঁৰত থাকিয়েই তেওঁলোকৰ অজ্ঞাতে তেওঁলোকক চাইথাকোঁচোন।(অকেকৰে)।

শকুন্তলা (গছৰ গুৰিত পানী দিবলৈ এৰি) সখী অনসূয়া। প্রিয়ম্বদাই মোৰ বল্কলখন গাত ইমান কৈ আটিল কৰি বান্ধি দিছে, তাৰ বাবে মোৰ বৰ কষ্ট হৈছে, অলপ ঢিলাই দিয়া❋

অনসূয়া হ'ব বাৰু। (ঢিলা কৰি দিলে)।

প্রিয়ম্বদা (হাঁহি মাৰি) তাৰ বাবে তোমাৰ পয়োধৰ বঢ়োৱা নিজৰ যৌৱনক দোষ দিয়া। (মোক নহয়)।

ৰজা সঁচাকৈয়ে গছৰ বাকলি এনে শৰীৰৰ বাবে উপযোগী নহয়, কিন্তু তাতো আকৌ অলংকাৰৰ শোভা যে একেবাৰে হোৱা নাই তেনে নহয়। কাৰণ, শেলুৱৈৰে জড়িত হ'লেও পদুম ফুল সদায় ৰমনীয় হয়; চন্দ্ৰৰ কলঙ্ক মলিন হ'লেও তাতে চন্দ্ৰৰ শোভা বাঢ়ে, এই তন্বী বল্কল পৰিহিতা হ'লেও অধিক মনোৰমা হৈছে; যাৰ আকৃতি ধুনীয়া তেঁওলোকৰ ভূষণ নো আৰু কি?।।

শকুন্তলা (আগলৈ চাই) সৌৱা বতাহত লৰ-চৰ কৰা পল্লৱৰ আঙুলিৰে সৰু বকুল জোপাই মোক বেগতে ওচৰলৈ আহিবলৈ যেন মাতিছে, তাৰ ওচৰলৈ যাওঁচোন। তাক চাওঁগৈ। (আগুৱাই গ'ল)।

প্ৰিয়ম্বদা সখী শকুন্তলা ❋ তাতেই ক্ষন্তেকলৈ থিয় হৈ থকাচোন, তুমি থকা সময়ত সৰু বকুল গছজোপাক লতাযুক্ত হোৱা যেন লাগিছে।

শকুন্তলা সেই বাবেইতো তোমাৰ প্ৰিয়ম্বদা নাম উপযুক্ত হৈছে।

ৰজা প্ৰিয়ম্বদাই শকুন্তলাক কেবল প্ৰিয় কথাই কোৱা নাই, সঁচা কথাও কৈছে। তেওঁৰ অধৰ কুঁহিপাতৰ দৰে, দুই বাহু কোমল বৃক্ষ শাখাৰ দৰে আৰু সৰ্বাঙ্গতে ফুলৰ দৰে লোভনীয় যৌৱন বিকশিত হৈছে।।

অনসূয়া সখী শকুন্তলা ❋ যাৰ নাম তুমি বনজ্যোৎস্না ৰাখিছিলা, সৌ নৱমল্লিকাজোপা, যিয়ে স্বয়ম্বৰত আম্ৰবৃক্ষক বিয়া কৰাইছে, তাক পাহৰিছা নে কি ?

শকুন্তলা তেনেহ'লেচোন মই নিজকে পাহৰিম। (লতা জোপাৰ ওচৰ চাপি গৈ, চাই) বৰ সুন্দৰ সময়তে এই লতা আৰু গছ যুগলৰ মিলন ঘটিছে - বনজ্যোৎস্নাই নতুন কুসুমেৰে যৌৱন লাভ কৰিছে আৰু আমগছজোপায়ো স্নিগ্ধ পল্লবেৰে উপভোগক্ষম হৈছে। (থিয় হৈ চাই থাকে)।

প্ৰিয়ম্বদা জানা নে অনসূয়া, শকুন্তলাই বনজ্যোৎস্নাক ইমান মনোযোগ দি কিয় চাই আছে?

অনসূয়া মইচোন ভাবি পোৱা নাই । তুমি বাৰু কোৱাচোন।

প্ৰিয়ম্বদা তেওঁ ভাবিছে- 'বনজ্যোৎস্নাই যেনেকৈ সুযোগ্য গছৰ সৈতে যুক্ত হৈছে, ময়ো যেন তেনে নিজৰ যোগ্য বৰ পাওঁ'।

শকুন্তলা এয়া তুমি নিশ্চয় তোমাৰ নিজৰ মনোগত ইচ্ছাৰ কথাকে কৈছা ।(কলহ উবুৰিয়াই গছৰ গুৰিত পানী দিলে)।

ৰজা শকুন্তলা কুলপতিৰ অসৱৰ্ণা পত্নীৰ গৰ্ভজাতা কন্যা হোৱা সম্ভব নে কি? নাইবা এনেকুৱা সন্দেহ কৰাৰ প্ৰয়োজন নাই। মোৰ নিষ্পাপ মনে যেতিয়া শকুন্তলাক পাবলৈ অভিলাষী হৈছে, তেতিয়া তেওঁ নিশ্চয় ক্ষত্ৰিয়ৰ বিৱাহযোগ্য হ'ব, কাৰণ, কোনো বিষয় সম্বন্ধে সজ্জনৰ মনত দ্বিধা উপস্থিত হ'লে, তেওঁৰ নিজৰ মনোগত প্ৰবৃত্তিয়ে তেওঁৰ নিৰ্দেশক হয়। তথাপি শকুন্তলা সম্বন্ধে সঠিক তথ্য জানিব লাগিব ।।

শকুন্তলা (ভয় খাই) আই ঔ ❋ গাত পানী পৰাত খং খাই এই ভোমোৱাটোৰে নৱমালিকাৰ

পৰা হঠাতে উৰি মোৰ মুখৰ ফালে আহিছে। (ভোমোৰাক বাধা দিয়াৰ অভিনয় কৰে)।

ৰজা (হাৰিয়াস কৰি) হে মধুকৰ। যি কঁপনি উঠা চকুৰে তেওঁ ক্রমশঃ চঞ্চলভাৱে ইফালে সিফালে চাইছে, তাকে তুমি বাৰে বাৰে স্পর্শ কৰিছা। তেওঁৰ কাণৰ কাষলৈ উৰি উৰি গোপন কথা কোৱাৰ দৰে মৃদু গুঞ্জন কৰিছা। তেওঁ দুহাত ঘূৰাই বাধা দিয়াৰ চেষ্টা কৰা সত্বেও তেওঁৰ ৰতিসর্বস্ব অধৰ পান কৰিছা — সেয়ে তুমি কৃতী (কৃতকায্য) আৰু মই কেৱল তেওঁৰ বিষয়ে তত্ত্বান্বেষণৰ কথা ভাবি মৰিছো ।

শকুন্তলা নাই, দুষ্ট ভোমোৰাটোৰে মোক এৰা নাই, আন ঠাইলৈ যাওঁ। (এখোজ গৈ ভোমোৰাটোলৈ চাই), সি ইয়ালৈও আহিছে। হেৰা (সখীসকল) দুষ্ট ভোমোৰাটোৰে মোক বৰ ব্যাকুল কৰিছে; মোক ৰক্ষা কৰা না।

সখীদ্বয় (হাঁহি মাৰি) আমি তোমাক বচাবলৈ কোন ? দুষ্যন্তক চিঞৰি মাতা, তপোবন ৰক্ষা কৰাটো ৰজাৰহে কাম ।

ৰজা মই দেখা দিয়াৰ এয়ে সুযোগ। ভয় নাই, ভয় নাই, (এইদৰে ক'বলৈ আৰম্ভ কৰি, নিজে নিজে) তেনেকৈ ক'লে, মই যে ৰজা এই কথা ওলাই পৰিব । বাৰু এনেকৈ কোৱা যাওঁক ।

শকুন্তলা (এখোজ আনফালে গৈ, আকৌ তাক চাই) ইয়াতো সি মোৰ পাছ এৰা নাই।

ৰজা (হঠাতে ওলাই আহি) হেৰৌ। দুষ্টসকলৰ শাসনকর্তা পৌৰৰে পৃথিবী শাসন কৰি থাকোঁতে কোনে সৰলা তপস্বী কন্যাসকলৰ লগত এনেখন অসৎ আচৰণ কৰিছে? (ৰজাক দেখি সকলোৱে কিছু ভয় খায়)।

অনসূয়া আর্য❋ তেনে একো এটা দুর্ঘটনা হোৱা নাই । আমাৰ এই প্রিয়সখী এটা ভোমোৰাৰ উৎপাতত কাতৰ হৈ পৰিছে।

(এইদৰে কৈ শকুন্তলাক দেখুবালে)।

ৰজা (শকুন্তলাৰ ফালে চাই) তোমাৰ তপস্যা বাঢ়িছে নে ?

(শকুন্তলা ভয়তে নিমাত হৈ থাকে)।

অনসূয়া এনেকৈ এতিয়া এজন বিশিষ্ট অতিথি লাভ হ'ল। শকুন্তলা। কুটীৰলৈ যোৱা, ফলেৰে সৈতে অর্ঘ লৈ আহা, ইয়াত থাকা পানীয়ে পাদোদক হ'ব ।

ৰজা আপোনালোকৰ মিঠামাতেৰেই অতিথি সৎকাৰ সম্পন্ন হৈছে ।

প্রিয়ম্বদা তেনেহ'লে আর্য এই সপ্তপর্ণ গছৰ ঘন ছায়াৰ শীতল বেদিকাত বহি পৰিশ্রম দূৰ কৰক।

ৰজা আপোনালোকে কৰি থকা কামতে আপোনালোকৰ নিশ্চয় ভাগৰ লাগিছে।

অনসূয়া শকুন্তলা❋ অতিথি সেৱাৰ কাৰণে আমিও তেঁওৰ ওচৰত থকা উচিত হ'ব; আহা, আমিও ইয়াত বহে। (সকলোৱে বহে)।

শকুন্তলা (নিজে) এখেতক দেখা পাই মোৰ মনত আশ্রম বিৰুদ্ধ ভাৱৰ উদয় হৈছে কিয় ?

ৰজা (সকলোলৈ চাই) আহা❋ একে বয়স আৰু একে ৰূপৰ আপোনালোকৰ বন্ধুত্ব দেখাত তেনেই মনোৰম❋

প্রিয়ম্বদা (একাষৰীয়াকৈ ঃ সখী অনসূয়া❋ বুদ্ধিমান আৰু গম্ভীৰ আকৃতিৰ, প্রিয় আৰু মধুৰ ভাষী এখেতক কোনো উচ্চপদস্থ লোক বুলি মনে ধৰিছে, কিন্তু এখেত কোন সেয়ে প্রশ্ন ?

অনসূয়া হে সখী❋ সেইটো মোৰ মনৰো কৌতূহলৰ বিষয়। তেওঁকে সুধি চাওঁচোন। (প্রকাশ কৰি) আয্যৰ মধুৰ কথাত ভৰষা কৰি আমাৰ সুধিবলৈ মন গৈছে, আর্যই বা কোন ৰাজবংশক অলংকৃত কৰিছে? আপুনি কোন দেশৰ লোকক নিজৰ বিৰহত ব্যাকুল কৰিছে? আৰু অত্যন্ত সুকুমাৰ শৰীৰৰ হোৱা সত্বেও কিয় তপোবনলৈ আহিবলৈ পৰিশ্রম স্বীকাৰ কৰিছে ?

শকুন্তলা (নিজে নিজে) হৃদয় অধীৰ নহ'বি। তোৰ যি জানিবলৈ ইচ্ছা, অনসূয়াই তাকে সুধিছে ।

ৰজা (নিজকে নিজে) এতিয়া নিজৰ পৰিচয় প্রকাশ কৰো নে আত্মগোপন কৰো? বাৰু এওঁলোকক এনেকৈ কওঁ- (প্রকাশ্যে) চাওক, পৌৰৰ ৰজাই মোক ধর্মাধিকাৰত নিয়োগ কৰাত মই তপোবনৰ কাজ-কাম নির্বিঘ্নে হৈছে নাই তাকে জানিবলৈ আশ্রমলৈ আহিছো।

অনসূয়া তেনেহ'লে, তপোবনবাসীসকল নাথৱন্ত (অর্থাৎ গৰাকীযুক্ত) হ'ল। (শকুন্তলাই শৃঙ্গাৰজনিত লাজ প্রদর্শন কৰে)।

সখীদ্বয় (ৰজা আৰু শকুন্তলাৰ পাৰস্পৰিক মনোভাৰ বুজি, এফলীয়াকৈ) সখী শকুন্তলা যদি আজি ইয়াত পিতা কন্ব উপস্থিত থাকিলহেঁতেন?

শকুন্তলা তেনেহ'লে কি হ'লহেঁতেন?

সখী দুজনী তেনেহ'লে এই বিশিষ্ট অতিথিক নিজস্ব জীৱন সর্বস্ব পর্যন্ত দি কৃতার্থ কৰিলেহেঁতেন।

শকুন্তলা (কোপ প্রকাশ কৰি) দূৰ হোৱা তোমালোক। নিজৰ মনতে কিবা ভাবি তাকে কৈছা। তোমালোকৰ কথা মই নুশুনো।

ৰজা তেনেহ'লে ময়ো আপোনালোকৰ সখী সম্বন্ধে কিছু কথা সুধিব খোজোঁ।

সখী দুজনী আর্য্য, তেনে অনুৰোধ আমাৰ পক্ষে অনুগ্রহ স্বৰূপ হ'ব।

ৰজা শুনিবলৈ পাইছো যে ভগৱান কাশ্যপ আজন্ম ব্রহ্মচাৰী হৈ আছে। তেনেহ'লে আপোনালোকৰ এই সখী তেওঁৰ আত্মজা (নিজৰ পুত্রী) কেনেকৈ হ'ল?

অনসূয়া শুনক আর্য্য। কৌশিক গোত্রীয় এজন প্রভাবশালী ৰাজর্ষি আছিল।

ৰজা হয়, (তেনে এজন ৰাজর্ষি আছে বুলি শুনিছো।)

অনসূয়া তেওঁকেই আমাৰ সখীৰ জনক বুলি জানিব। পৰিত্যক্ত অৱস্থাত আমাৰ পিতা কাশ্যপে আনি লালন-পালন কৰা বাবে এতিয়া এওঁৰ পিতা হৈছে।

ৰজা 'পৰিত্যক্ত' বোলা শব্দটোৱে মোৰ মনত কৌতূহল বঢ়াইছে। মই কথাটো গুৰিৰে

পৰা শুনিব খোজো।

অনসূয়া শুনক আর্য্য। এবাৰ তেওঁ যেতিয়া গৌতমী নদীৰ কঠিন তীৰত তপস্যাত মগ্ন আছিল, তেতিয়া দেবতাসকলে কিবা আশঙ্কা কৰি তেওঁৰ তপস্যা ভঙ্গ কৰিবলৈ মেনকা নামে অপ্সৰাক পঠালে।

ৰজা আনৰ তপস্যাৰ ভয়ত ভীত হোৱা দেৱতাসকলৰ স্বভাৱ।

অনসূয়া তাৰ পাছত বসন্ত কাল উদয় হোৱা সময়ত মেনকাৰ উন্মাদজনক ৰূপ সৌন্দর্য দেখি (এইদৰে আধাখিনি কৈ লাজতে ৰৈ গ'ল)।

ৰজা বাকীচোৱা বুজি পাইছো। মুঠতে এওঁ অপ্সৰাসম্ভৱা।

অনসূয়া হয়, সেয়ে।

ৰজা থিকেই হৈছে। তেনে নহ'লে মানৱীৰ গর্ভত এনেকুৱা ৰূপ সম্ভৱ নে ? ধৰাতলৰ পৰা এনে প্রভা সমুজ্জল বিদ্যুৎ কেতিয়াও সম্ভৱ নহয়।।

(শকুন্তলাই তলমূৰ কৰি থাকে)।

ৰজা (নিজে নিজে) মোৰ মনোৰথ সিদ্ধিৰ সুবিধাকণ পাইছো। কিন্তু প্রিয়ম্বদাই পৰিহাস কৰি শকুন্তলাৰ উপযুক্ত বৰ লাভৰ ইচ্ছা সম্বন্ধে যি কৈছিল, তাকে শুনি মোৰ মন বৰ সন্দেহ যুক্ত হৈছে।

প্রিয়ম্বদা (মুদুভাৱে হাঁহি শকুন্তলালৈ চাই, ৰজাৰ ফালে ঘূৰি) আর্যই আৰু কিবা সুধিব খোজে যেন পাইছিলো।

(শকুন্তলাই আঙুলিৰে সখীক তর্জন কৰে)।

ৰজা ঠিকেই ধৰিছে। সৎলোকৰ বৃত্তান্ত শুনাৰ লোভত মোৰ এটা প্রশ্ন সুধিবলগীয়া আছে।

প্রিয়ম্বদা মনত কোনো সংকোচ নাৰাখিব। তপস্বীসকলৰ ওচৰত বিনা বাধাই প্রশ্ন সুধিব পাৰো।

ৰজা আপনাৰ সখী সম্বন্ধে এই কথা জানিব বিচাৰো যে তেওঁৰ বিয়া নোহোৱা পর্যন্ত কাম-বিৰোধী বান প্রস্থব্রত তেওঁ ধৰি থাকিব নে যাবৎ জীৱন প্রিয় আৰু তুল্য চক্ষু হৰিণিলাকৰ সৈতেৰোসকৰ্ব্বি ?

প্রিয়ম্বদা আর্য্য। ধর্ম-আচৰণ কৰাতো এওঁ পৰাধীনা; আৰু তেঁওৰ পিতাৰো গুৰুজনৰো ইচ্ছা এয়া যে যোগ্য পাত্রত সম্প্রদান কৰা।

ৰজা (নিজে নিজে) মোৰ বাঞ্ছা পূৰণ হোৱা অসাধ্য নহয়। হে হৃদয়। তই আশা ৰাখ। এতিয়া সকলো সংশয় আঁতৰিছে। (ইমান সময়ে) যাক জুই বুলি ভয় খাই আছিলোঁ এতিয়া সেয়া হাতেৰে চুব পৰা ৰত্ন যেন লাগিছে।।

শকুন্তলা (খঙেৰে) অনসূয়া। মই যাওঁ।

অনসূয়া কিয় যোৱা ?

শকুন্তলা আর্যা গৌতমীৰ আগত কওঁগৈ যে প্রিয়ম্বদাই যা-তা প্রলাপ বকিছে।

অনসূয়া সখী ❋ অতিথিজনক সৎকাৰ নকৰাকৈ স্বেচ্ছাই তেখেতক এৰি থৈ যোৱাটো উচিত নহ'ব।।

(শকুন্তলাক ধৰি ৰাখিব খুজি পিছত সংযতহৈ নিজে নিজে) ☽ আহ ❋ কামনাশীল লোকৰ কিবা কৰাৰ ইচ্ছা হোৱাটোকে যেন কামটো কৰি পেলোৱা হৈছে, তেনে মনত হয়। এই মুনিকন্যাক অনুসৰণ কৰিবলৈ ইচ্ছা হ'লেও ভদ্রতাৰ বিধিয়ে মোক জোৰ কৰি তাৰ পৰা বিৰত কৰিলে। মই এই ঠাইত ৰৈ থাকিও যেন গৈ উভতি আহিছো এনে লাগিছে।। 🗎🗀।।

প্রিয়ম্বদা (শকুন্তলাক বাধা) সখী ❋ তুমি যোৱা উচিত নহ'ব?

শকুন্তলা (চকুৰ ঠাৰেৰে) কিয় উচিত নহ'ব ?

প্রিয়ম্বদা তুমি মোৰ ওচৰত দুডাল গছৰ গুৰিত দিয়া দুকলহ পানী ধৰুৱা হৈছা। এতিয়া আহা। নিজক ধাৰমুক্ত কৰিলেহে যাব পাৰিবা।

(জোৰ কৰি শকুন্তলাক ঘূৰাই আনিলে)।

ৰজা হ ভদ্রা ❋ গছৰ গুৰিত পানী দি উঠাৰে পৰা তেওঁক ভাগৰুৱা হোৱা যেন লক্ষ্য কৰিছো। সেয়ে তেওঁৰ- কলহ তোলোতে তোলোতে এওঁৰ কান্ধ দুখন হালি পৰিছে হাতৰ তলুৱা বৰকৈ ৰঙা পৰিছে; এতিয়াও জোৰে জোৰে নিঃশ্বাস পেলোৱাত বুক কঁপিছে, মুখত বিন্দু বিন্দু ঘাম জমা হোৱাত কাণৰ শিৰিষ ফুল লাগি ধৰিছে, আৰু খোপা খুলি যোৱাত আউল-বাউল হোৱা চুলিবোৰ এহাতেৰে ধৰি ৰাখিছে। গতিকে ময়ে তেওঁৰ ধাৰ পৰিশোধ কৰোঁ (হাতৰ আঙঠি খুলি প্রিয়ম্বদাক দিব খোজে)। (সখীদ্বয়ে আঙঠিত খোদিত নাম পঢ়ি ইজনীয়ে সিজনীৰ মুখলৈ চায়)।

ৰজা মোক আনভাৱে ধৰি নলব। মই হ'লোঁ এজন ৰাজপুৰুষ।

প্রিয়ম্বদা তেনেহ'লে এই আঙঠিটো হাতৰ পৰা বিযুক্ত কৰা উচিত নহ'ব। আর্য্যৰ কথাতেই এওঁৰ ধাৰ পৰিশোধ হ'ল। (অলপ হাঁহি) হেৰা শকুন্তলা ❋ আর্য বা মহাৰাজৰ অনুগ্রহতে তুমি ঋণমুক্ত হৈছা, এতিয়া যাব পাৰা।

শকুন্তলা (মনতে) সঁচাকৈ যদি যাব পাৰিলোহেঁতেন। (প্রকাশ্যে) মোক যাব দিয়া বা যোৱাত বাধা দিবলৈ তুমি কোন ?

ৰজা শকুন্তলালৈ চাই (মনতে) এওঁৰ প্রতি মোৰ মনৰ ভাব যেনেকুৱা হৈছে, মোৰ প্রতিও তেওঁৰ মনোভাবো তেনেকুৱা হৈছে নে কি? তেনে হ'লেতো মোৰ কামনা পূৰণ হোৰ সম্ভাৱনা বেচি। কাৰণ, যদিও তেওঁ মোৰ সৈতে কথা পতা নাই, তথাপিও কিন্তু মই কথা ক'লে তেওঁ মন দি শুনে; যদিও তেওঁ মোৰ মুখলৈ চাই থকা নাই, তথাপি তেওঁৰ দৃষ্টি আন কোনো বস্তুত বেছি সময় লাগি থকাও নাই।। 🗎🗎।।

(নেপথ্যত)

হে তপস্বীসকল ❋ তপোবনৰ প্রাণীসকলৰ ৰক্ষাৰ বাবে তৎপৰ হোৱা। ৰজা দুষ্যন্ত মৃগয়া কৰিবলৈ ওলাই (আশ্রমৰ) ওচৰ পাইছেহি। সেই বাবে সন্ধিয়াৰ সূর্যৰ দৰে

ৰঙা ধূলিবোৰ ঘোঁৰাৰ খোজত উৰি আহি গছৰ ডালত মেলি দিয়া তিতা বাকলিবোৰত কাকতি ফৰিং পৰাদি পৰিছে আৰু ৰথ দেখি ভয়খোৱা এটা হাতীয়ে আমাৰ তপস্যাৰ মূৰ্তিমান বিঘ্নৰ দৰে তপোবনত সোমাইছে, তাৰে প্রচণ্ড আঘাতত ভাঙি যোৱা এডাল গছৰ ডাল তাৰ এটা দাঁতত লাগি ধৰিছে, তাৰ ঠেঙত বহুতো লতাই মেৰিয়াই ধৰি শিকলিৰ দৰে জোত বান্ধিছে, আৰু তাকে দেখি হৰিণবোৰ পাল ভাঙিপলায়ন কৰিছে।। ।।

(তাকে কাণপাতি শুনি সকলোৱে ভয় খালে)।

ৰজা (মনতে) হায় হায় ❋ ধিক ❋ মোৰ লগৰীয়া পুৰুবাসীসকলে মোকে বিচাৰি আহি তপোবনখন অৱৰোধ কৰিছে। যি হওঁক, মই উভতি যাওঁ।

সখীদ্বয় আর্য, এই বনৰীয়া হাতীৰ কথা শুনি আমি ভয় খাইছো। অনুমতি দিলে আমি আশ্রমলৈ যাব পাৰো। (কুটীৰলৈ যাবলৈ আমাক অনুমতি দিয়ক)।

ৰজা (ব্যস্তভাৱে) তোমালোক যোৱা। ময়ো আশ্রমৰ ক্ষতি যাতে নহয়, তাৰে যত্ন কৰোগৈ। (সকলোৱে উঠে)।

সখীদ্বয় আর্য ❋ আপোনাৰ যথাযোগ্য অতিথি সৎকাৰ কৰিবলৈ নোৱাৰি আপোনাক পুনঃ দর্শনৰ বাবে ক'বলৈ লজ্জাবোধ কৰিছো।

ৰজা নহয় নহয়; তেনে কথা নকবা, আপোনাসকলৰ সৈতে দেখা কৰি মই সন্মানিত বোধ কৰিছো।

শকুন্তলা অনসূয়া ❋ এটা নকৈ ওলোৱা কুশৰ পোখাই মোৰ ভৰিৰ তলুৱাত বিন্ধিছে আৰু বল্কলখনো কুৰৱকৰ ডালত লাগি ধৰিছে; অলপ ৰ'বা, বল্কলখন এৰুৱাই লওঁ। (ইয়াৰ ছলতে শকুন্তলাই পলম কৰি ৰজালৈ চাই সখীয়েক দুজনীৰ সৈতে ওলাই গ'ল)।

ৰজা (নিঃশ্বাস পেলাই) হায ❋ সকলো গ'ল। মোৰ এতিয়া নগৰলৈ যাবলৈ মন নোহোৱা হ'ল। মোৰ লগৰীয়াসকলৰ লগ লৈ তপোবনৰ ওচৰতে (চাউনি পাতি) থকাৰ ব্যৱস্থা কৰোঁগৈ। শকুন্তলা বিষয়ৰ পৰা মোৰ মন কোনোমতে ঘূৰাব পাৰা নাই। যেনেকৈ বতাহে পতাকা পাছলৈ উৰুৱাই, তেনেকৈ মোৰ শৰীৰ আগবাঢ়ি গ'লেও ব্যাকুল মনটো পাছফালেহে ঢপলিয়াইছে।

(সকলোৰে প্রস্থান)।

৯.৫ व्याकरणटिप्पणी

कृष्णसारे – कृष्णश्च सारश्च (कर्मधारय समास)

दत्त दृष्टि:– दत्ता दृष्टि: येन स: (बहुव्रीहि समास)

कीर्णवर्त्मा– कीर्णं वर्त्म येन स: (बहुव्रीहि समास)

निरुप्य – नि –√रुप् + णिच् + ल्यप्

कृतसन्धानम्– कृतं सन्धानं यस्य तत् (बहुव्रीहि समास)

उद्यम्य– उत्–√यम् + ल्यप्

निशितनिपाताः– निशितः निपातः येषां ते (बहुव्रीहि समास)

प्रस्थिताः– प्र– √स्था+क्त कर्तरि, प्रथमा वहुवचन

प्रतिहतबिघ्नाः – प्रतिहताः बिघ्नाः येषां ते (बहुव्रीहि समास)

उपनीय– उप– √नी + ल्यप्

साधयितुम्– √साध् + णिच् + तुमुन्

व्यवस्यति – वि– अव–√सो + लट् + ति

अनुविद्धम्– अनु–√व्यध् + क्त कर्मणि

आबर्जयति –आ– √बृज् + णिच् + लट् ति

ब्याधुन्वत्याः– वि+आ– √धू+शतृ ङीप्, षष्ठी एकवचन

नियुक्तः– नि–√युज् +क्त

उपलक्षितम्–उप–√लक्ष्+ क्त

प्रष्टव्यम्–प्रच्छ् + तव्यत्

आशङ्कसे–आ–√शङ्क+ लट् + से

कामिजनमनोवृत्तिः कामिजनानां मनोवृत्तिः (षष्ठी तत्पुरुष समास)

अनुयास्यन्– अनु–√या + स्यतृ

प्रतिनिवृत्त– प्रति– नि–√वृत् + क्त

स्त्रस्तांसौ– स्त्रस्तौ अंसौ ययोस्तौ (बहुव्रीहि समास)

अनुवाच्य – अनु –√वच् + णिच् + ल्यप्

भुयिष्ठम् –√वहु + इष्ठन्

दृष्टिः–√दृश् + क्तिन्

मिश्रयति –√मिश्र + णिच् लट् + ति

सन्निहिताः – सम् + नि–√धा + क्त; १मा बहुवचन

शलभसमूहः शलभानां समूहः (षष्ठी तत्पुरुष समास)

मूर्तः –√मूर्च्छ + क्त कर्तरि

संभ्रान्ताः – सम् –√भ्रम् + क्त, १मा बहुवचन

उपरुन्द्धन्ति– उप–√रुध् + लट्, १म पुरुष, बहुवचन

प्रतिवातम्– वातस्य प्रतिकूलम् (अव्ययीभाव समास)

नीयमानस्य– नी+√यक् + शानच्; षष्ठी एकवचन

९.६ श्लोकानां संस्कृतव्याख्या

१. शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥ १५॥

महाकविकालिदासरचितस्य अभिज्ञानशकुन्तलम् नाम नाटकस्य प्रथमे अङ्के दृश्यते अयं श्लोकः। मृगयार्थं बहिर्गतः राजा दुष्यन्तः मृगमेकमनुसरन् महर्षेः कण्वस्य तपोवनसमीपमागतः। तत्र वैखानसेन प्रार्थितः सन् विनीतवेशेन यदा राजा आश्रमं प्रविशति तदा तस्य दक्षिणः बाहुः स्फुरति। पुरुषस्य बाहुस्फुरणस्य स्त्रीलाभरूपं फलम् अत्र कथं लभ्यते इति विचार्य कथयति,- अवश्यमेव भावीनां कार्याणां द्वाराणि सर्वत्र भवन्ति इति।

यदेव विधिना अवश्यम्भावित्वेन निर्दिष्टं तत्तु सर्वथा संघटते एव। न तस्य कापि बाधा क्वचिदपि दृश्यते। वस्तुतस्तु अस्माकं ललाटलिखनं न केनापि व्याहन्तुं शक्यते। प्रतिकूलावस्थायां अपि अवश्यम्थाविनी घटना संघटते। सर्वत्र एव तस्याः अवकाशः विद्यते। अथ केनचित् कविना उक्तं- 'लिखितमिह ललाटे प्रोज्झितुं कः समर्थः' इति। अत्र सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः अलङ्कारः॥

२. शुद्धान्त दुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ १६॥

महाकविकालिदासकृतस्य अभिज्ञानशकुन्तलम् नाम नाटकस्य प्रथमे अङ्के उपलभ्यते अयं श्लोकः। कण्वाश्रमे चित्तहारिणीं रूपलावण्यवतीं शकुन्तलां निरीक्ष्य विमुग्धचित्तः राजा दुष्यन्तः सप्रशंसमाह-शुद्धान्तदुर्लभमिति।


उद्यानलता उद्याने उपलभ्यते वने च उत्पद्यते बनलता। उभयोः मध्ये लक्षण्यः प्रभेदः अस्ति। उद्यानलता खलु यत्नेन पालिता सती रूपबर्णगन्धैः मनोहारिणी भवति। बनलता तु अयत्नलालिता अपि नैसर्गिकसौन्दर्यसुगन्धादिभिः जनचित्तं सन्तोषयति। एवं स्वभावजाता अयत्नलालिता बनलता यदि गुणैः उद्यानलतां अतिशेते, तर्हि तत् सत्यमेव विस्मयकरं भवति।तथा आश्रमबालानाम् अनुपमां निसर्गसुषमां संविक्ष्य राजर्षिः दुष्यन्तः एवम् अकथयत्। वनबालानां चित्तहारि रूपं प्रेक्ष्य राजा एतादृशं रूप-लावण्यं राजान्तःपुरे अपि सुदुर्लभम् इति अमन्यत॥

३. सरसिजमनुविद्धं शैबलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा बल्कलेनापि तण्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। १८।।

अयम् श्लोकः महाकविकालिदासकृतस्य अभिज्ञानशकुन्तलम् नाम नाटकस्य प्रथमे अङ्के लभ्यते। श्लोके अस्मिन् राजर्षिः दुष्यन्तः मण्डनविहीनां बल्कलपरिहितां निसर्गरमणीयां शकुन्तलां संवीक्ष्य सविस्मयं स्वभावसौन्दर्यस्य रम्यत्वं वर्णयन्नाह - सरसिजमिति।

स्वभावसुन्दरं कमलं शैवालजालेन आच्छन्नमपि जनानां नेत्ररञ्जनं करोति। तथा हिमांशोचिह्नं

मलिनमपि तत् चन्द्रस्य सुषमां बर्धयति। तथा च इयं पुरो दृश्यमाना तपोवनबाला शकुन्तला बन्धनेन समावृता अपि स्वभावसौन्दर्येण नितरां मनोरमा दृश्यते। एतानि खलु शैवललक्ष्मबल्कलानि न सरोज-सुधांशु-शकुन्तलानां निसर्गसौन्दर्यं विघातयन्ति, परं तु तेषां सौन्दर्यं बर्धयन्त्येव। एतानि सर्वाणि समालोच्य राजर्षिः दुष्यन्तः अमन्यत यत्,मधुराणांनिसर्गमनोज्ञानाम् आकृतीनां देहानां किमिव हि मण्डनं भूषणं न ? अपितु सर्वमेव भूषणतां प्रपद्यते। अत्र सामान्येन विशेषसमर्थनरुपः अर्थान्तरन्यासः अलंकारः, मालिनी च वृत्तम्॥



अग्रगत्याः निरीक्षणम्

प्रश्नः १: दुष्यन्तः कस्मिन् वंशस्य तथा कस्मिन् देशस्य राजा आसीत् ?

.....

प्रश्नः २: वैखानसः राज्ञामृगहत्याकार्यं किं कारणात् प्रतिबन्धितवान् ?

.....

प्रश्नः ३: राजा आश्रमं प्रविश्य ऋषिकन्याः किं कार्यं कुर्वन्ति इति दृष्टवान् ?

.....

प्रश्नः ४: शकुन्तलायाः सखीद्वयम् के आस्ताम् ?

.....



९.७ अध्यायात् किमवगतम्

- राजा दुष्यन्तःमृगयाकर्तुं कण्वस्य आश्रमद्वारे आगतवान्।
- अस्मिन् प्रसङ्गे राजा विनयसूचकं व्यवहारं प्रकटितवान्।
- राजा आश्रमं प्रविश्य आश्रमकन्याः दृष्ट्वा आकर्षितः अभवत्।
- राजा अनसूयायाः मुखात् शकुन्तलायाः जन्मकथा ज्ञातवान्।
- शकुन्तलायाः प्रति राजा दुष्यन्तस्य आकर्षणं अपि ज्ञातवान्।



९.८ ज्ञानाधिक्यम्

१) मिराशी, वी. वी. च नवाकर्ता (१९५९), कालिदासः, मुम्बई।
२) शर्मा, थानेश्वरः, अभिज्ञानशकुन्तलम् एकं समीक्षा (२००८), गुवाहाटी।
३) शर्मा, थानेश्वरः, संस्कृतसाहित्यस्य इतिवृतिः (२००८), गुवाहाटी।
४) हजारिका, अतुलचन्द्रः (१९५९), अभिज्ञानशकुन्तलम्, गुवाहाटी।



९.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : दुष्यन्तस्य जन्म चन्द्रे तथा पुरुवंशे। स हस्तिनापुरस्य राजा आसीत्।

प्रश्नः २ उत्तरम् : राजा यः हरिणः शिकारयितुं इच्छति, स आश्रमस्य पालकः आसीत्।

प्रश्नः ३ उत्तरम् : कन्याः आश्रमस्य पुष्पानि जलं दत्वा गृहेषु उपदिशन्ति।

प्रश्नः ४ उत्तरम् : प्रियम्बदा अनसूया च।



९.१० अभ्यासप्रश्नाः

क) वस्तुधर्मिणः प्रश्नाः: (५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: दुष्यन्तस्य वंशपरिचयः कः ?

प्रश्नः २: शकुन्तलायाः पितरौ कौ ?

ख) लघु प्रश्नाः: (१५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: अभिज्ञानशकुन्तलम् नाटकस्य पृष्ठभूमिः कुत्र ? राजा दुष्यन्तः तथा शकुन्तलायाः स्वसखिद्वयं मध्ये यत् कथोपकथनं अभवत् तद्विषये लिखतु।

प्रश्नः २: अभिज्ञानशकुन्तलम् नाटकस्य नायकः तथा नायिका के ? दुष्यन्तः तथाशकुन्तलायाः मध्ये वार्तालापं स्वभाषायाम् लिखतु।

ग) रचनाधर्मिणः प्रश्नाः: (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: आश्रमे दुष्यन्तस्य प्रवेशदृश्यं वर्णयतु।

प्रश्नः २: प्रथमभागे प्रकटितः दुष्यन्तस्य चरित्रस्य वर्णनं कुरुत।

*** ***** ***

अध्यायः १० : अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

१०.१ उद्देश्यम्

१०.२ परिचयः

१०.३ अभिज्ञानशाकुन्तलम् नाटकस्य द्वितीयाङ्कस्य मूलसंस्कृतपाठः

१०.५ द्वितीयाङ्कस्य मूलसंस्कृतपाठ्यांशस्य असमीयानुवादः

१०.६ व्याकरणटिप्पणी

१०.६ श्लोकानां संस्कृतव्याख्या

१०.७ अध्यायात् किमवगतम्

१०.८ ज्ञानाधिक्यम्

१०.९ अग्रगत्याः निरूपणम्

१०.१० अभ्यासप्रश्नाः

१०.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- 'अभिज्ञानशाकुन्तलम्' नाटकस्य द्वितीयाङ्कस्य विषयवस्तुं विस्ताररूपेण ज्ञास्यति।
- नाटकस्य मुख्यपात्राणां परिचयं प्राप्स्यति।
- नाटकस्य द्वितीयाङ्कस्य पाठस्य संस्कृतपाठं अनुवादञ्च ज्ञास्यति।

१०.२ परिचयः

भवान् पूर्वमेव 'अभिज्ञानशाकुन्तलम्' नाटकस्य प्रथमाङ्केन सह परिचितोऽस्ति। तस्मात् ज्ञायते यत् योराजा शकुन्तलां प्रति आसक्तोऽस्ति, सः येन केन प्रकारेण आश्रमं गन्तुमिच्छति। एवं द्वितीयेऽङ्के राजा विदूषकं सेनापतिं च अनुरोध्य मृगयात् निवारयति।

अस्मिन्नेव समये आश्रमात् द्वौ ऋषिकुमारौ आगत्य राजानं आश्रमे निवसितुम् अनुरोधं कुरुतः। राजापि तत्र स्थातुमिच्छां प्रकटयति। तत्पश्चात् राजमातुः संदेश आगच्छति यत् राजमाता तं प्रार्थयते वृत्तपारणाय। ततः अपरमुपायं न दृष्ट्वा राजा विदूषकं सैनिकैः सह गृहं प्रेषयति। विदूषकस्य निष्क्रमणेन नाटकस्य द्वितीयमङ्कं समाप्तिं गच्छति।

१०.३ 'अभिज्ञानशाकुन्तलम्' नाटकस्य द्वितीयाङ्कस्य मूलसंस्कृतपाठः

अथ इदानीं अधो नाटकस्य द्वितीयाङ्कस्य मूलपाठयांशः प्रदीयते। तत्र भवान् द्रक्ष्यति राजा दुःखितःसन् मृगया कर्तुं न इच्छति, इति ज्ञात्वा विदूषकः सेनापतिः च परस्परं विरुद्धप्रकारेण राज्ञो मनोभावं ज्ञातुं प्रयत्नं कुरुतः। येन तेषां मतानुसारं मृगयां स्थगयति। एवं तपोवनस्य परं

यज्ञकार्ये निमन्त्रणं प्राप्य तदपि स्वीकुर्वति। तत्पश्चात् दुष्यन्तो मातुः आह्वानं प्राप्य विदुषकं सैन्येन सह हस्तिनापुरं प्रेषयति। एवं नाट्यकारः नायक-नायिकयोः मिलनमार्गं सिद्ध्यति।

विदूषकः - कृतं भवता निर्मक्षिकम्। साम्प्रतमेतस्मिन्पादपच्छायाविरचितवितानसनाथेशिलातले निषीदतु भवान्, यावत् अहम् अपि सुखासीनो भवामि।

राजा - गच्छाग्रतः।

विदूषकः - एतु भवान्।

(इत्युभौ परिक्रम्योपविष्टो।)

राजा - माधव्य! अनवाप्तचक्षुः फलोऽसि। येन त्वया दर्शनीयंन दृष्टम्।

विदूषकः - ननु भवानग्रतो मे वर्तते।

राजा - सर्वः कान्तमात्मीयं पश्यति। अहं तु तामाश्रमललामभूतां शकुन्तलामधिकृत्यब्रवीमि।

विदूषकः - (स्वगतम्) भवतु, अस्यावसरं न दास्ये। (प्रकाशम्) भो वयस्य ते तापसकन्यका अभ्यर्थनीया दृश्यते।

राजा - सखे ! न च परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते।

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥ ८॥

विदूषकः - (विहस्य) यथा कस्यापि पिण्डखर्जू रैरुद्वेजितस्य तिन्तिण्यामभिलाषो भवेत् तथा त्रीरत्नपरिभोगिणः भवत इयमभ्यर्थना।

राजा - न तावदेनां पश्यसि येनैवमवादीः।

विदूषकः - तत् खलु रमणीयं यद् भवतोऽपि विस्मयमुत्पादयति।

राजा - वयस्य! किं ब्रहुना -

चित्र निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिनाकृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ९॥

विदूषकः - यद्येवं प्रत्यादेश इदानीं रूपवतीनाम्।

राजा - इदं च मे मनसि वर्तते -

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ १०॥

विदूषकः - तेन हि लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विन इंगुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति।

राजा - परवर्ती खलु तत्रभवती। न च संनिहितोऽत्र गुरुजनः।

विदूषकः - अथ भवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः।

राजा - निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः। तथापि तु -

अभिमुखे मयि संहृतमीक्षितं
हसितमन्यनिमित्तकृतोदयम्।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः ॥ ११ ॥

विदूषकः - न खलु दृष्टमात्रस्य तवाङ्कं समारोहति।

राजा - मिथः प्रस्थाने पुनः शालीनतयापि काममाविष्कृतो भावस्तत्रभवत्या।

तथा हि-

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ १२ ॥

विदूषकः - तेन हि गृहीतपाथेयो भव। कृतं त्वयोपवनं तपोवनमिति पश्यामि।

राजा - सखे ! तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः।

विदूषकः - कोऽपरोऽपदेशो युष्माकं राज्ञाम्? नीवारषष्ठभागमस्माकम् उपहरन्त्विति।

राजा - मूर्ख! अन्यमेव भागधेयमेते तपस्विनो निर्वपन्ति यो रत्नराशीनपि विहायाभिन्द्यते।

पश्य -

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।
तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः॥ १३ ॥

(नेपथ्ये)

हन्त सिद्धार्थौ स्वः।

राजा - (कर्णे दत्वा।) अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्।

(प्रविश्य।)

दौवारिकः - जयतु जयतु भर्ता। एतौ द्वौ ऋषिकुमारौ प्रतीहारभूमिमुपस्थितौ।

राजा - तेन ह्यविलम्बितं प्रवेशय तौ।

दौवारिकः - एष प्रवेशयामि। (इति निष्क्रम्य ऋषिकुमाराभ्यां सह प्रविश्य) इत इतो भवन्तौ।

(उभो राजानं विलोकयतः)

प्रथमः - अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः। अथवा उपपन्नमेतदस्मिन् ऋषिभ्यो नातिभिन्ने राजानि। कुतः -

अध्याकान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति।

अस्यापि द्यां स्पृशति वशिनश्चारणद्वंद्वगीत:
पुण्य:शब्दो मुनिरिति मुहु: केवलं राजपूर्व: ॥ १४।।

द्वितीय: - गौतम अयं स बलभित्सखो दुष्यन्त:।

प्रथम: - अथ किम्।

द्वितीय: - तेन हि -

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री
मेक: कृत्स्नां नगरपरिधप्रांशुबाहुर्भुनक्ति।
आशंसन्ते समितिषु सुरा बद्धबैराहि दैत्यै
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ १५॥

उभौ - (उपगम्य।)विजयस्वराजन्।

राजा- (आसनादुत्थाय।)अभिवादयेभवन्तौ।

उभौ- स्वस्तिभवते। (इतिफलान्युपहरत:।)

राजा- (सप्रणामं परिगृह्य:)आज्ञापयितुमिच्छामि।

उभौ - विदितो भवानाश्रमसदामिहस्थ:। तेन भवन्तं प्रार्थयन्ते।

राजा - किमाज्ञापयन्ति ?

उभौ - तत्रभवत: कण्वस्य महर्षेरसांनिध्याद्रक्षांसि न इष्टिविध्न मुत्पादयन्ति। तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

राजा - अनुगृहीतोऽस्मि।

विदूषक: - (अपवार्य)एषेदानीमनुकूलातेऽभ्यर्थना।

राजा- (स्मितंकृत्वा)रैवतकमद्रचनादुच्यतांसारथि:। सबाणासनंरथमुपस्थापयेति।

दौवारिक:- यद्देव आज्ञापयति। (इति निष्क्रान्त:।)

उभौ- (सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिता: खलु पौरवा: ॥ १६॥

राजा - (सप्रणामम्।) गच्छतां पुरो भवन्तौ। अहमप्यनुपदमागत एव।

उभौ - विजयस्व। (इति निष्क्रान्तौ।)

राजा - माधव्य अप्यस्ति शकुन्तलादर्शने कुतूहलम्।

विदूषक: - प्रथमं सपरिवाहमासीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषित:।

राजा - मा भैषी:। ननु मत्समीपे वर्तिष्यसे।

विटूषक: - एष राक्षसाद्रक्षितोऽस्मि।

(प्रविश्य)

दौवारिक: - सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते। एष पुनर्नगरादेवीनामा इसिहर: करभक आगत:।

राजा - (सादरम्) किमम्बाभि: प्रेषित: ?

दौवारिकः - अथ किम् ?

राजा - ननु प्रवेश्यताम्।

दौवारिकः - तथा। (इति निष्क्रम्य करभकेण सह प्रविश्य) एष भर्ता। उपसर्प।

करभकः - जयतु जयतु भर्ता। देव्याज्ञापयति। आगामि चतर्थदिवसे प्रवृत्तपारणो मे उपवासो भविष्यति। तत्र दीर्घायुषावश्यं संभावनीयेति।

राजा - इतस्तपस्विकार्यम्। इतो गुरुजनाज्ञा। द्वयमप्यनतिक्रमणीयम्। किमत्र प्रतिविधेयम्।

विदूषकः - त्रिशङ्कुरिवान्तरा तिष्ठ।

राजा - सत्यमाकुली भूतोऽस्मि।

कृत्ययोर्भिन्नवेशत्वाद् द्वैधीभवति मे मनः।

पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥ १७॥

(विचिन्त्य) सखे त्वमम्बया पुत्र इति प्रतिगृहीतः। अतो भवानितः प्रतिनिवृत्य तपस्विकार्यव्यग्रमानसं मामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति।

विदूषकः - न खलु मां रक्षोभीरुकं गणयसि।

राजा - (सस्मितम्।) कथमेतद्भवति संभाव्यते ?

विदूषकः - यथा राजानुजेन गन्तव्यं तथा गच्छामि।

राजा - ननु तपोवनोपरोधः परिहरणीय इति सर्वानानुयात्रिकांस्त्वयैव सह प्रस्थापयामि।

विदूषकः - तेन हि युवराजोऽस्मीदानीं संवृत्तः।

राजा - (स्वगतम्) चपलोऽयं बटुः। कदाचिदस्मत्प्रार्थनामग्तःपुरेभ्यः कथयेत्। भवतु। एनमेवं वक्ष्ये। (विदूषकं हस्ते गृहीत्वा, प्रकाशम्) वयस्य, ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यकायां ममाभिलाषः। पश्य,-

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।

परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥ १८॥

विदूषक - अथ किम्।

(निष्क्रान्ताः सर्वे इति द्वितीयोऽङ्कः।)

१०.४ द्वितीयाङ्कस्य मूलसंस्कृतपाठ्यांशस्य असमीयानुवादः

দ্বিতীয় অঙ্কৰ আৰম্ভণিতে বিদূষকে সেনাপতিৰ সৈতে মৃগয়া বন্ধ কিদৰে কৰিব সেই বিষয়ে আলোচনা কৰে। ৰজাৰো ঠিক তেনেকুৱা ইচ্ছা। তেওঁৰ মন কেৱল শকুন্তলাতে কেন্দ্ৰীভূত হৈ ছে। আনসকলক যাবলৈ দি তেওঁ বিদুষকেৰে সৈতে শকুন্তলাক দ্বিতীয়বাৰ লগ পোৱাৰ দিহা কৰে।

বিদূষক - আপুনিটো (ইয়াৰ পৰা) মাখি পর্যন্ত বিতাৰিত কৰিলে। এতিয়া আপুনি এই লতাৰ চন্দ্রতাপেৰে সুশোভিত গছৰ ছাঁতে আসন উপবেশন কৰক। তাত ময়ো অলপ সুখেৰে বহো।

ৰজা - আগলৈ বলা।

বিদূষক - আপুনিও আহক। (দুয়োজনে অলপ আগলৈ গৈ বহে)।

ৰজা - হে মাধব্য ❋ তুমি দৃষ্টিশক্তিৰ সার্থকতা লাভ কৰা নাই যিহেতু যিটো দর্শনীয় (দেখিবলগীয়া) সেইটো তুমি দেখা নাই।

বিদূষক - কিয় ❋ আপুনিতো মোৰ আগতেই আছে।

ৰজা - সকলোৱেই নিশ্চিতৰূপে নিজৰ লোককে সুন্দৰ দেখে। মই সেই আশ্রমৰ শোভা স্বৰূপা শকুন্তলাৰ কথাহে কৈছোঁ।

বিদূষক - (নিজৰ মনতে) ঠিক আছে। এওঁক শকুন্তলাৰ বিষয়ে কোনো কিছু কোৱাৰ সুযোগেই নিদিওঁ। (প্রকাশ্যে) হে বন্ধু। অৱশেষত আপুনি সেই তপস্বিকন্যাক পোৱাৰ কামনা কৰিছে চাগৈ।

ৰজা - হে বন্ধু। পৰিহার্য্য বস্তুৰ প্রতি পৌৰবসকলৰ মন ধাবিত নহয়। আকন্দ গছৰ ওপৰত সৰি পৰা নৱমল্লিকা ফুলৰ দৰে মুনিকন্যা আচলতে অপ্সৰা গর্ভজাত। মাতৃয়ে পৰিত্যাগ কৰি যোৱাতহে মুনি তেঁওক পালন কৰে।

বিদূষক - অলপ হাঁহি- যিদৰে মিঠা খেজুৰ খাই খাই অৰুচি হলে কাৰো তেতেলি খাবলৈ ইচ্ছা হয়, ঠিক তেনেদৰে স্ত্রীৰত্ন পৰভোগী আপোনাৰো এতিয়া অনুৰূপ বাসনা হৈছে।

ৰজা - তুমি তো তেওঁক দেখা নাই, সেয়েহে তুমি এনেকৈ কৈছা।

বিদূষক - যাক দেখি আপোনাৰো বিস্ময় জন্মিছে, তেওঁ নিশ্চয় বৰ চমৎকাৰ হ'ব।

ৰজা - বন্ধু, অধিক কি ক'ম, সৃষ্টিকর্তাৰ শক্তি সামথ্য আৰু শকুন্তলাৰ মূর্ত্তি — এই দুই কথা বিবেচনা কৰি মোৰ মনত হয় যেন বিধাতাই এখন ছবি আঁকি তাত প্রাণসঞ্চাৰ কৰিছে, অথবা সকলো প্রকাৰ ৰূপ একে লগ কৰি শকুন্তলাক নির্মাণ কৰিছে, অথবা নিজৰ মনোবলত যেন আৰু এগৰাকী স্ত্রীৰত্নৰ সৃষ্টি কৰিছে।। ৭৩১১

বিদূষক - যদি সেয়ে হয়, তেনেহ'লে তেওঁৰ ওচৰত আন যুৱতীসকল পৰাভূত হ'ব।

ৰজা - আৰু মোৰ মনত এনে ভাৰ হয়, তেওঁ যেন কোনেও নুশুঙা এপাহি ফুল, হাতেৰে নিচিঙা এটি কুঁহিপাত, কোনেও নিবিন্ধা এটি ৰত্ন আৰু কোনেও সোৱাদ নোলোৱা এটোপাল মৌ, অথবা অখণ্ড পুণ্যফলৰ দৰে, নির্মলৰূপ, নেজানো বিধিয়ে কাক তেওঁৰউপভোক্তাকৰি ৰাখিছে।১ ১১

বিদূষক - তেনেহ'লে আপুনি তেওঁক শীঘ্রে পৰিত্রাণ কৰা উচিত হ'ব, যাতে তেওঁ ইঙ্গুদী তেলেৰে মূৰ চিকনুৱা কোনোবা তপস্বীৰ হাতত নপৰে।

ৰজা - তেওঁ পতি নির্ণয়ত স্বাধীন নহয়। তাতে আকৌ গুৰুজন ওচৰত নাই।

বিদূষক - তেওঁৰ চকু-মুখ দেখি আপোনাৰ প্রতি কেনে দৃষ্টিৰাগ থকা যেন পালে।

ৰজা - তপস্বিকন্যাসকল স্বভাৱতে লাজকুৰীয়া, তথাপিও —
মই তেওঁলৈ চালে তেওঁ চকু ঘূৰাই নিছিল, আন কোনো কথা মনত পৰাত যেনকৈ

(কেতিয়াবা) মিচিকিয়াই হাঁহিছিল; লাজত তেওঁ নিজৰ মনৰ ভাৱ ভালকৈ প্ৰকাশ কৰ্ত্তি নোৱাৰিলেও, তাক সম্পূৰ্ণ গোপনো কৰা নাছিল।।

বিদূষক - আপোনাক দেখা মাত্ৰকে তেওঁ কোলাত নবহিল নে?

ৰজা - সখীসকলেৰে সৈতে যোৱাৰ সময়তো শালীনতা হেতুকে তেওঁ অনুৰাগৰ ভাৱ এইদৰে প্ৰকাশ কৰিছিল- সেই কৃশাঙ্গীয়ে কেইখোজমান গৈয়েই কুশৰ কুহি আগে ভৰিত বিন্ধা যেন দেখুৱাই ৰৈ গৈছিল, গছৰ শাখাত বল্কল লাগি ধৰা বুলি তাক এৰাবলৈ ভাও জুৰি মোলৈ উভতি চাইছিল।।

বিদূষক - তেন্তে (তেওঁক গ্ৰহণ কৰিবলৈ) আয়োজন কৰক। যি দেখিছো আপুনি তপোবনক উপবন কৰি তুলিছে।

ৰজা - হে বন্ধু। তপোবনৰ কোনো কোনো তপস্বীয়ে মোক চিনি পেলাইছে। তাৰ উপায় চিন্তা কৰাচোন যাৰ অজুহাত লৈ অন্তত এবাৰ হ'লেও আশ্ৰমলৈ যাব পাৰোঁ।

বিদূষক - আপোনাক আকৌ উপায়ৰ কি প্ৰয়োজন? আমাৰ প্ৰাপ্য নীবাৰ ধানৰ এক-ষষ্ঠাংশ ৰাজস্ব আমাক দিয়ক বুলি কওঁক গৈ।

ৰজা - মূৰ্খ। তপস্বীসকলে আন এক প্ৰকাৰৰ ৰাজকৰ দিয়ে যি ৰাশি ৰত্নতকৈও অধিক বাঞ্ছনীয়; কাৰণ, গৃহস্থসকলৰ পৰা ৰজাসকলে যি ৰাজস্ব পায় তাৰ ফল ক্ষয় যায়; কিন্তু তপস্বীসকলে আনকি তেওঁলোকৰ তপস্যাৰ যি ছভাগৰ এভাগ দিয়ে সিতক্ষয়া।

(নেপথ্যত)

বাৰু, আমাৰ উদ্দেশ্য সিদ্ধি হ'ল।

ৰজা - (কান পাতি শুনি) আৰে। এই ধীৰ আৰু প্ৰশান্ত কণ্ঠস্বৰ শুনি এনে লাগিছে যেন এওঁলোক তপস্বী ।

(প্ৰবেশ কৰি)

দ্বাৰৰক্ষক - মহাৰাজৰ জয় হওঁক। এয়া দুগৰাকী ঋষিকুমাৰ দুৰাৰদলিত উপস্থিত হৈছে।

ৰজা - তেন্তে শীঘ্ৰেই তেওঁলোকক প্ৰবেশ কৰোৱা।

দ্বাৰৰক্ষক - এয়া আনিছো। (ঋষিকুমাৰদ্বয়ক লগত লৈ আকৌ প্ৰবেশ কৰি) আপোনালোক এইফালে আহক, এইফালে।

(দুয়োজন ঋষিকুমাৰ ৰজাৰ ফালে চাই থাকিল)

প্ৰথমজন ঋষিকুমাৰ - আহা❋ এখেতৰ দীপ্তিমান মূৰ্তি দেখিলেও ভয় নালাগে। হয়তো বা তপস্বীসকলৰ পৰা ৰজা বেচি ভিন্ন নহয়। তেওঁৰ বাবে এনেকুৱা হোৱাই স্বাভাৱিক, কাৰণ তপস্বীসকলৰ তপস্যাৰ ফল যেনেকৈ সকলোৱে লাভ কৰে, তেনেকৈ এখেতেও যি গৃহস্থাশ্ৰম অৱলম্বন কৰিছে, তাৰে আন সকল আশ্ৰম-অৱলম্বীও পৰি-পুষ্ট হৈছে। তপস্বীসকলে যেনেকৈ তপোবল সঞ্চয় কৰে, এখেতেও তেনেকৈ সদায় প্ৰজাবৃন্দৰ ৰক্ষা বিধান ৰূপ ধৰ্মানুশীলনৰ ফল সঞ্চয় কৰে। সিদ্ধ মিথুনসকলে

যেনেকৈ স্বর্গত ঋষিসকলৰ গুণগান কৰে তেনেকৈ চাৰণ দুজনে সদায় এই সংযমী ৰজাৰ যি গুণ গান কৰে সি আকাশ স্পর্শ কৰে — দুয়োটাৰ মাজত পার্থক্য মাত্র এয়ে যে এওঁৰ ক্ষেত্রত পুণ্য 'মুনি' শব্দৰ আগত 'ৰাজ' শব্দটো যুক্ত হয়।।

দ্বিতীয়জন ঋষিকুমাৰ - হে গৌতম❋ এখেতেই 'বল' নামৰ দৈত্যৰ হন্তা ইন্দ্রৰ সখা দুষ্যন্ত নেকি ?

প্রথমজন ঋষিকুমাৰ - সেয়া নহয়নো কি আৰু ?

দ্বিতীয়জন ঋষিকুমাৰ - সেই কাৰণেই এইটো অকনো আশ্চর্য্যকৰ নহয় যে এই অতিশয় দীর্ঘবাহু ৰজাই অকলে সেই সমগ্র পৃথিৰী ভোগ কৰে, সাগৰ যাৰ শ্যামসীমা আৰু তেওঁলোকৰ চিৰ শত্রু দৈত্যসকলৰ লগত যুদ্ধত দেৱতাসকলে কেৱল এই দুইৰ বলতে জয় লাভৰ আকাংক্ষা কৰে — এওঁৰ জ্যাযুক্ত ধনু আৰু ইন্দ্রৰ বজ্র।

উভয় ঋষিকুমাৰ - (ওচৰলৈ গৈ) মহাৰাজৰ জয় হওঁক।

ৰজা - (আসনৰ পৰা উঠি) আপোনালোক দুয়োজনকে অভিবাদন জনাইছোঁ।

কুমাৰদ্বয় - আপোনাৰ কল্যাণ কামনা কৰিছো। (ৰজাক ফলৰ উপহাৰ দিয়ে।)

ৰজা - (সপ্রণামে উপহাৰ গ্রহণ কৰি) আপোনালোকৰ আদেশ প্রার্থনা কৰিছো।

উভয়ে - আশ্রমবাসীসকলে জানিব পাৰিছে যে আপুনি বর্তমান ইয়াতেই আছে। সেয়েহে তেওঁলোকে আপোনালৈ এটা অনুৰোধ পঠিয়াইছে।

ৰজা - (তেওঁলোকে) কি আদেশ কৰিছে ?

উভয়ে - পূজনীয় মহর্ষি কন্বৰ অনুপস্থিতিৰ সুযোগ লৈ ৰাক্ষসবিলাকে আমাৰ যজ্ঞত ব্যাঘাত সৃষ্টি কৰিছে। সেয়ে আপুনি মাত্র সাৰথিৰে সৈতে কেইটামান ৰাতিৰ কাৰণে আমাৰ আশ্রমখন ৰক্ষা কৰক। এয়াই আমাৰ অনুৰোধ।

ৰজা - (ইয়াৰ বাবে) মই অনুগৃহীত হলোঁ।

বিদূষক - (অন্য কোনোৱে নুশুনাকৈ) এতিয়া এওঁলোকৰ এই অনুৰোধে আপোনাৰ সুবিধাহে কৰিলে।

ৰজা - (অলপ হাঁহি) ৰৈবতক❋ মোৰ নাম কৈ সাৰথিক কোৱা যে ধনুর্বাণসহ সজ্জিত ৰথ যেন ইয়ালৈ আনে।

দ্বাৰৰক্ষক - মহাৰাজৰ যি আদেশ। (ওলাই যায়)

ঋষিকুমাৰদ্বয় - (আনন্দিত হৈ) পূর্বপুৰুষসকলৰ অনুগামী আপোনাৰ পক্ষে এই (আচৰণ) যথাযোগ্য হৈছে। কিয়নো; বিপন্নজনক অভয়দান কৰা মন্ত্রত পৌৰৱসকল (সদায়েই) দীক্ষিত।

উভয়ে - আপোনাৰ বিজয় হওঁক (দুয়ো ঋষিকুমাৰ ওলায় যায়)।

ৰজা - মাধব্য❋ শকুন্তলাক চাবলৈ ইচ্ছা আছে নেকি ?

বিদূষক - প্রথমে তেনে ইচ্ছা উপজি আছিল, এতিয়া কিন্তু ৰাক্ষসৰ কথা শুনি তাৰ বিন্দুমাত্রও অবশিষ্ট নাই।

ৰজা - ভয় নকৰিবা। (তুমি) মোৰ ওচৰতে থাকিবা।

বিদূষক - তেনেহ'লেতো ৰাক্ষসৰ হাতৰ পৰা ৰক্ষা পৰিলো। (প্ৰবেশ কৰি)

দ্বাৰৰক্ষক - ৰথ সুসজ্জিত হৈ মহাৰাজৰ বিজয় যাত্ৰাৰ বাবে অপেক্ষা কৰিছে। আনফালে আকৌ কৰভক নগৰৰ পৰা ৰাজমাতাৰ আদেশ লৈ ইয়াত উপস্থিত হৈছে।

ৰজা - (আগ্ৰহেৰে সৈতে) সেয়া কি মাতৃয়ে পঠিয়াইছে ?

দ্বাৰৰক্ষক - আৰু নহয়নো কি ?

ৰজা - তেওঁক ভিতৰত প্ৰবেশ কৰোৱা।

দ্বাৰৰক্ষক - সেয়াই হওঁক। (ওলাই গৈ কৰভকৰ সৈতে পুনৰ প্ৰৱেশ কৰি) এয়া আমাৰ মহাৰাজ, তেওঁৰ ওচৰলৈ যোৱা।

কৰভক - মহাৰাজৰ বিজয় হওঁক। ৰাজমাতা দেৱীয়ে আদেশ দিছে অহা চতুৰ্থ দিনত মোৰ উপবাসভঙ্গৰ অনুষ্ঠান হ'ব, সেই অনুষ্ঠানত দীৰ্ঘায়ু মোৰ পুত্ৰ অৱশ্যই উপস্থিত থাকিব লাগে।

ৰজা - এফালে তপস্বীসকলৰ কাৰ্য, আনফালে গুৰুজনৰ আদেশ। দুয়োটাই অলংঘনীয়। এনেস্থলত কিভাবে ইয়াৰ প্ৰতিবিধান কৰা যায়।

বিদূষক - ত্ৰিশংকুৰ দৰে মাজতে অৱস্থান কৰক।

ৰজা - সঁচাকৈয়ে মই বৰ বিমোৰত পৰিলোঁ। দুবিধ কৰ্তব্যৰ ক্ষেত্ৰ দুটা ভিন্ন ভিন্ন ঠাইত হোৱা বাবে মোৰ মন সন্মুখৰ পৰ্বতক প্ৰতিহত নদীৰ সোঁতৰ দৰে দভাগত বিভক্ত হৈছে। (অলপ চিন্তা কৰি) হে বন্ধু ❋ (মোৰ) মায়ে তোমাক নিজৰ পুত্ৰ ৰূপে গ্ৰহণ কৰিছে। গতিকে তুমি ইয়াৰ পৰা গৈ, মই যে তপস্বী সকলৰ কাৰ্যত অত্যন্ত ব্যস্ত আছোঁ, ইয়াকে জনাইমাতৃৰ পুত্ৰকৃত্য অনুষ্ঠান তুমি সম্পন্ন কৰোৱাগৈ।①

বিদূষক - আপুনি মোক ৰাক্ষসৰ ভয়ত ভীত বুলি নাভাবিব ?

ৰজা - (অলপ হাহি) সেয়া তোমাৰ পক্ষে কিদৰে সম্ভব হ'ব পাৰে ?

বিদূষক - তেন্তে ৰজাৰ অনুজ যিদৰে যায় মইও ঠিক সেইদৰেই যাওঁ।

ৰজা - তপোবনত উপদ্ৰব যাতে নহয়; তালৈ চায় মোৰ সকলো অনুচৰকে তোমাৰ সৈতে (ৰাজধানীলৈ) ঘূৰাই পঠাম।

বিদূষক - তেনেহলেতো এতিয়া মই যুবৰাজ হৈ পৰিলো।

ৰজা - (মনতে) এওঁ বৰ চঞ্চল বুধিৰ মানুহ। হয়তো বা মোৰ মনৰ ইচ্ছাৰ কথা অন্তঃপুৰচাৰীসকলক লগাই দিবও পাৰে। বাৰু, এওঁক এনেকৈ কওঁ; (বিদূষকৰ হাতত ধৰি প্ৰকাশকৈ) বন্ধু ❋ ঋষিসকলৰ প্ৰতি সন্মান বশতঃ মই আশ্ৰমলৈ যাম। বাস্তৱিকতে তপস্বীকন্যাৰ প্ৰতি মোৰ কোনো অভিলাষ নাই। কাৰণ, ক'ত মোৰ দৰে ৰজা আৰু ক'ত মৃগপোৱালীৰে ধেমালি কৰি বৰ্ধিতা আৰু মদন-ব্যাপাৰত অনভিজ্ঞা তপস্বী কন্যা শকুন্তলা ❋ বন্ধু ❋ মই পৰিহাস কৰি যি কথা কৈছো তাক তুমি যথাৰ্থবুলি ধৰি নলবা দেই।①

বিদূষক - নিশ্চয়কৈ সেয়াই হ'ব।

(সকলোৱে ওলাই যায়, দ্বিতীয় অংক সমাপ্ত)।

१०.५ व्याकरणगतटिप्पणी

उज्झिताधिगतम्- उज्झितं च तत् अधिगतम् इति (कर्मधारयसमास:)
चुत्यम्- च्यु+ क्त
निवेश्य- नि- विश् + णिच् + ल्यप्
अपरा- नास्ति परा (श्रेष्ठा) यस्या सा(बहुव्रीहिसमास:)
अनघम्- नास्ति अघम् अस्मिन् (बहुव्रीहिसमास:)
समुपस्थास्यति- सम्+ उप- स्था+ लृट्, १म: पुरुष: एकवचनम्
संहृतम्- सम्- हृ+ क्त, कर्मणि
विमोचयन्ती- वि- मूच् + णिच्+ शतृ, स्त्रीलिंगे ङीप्
परिज्ञाता:- परि- ज्ञा +क्त कर्मणि
निर्वपन्ति- निर- लट् १म: पुरुष: बहुवचनम्
उत्तिष्ठति- उत्- स्था + लट् ,१म: पुरुष: एकवचनम्
क्षयि - क्षि + इनि, ताच्छील्ये कर्तरि
उपपन्नम्- उप- पद+क्त
अध्याक्रांता- अधि + आ- क्रम्+क्त+टाप्
सञ्चिनोति- सम्- चि + लट्, १म: पुरुष:, एकवचनम्
बद्धवैरा: - बद्धं वैरं येषां ते (बहुव्रीहिसमास:)
इहस्थ - इह + स्था + क
सनाथीक्रियताम्- असनाथ: सनाथ: क्रियताम् इति अभूततद्भावे च्वि
मद्वचनात् - ल्यवलोपे कर्मे ५मी
कृत्यों: - कृ + क्यप्
आकुलीभूत: - अनाकुल: आकुल: भूत: इति अभूततद्भावे च्वि प्रत्यय:
आवेद्य- आ- विद् +णिच् +ल्यप्
अनुष्ठातुम्- अनु - स्था + तुमुन्
अन्त:पुरेभ्य: - सम्प्रदाने ४थी

१०.६ श्लोकानां संस्कृतव्याख्या

१. चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिनाकृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्या: ॥ १० ॥

महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नामकस्य नाटकस्य द्वितीये अङ्के अयं श्लोको लभ्यते। विदूषकवचनं समादृत्य एकस्य दिवसस्य कृते मृगया-निवारणाय सेनापतिमादिश्य कार्यान्तरे साहाय्यार्थं विदूषकाय निवेदयन् तत्सकाशं तपोवनवालायाः शकुन्तलायाः अनुपमरूपलावण्यतिषयं वर्णयन्नाह-चित्रे इति।

अलोकसामान्या खलु रमणी इयं शकुन्तला। मानुषीषु नहि तस्याः सदृशी काचिद् विद्यते। अतः सर्वशक्तिमान् निर्माणनिपुणो विधाता सर्वजनसाधारणेन निर्माणोपायेन तस्याः देहनिर्माणं न अकरोत्। जगदीश्वरः खलु असौ महता प्रयत्नेन आलेख्यपटे तस्याः कल्पितरूपं चित्रयित्वा पश्चात् तत्रैव प्राणप्रतिष्ठाम् अकरोत्। अथवा मनसा रूपसामग्रीम् एकीकृत्य तस्याः देहं निर्ममे। अन्यथा ईदृशरूपलावण्यस्य असंभवत्वं स्यात्। किन्तु विधाता त्रिलोकसौन्दर्यानि तिलं तिलं समुद्धृत्य यथास्थानं निवेश्य च द्वितीयां स्त्रीरत्नमिव तां निर्मितवान्, अन्यथा करतुलिकास्पर्शेन माधुर्यहानिः स्यात्। तथाचोक्तं कुमारः -

'सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिविशितेन।
सा निर्मिता विश्वसृजा प्रयत्नाद् एकस्थसौन्दर्यदिदृक्षया एव॥'

२. अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रत्नाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ ११ ॥

श्लोकोऽयं महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' नाटकस्यद्वितीये अङ्के लभ्यते। अस्मिन् श्लोके राजा दुष्यन्तः तद्वयस्यः सकाशं शकुन्तलायाः रूपोत्कर्षं वर्णयन्नाह- अनाघ्रातमिति। अनाघ्रम् अपापं दोषलेशशून्यं, तस्याः शकुन्तलायाः रूपं सौन्दर्यम् अनाघ्रातं न आघ्रातम् अगृहीतगन्धं सद्यः प्रस्फुटितं पुष्पमिव। कररुहैः नखैः अलुनम् अचिन्नं किसलयम् नवपल्लवमिव, अनाविद्धं बन्धरहितं रत्नमिव। न आस्वादितः उपभुक्तः रसः माधुर्यम् नवं मधु इव। पुण्यानां पवित्रचरणानां अखण्डम् अभिव्यक्तं फलमिव फलस्य खण्डत्वे तस्यकथञ्चिद्वैकाल्यं स्यात। विधिः ब्रह्मा इह शकुन्तलासौंदर्यविषये कं जनं भोक्तारं सम्भोगकारिणं समुपस्थास्यति उपगमिष्यति इति न जानामि। शकुन्तलायाः रूपस्य भोक्ता महाभाग्यवान् भविष्यति। दैववशादहमपि भोक्ता भवामिचेत्, तर्हि कृतकृत्योऽहं भविष्यामि इति भावः। अत्र मालोपमालंकारः, शिखरिणी च वृत्तम्।

३. अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये,
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वंद्वगीतः
पुण्यःशब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥ १५ ।।

महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य द्वितीये अङ्के लभ्यते अयं श्लोकः। श्लोकेऽस्मिन् कण्वाश्रमाद् आगतः कश्चित् तापसशिष्यः राजानं दुष्यन्तमुद्दिश्य सप्रशंसमाह- अध्याक्रान्ता इति।

तापसवद् दुष्यन्तोऽपि चतुर्षु आश्रमेषु अन्यतमं गार्हस्थ्याश्रमे अधितिष्ठति। प्रजापालनात् मुनिरिव राजप्राप्यं तपः षड्भागरूपं सुकृतिमसौ प्रतिदिनं अर्जयति। तेन तपस्वी खलु असौ। मुनिरिव दुष्यन्तोऽपि परं संयमशीलः। एभिः हेतुभिः असौ ऋषिभ्यः नातिभिन्नः, अपितु स्तुतिपाठकानां स्त्रीपुरुषयुगलेन गीतः दुष्यन्तस्य राजर्षिः इत्युपाधिः प्रतिक्षणं स्वर्गमधिरोहति। अतो सर्वथा अयं राजा ऋषिकल्पः। मुनिस्तुऋषिरुच्यते, अयं तु राजर्षिः इति प्रभेदः। अत्र तुल्ययोगितानां अलंकारः, मन्दाक्रान्ता च वृत्तम्।

४. नैतच्चित्रं यदयमुदधिश्यामसोमां धरित्री-
मेकः कृत्स्नां नगरपरिधप्रांशुबाहुर्भुनक्ति।
आशंसन्ते समितिषु सुरा बद्धबैराहि दैत्यै
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ १६ ॥

महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य द्वितीये अङ्के दृष्टे अयं श्लोकः। अस्मिन् श्लोके राक्षसैः विघ्नितानां स्वकीयानां यज्ञानां रक्षणार्थं प्रार्थयितुं आगतः कश्चित् तापसशिष्यः राज्ञः दुष्यन्तस्य विपुलदेहं शौर्यं च वर्णयन्नाह- नैतदिति।

राजा दुष्यन्तः आत्मनः भुजबलेन एकाकी एव कृष्णवर्णसमुद्रप्रान्तविशिष्टां कृत्स्नां वसुन्धरां पालयति इत्यत्र नास्ति विस्मयलेशोऽपि। यदा दानवैः सह देवानां संग्रामः प्रारभ्यते, तदा अमराः देवाः खलु यथा इन्द्रस्य कुलिशे तथा राज्ञः दुष्यन्तस्य धनुंषि अपि युगपत् विजयं कामयित्वा तत्रभवतः दुष्यन्तस्य शरणं गच्छन्ति। अत्र पर्यायोक्तः अलंकारः, दीपकालंकारश्च, मंदाक्रान्ता तु वृत्तम्।



अग्रगत्याः निरीक्षणम्

प्रश्न १: नाटकस्य द्वितीय-अङ्कस्य घटनाः कुत्र अभवन्?

.....

प्रश्न २: राजमाता राजानं किमर्थं आहूतवती?

.....

प्रश्न ३: विदूषकं राजधान्यां प्रेषणस्य नाटकीयं प्रयोजनंकिम्?

.....

प्रश्न ४: यज्ञस्य विघ्नान्दूरीकर्तुं राजानं आमन्त्रयित्वा किं नाटकीयं प्रयोजनं सम्पन्नम्?

.....



१०.७ अध्यायात् किमवगतम्

- 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य द्वितीयाङ्कस्य पाठेनसह परिचितम् अभवत्।
- अस्य अङ्कस्य असमियानुवादमपि ज्ञातवान्।
- द्वितीयाङ्कस्य महत्त्वं ज्ञातवान्।
- विदूषकस्य चरित्रस्य विषयेऽपि ज्ञातवान्।



१०.८ ज्ञानाधिक्यम्

१) मिराशी, वि. (१९९९). वि.सं. तथा नवकर (१९५९), कालिदास, मुम्बई।
२) शर्मा, थानेश्वर, (२००८), अभिज्ञानशकुन्तलम् एक समीक्षा, गुवाहाटी।
३) शर्मा, थानेश्वर, (२००८), संस्कृत साहित्य का इतिहास, गुवाहाटी।
४) हजारिका, अतुलचन्द्र (१९५९), अभिज्ञानशकुन्तलम, गुवाहाटी।



१०.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : तपोवने।

प्रश्नः २ उत्तरम् : राजमातायाः उपवाससमारोहे उपस्थितिम्।

प्रश्नः ३ उत्तरम् : शकुन्तलां प्रति राज्ञः स्नेहं गोपनार्थम्।

प्रश्नः ४ उत्तरम् : राज्ञः शकुन्तलायाः च सामञ्जस्यस्य प्रक्रिया त्वरिता अभवत्।



१०.१० अभ्यासप्रश्नाः

क) वस्तुनिष्ठप्रश्नाः (उत्तरं ५० शब्देषु लिखन्तु)

प्रश्नः १: द्वितीयाङ्कस्य पृष्ठभूमिः का अस्ति ?

प्रश्नः २: राजा मृगयां किमर्थं त्यक्तवान ?

ख) लघुप्रश्नाः (१५० शब्दाभ्यन्तरे स्वस्य उत्तरं लिखन्तु)

प्रश्नः १: किमर्थं राजा राजधानीं प्रति न गत्वा विदूषकं प्रेषितवान् ?

प्रश्नः २: केन कारणेन राजा आश्रमे स्थितवान् ?

ग) निबन्धप्रश्नाः (३००-५०० शब्देषु उत्तराणि लिखन्तु)

प्रश्नः १: राजादुष्यन्त-विदूषकयोः वार्तालापस्य सारांशः द्वितीयाङ्कानुसारं स्वभाषायां लिखन्तु।

*** ***** ***

अध्यायः ११ : अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

११.१ उद्देश्यम्

११.२ परिचयः

११.३ अभिज्ञानशाकुन्तलम् नाटकस्य चतुर्थ अङ्कस्य मूल संस्कृत पाठः

११.४ व्याकरणटिप्पणी

११.५ श्लोकानां संस्कृतव्याख्या

११.६ अध्यायात् किमवगतम्

११.७ ज्ञानाधिक्यम्

११.८ अग्रगत्याः निरूपणम्

११.९ अभ्यासप्रश्नाः

११.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- पित्रा कण्वेन शकुन्तलां पतिगृहं प्रेषयति इति दृश्यं द्रष्टुं शक्ष्यति।
- चतुर्थ अङ्कस्य विष्कम्भकात् यज्ञं समाप्य राज्ञः हस्तिनापुरं गमनं शकुन्तलां प्रति तस्य चिन्तोद्वेगविषये अपि ज्ञास्यति।
- तीर्थपरिक्रमातः आगतस्य कण्वमुनेः शकुन्तलां पतिगृहं प्रेरणव्यवस्थापनविषये अपि ज्ञास्यति।
- गौतमः– शारद्वतः–शार्गरवेच सह शकुंतलायाः पतिगृहं गमनविषये ज्ञास्यति।

११.२ परिचयः

अभिज्ञानशाकुन्तलमिति नाटके चतुर्थोऽङ्कः विशेषस्थानं लभते। अत्रैव नाटकस्य मूलबीजभूतरूपः दुर्वासामुनेः शकुन्तलां प्रति अभिशापः श्रूयते। तीर्थादागतः पितृपादः कण्वः शकुन्तलां पतिगृहं प्रेरणार्थं व्यवस्थापनं कृतवान्। आसन्नविश्लेषदुःखात् महर्षिकण्वः, अनसूया–प्रियम्बदा इति सख्यौ, तपोवनस्थ पशुपक्षिणः अपि आकुलाः अभवन्। आश्रमतरुभिः प्रदत्तेन पट्टवस्त्रेण, अलंकारेन च अलंकृत्य गौतम्या शार्ङ्गरव–शारद्वतेन च सार्धं पतिगृहे शकुन्तलां प्रेषितवान।

११.३ अभिज्ञानशाकुन्तलम् नाटकस्यचतुर्थ अङ्कस्य मूल संस्कृत पाठः

(ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शकुन्तला।)

तापसीनामन्यतमा – (शकुन्तलां प्रति) जाते। भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व।

द्वितीया - वत्से वीरप्रसविनी भव।

तृतीया- वत्सेभर्तृर्वहुमता भव।

(इत्याशिषो दत्वा गौतमीवर्जं निष्क्रान्ताः।)

सख्यौ - (उपसृत्य।) सखि सुखसञ्जनं ते भवतु।

शकुन्तला - स्वागतं मे सख्योः। इतो निषीदतम्।

उभे - (मङ्गलपात्राण्यादाय। उपविश्य) हला सञ्जा भव। यावत्ते मङ्गलसमालम्भनं विरचयावः।

शकुन्तला - इदमपि बहु मन्तव्यम्। दुर्लभमिदानीं मे सखीमण्डनं भविष्यति। (इति बाष्पं विसृजति)।

उभे - सखि उचितं न ते मङ्गलकाले रोदितुम्। (इति अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)।

प्रियम्बदा - आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनै-र्विप्रकार्यते।

(प्रविश्योपायनहस्तावृषिकुमारकौ)।

उभौ - इदमलंकरणम्। अलंक्रियतामत्रभवती।

गौतमी - वत्स नारद कुत एतत्।

प्रथमः- तातकाश्यपप्रभावात्।

गौतमी - किं मानसी सिद्धिः।

द्वितीयः- न खलु। श्रूयताम्। तत्रभवता वयमाज्ञप्ताः शकुन्तला हेतोर्वनस्पतिभ्यः कुसुमान्याहरत इति। तत इदानीम् -

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै -
र्दत्तान्याभरणानि तत्किसलयोद्भेद प्रतिद्वन्द्विभिः ॥ ५ ॥

प्रियम्बदा - (शकुन्तलां विलोक्य।) हला अनया अभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरीति।

(शकुन्तला व्रीडां रूपयति।)

प्रथमः- गौतम एह्येहि। अभिषेकोत्तीर्णाय भगवने काश्यपाय वनस्पतिसेवाम् निवेदयावः।

द्वितीयः - तथा। (इति निष्क्रान्तौ)।

सख्यौ - अये अनुपयुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेन अङ्गेषु ते आभरणविनियोगं कुर्वः।

शकुन्तला - जाने वां नैपुणम्। (उभे नाट्येनालंकुरुतः)।

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः।)

काश्यपः - यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ता जडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः

पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ ६ ॥

(इति परिक्रामति)।

सख्यौ - हला शकुन्तले, अवसितमण्डनासि। परिधत्स्व साम्प्रतं क्षौमयुगलम्।

(शकुन्तलोत्थाय परिधत्ते)।

गौतमी- जाते एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितःआचारं तावत्प्रतिपद्यस्व।

शकुन्तला - (सब्रीडम्) तात बन्दे।

काश्यपः- वत्से,

ययातेरिव शर्मिष्ठा भर्तुर्वहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ७ ॥

गौतमी - भगवान् बरः खल्वेषः। नाशीः।

काश्यपः - वत्से इतः सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व।

(सर्वे परिक्रामन्ति)

काश्यपः - (ऋक्छन्दसाऽशास्ते)।

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धै
र्वैतनास्त्वां वहूनयः पावयंतु ॥ ८ ॥

प्रतिष्ठस्वेदानीम्। (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ?

(प्रविश्य)

शिष्यः- भगवन् इमे स्मः।

काश्यपः- भगिन्यास्ते मार्गमादेशय।

शार्ङ्गरवः - इत इतो भवती। (सर्व परिक्रामन्ति)।

काश्यपः- भो भोः संनिहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिरसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ९ ॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ १० ॥

(आकाशे)

रम्यान्तरः कमलिनीहरितैः सरोभि

श्छायाद्रुमैः नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः॥ ११॥

(सर्वे सविस्मयमाकर्णयन्ति)।

गौतमी – जाते ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः। प्रणम भगवतीः।

शकुन्तला – (सप्रणामं परिक्रम्य जनान्तिकम्।) हला प्रियंवदे ननु आर्यपुत्र दर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्यादुःखेन मे चरणौ पुरतः प्रवर्तेते।

प्रियम्वदा – न केवलं तपोवनविरहकातरा सख्येव। त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रुणीव लताः ॥ १२॥

शकुन्तला – (स्मृत्वा) तात लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।

काश्यपः – अवैमि ते तस्यां सोदर्यास्नेहम्। इयं सा दक्षिणेन।

शकुन्तला – (उपेत्य लतामालिङ्ग्य।) वनज्योत्स्ने, चूतसङ्गतापि मां प्रत्यालिङ्गेतोगताभिः शाखाबाहामिः। अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि।

काश्यपः – संकल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय
मस्यामहं त्वयि च संप्रति वीतचिन्तः ॥ १३॥
इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला – (सख्यौ प्रति।) हला एषा द्वयोर्युवयोर्हस्ते निक्षेपः।

सख्यौ – अयं जनः कस्य हस्ते समर्पितः। (इति बाष्पं विहरतः)।

काश्यपः – अनसूये अलं रुदित्या। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला।

(सर्वे परिक्रामन्ति)।

शकुन्तला – तात एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगबधूः यदा अनघ प्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ।

काश्यपः – वन्से नेदं विस्मरिष्यामः।

शकुन्तला – (गतिभङ्गं रूपयित्वा)को नु खल्वेष निवसने मे सज्जते। (इति परावर्तते)।

काश्यपः – वत्से,

यस्य त्वया ब्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १४॥

शकुन्तला - वत्स किं सहवासपरित्यागिनीं मामनुसरसि ?

अचिर प्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्। (इति रुदती प्रस्थिता)।

काश्यपः - उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्ति
बाष्पं कुरु स्थिरतया विरतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ १५॥

शार्ङ्गरवः - भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र संदिश्य प्रतिगन्तुमर्हसि।

काश्यपः - तेनहीमां क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः)।

काश्यपः - (आत्मगतम्।) किं नु खलु तत्रभवतोदुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम्। (इति चिन्तयति)।

शकुन्तला - (जनान्तिकम्) हला पश्य। नलिनीपत्रान्तरितमपि सहचरम् अपश्यन्ती आतुराचक्रवाक्यारटति दुष्करमहं करोमीति।

अनसूया - सखि मैवं मन्त्रयस्व।
एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुर्वपि विरहदुःखमाशाबन्धः साहयति ॥ १६॥

काश्यपः - शार्ङ्गरव इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

शार्ङ्गरवः - आज्ञापयतु भवान्।

काश्यपः - अस्मान् साधु विचिन्त्यसंयमधनानुच्चैः कुलं चात्मन-
सत्वय्यस्याःकथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्य प्रतिपत्ति पूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥ १७॥

शार्ङ्गरवः- गृहीतः संदेशः।

काश्यपः - वत्से त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तोलौकिकज्ञावयम्।

शार्ङ्गरवः - न खलु धीमतां कश्चिद विषयो नाम।

काश्यपः - सा त्वमितः पतिकुलं प्राप्य
शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुविप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥ १८॥
कथं वा गौतमी मन्यते ?

गौतमी – एतावान् वधूजनस्योपदेशः। जाते, एतत्खलु सर्वमवधारय ?

काश्यपः – एहि वत्से, परिष्वजस्व मां सखीजनं च।

शकुन्तला – तात इत एव किं प्रियम्वदानुसूये सख्यो निवर्त्तिष्येते।

काश्यपः– वत्से इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

शकुन्तला – (पितरमाश्लिष्य) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि।

काश्यपः – वत्से किमेवं कातरासि।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १९॥

(शकुन्तला पितुः पादयोःपतति।)

काश्यपः – यदिच्छामि ते तदस्तु।

शकुन्तला – (सख्यावुपेत्य) हला द्वे अपि मां सममेव परिष्वजेथाम्।

सख्यौ– (तथा कृत्वा) सखि यदि नाम स राजा प्रत्याभिज्ञान मन्थरो भवेत् ततः तस्य इमाम् आत्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।

शकुन्तला– अनेन संदेहेन वामाकम्पितास्मि।

सख्यौ– मा भैषीः। अतिस्नेहः पापाशङ्की।

शार्ङ्गरव – युगान्तरमारुढः सविता। त्वरतामत्रभवती।

शकुन्तला – (आश्रमाभिमुखी स्थित्वा) तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये।

काश्यप – कसे, श्रूयताम् –

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ २०॥

गौतमी – जाते परिहीयते गमनवेला। निवर्तय पितरम्। अथवा चिरेणापि पुनः पुनरेषा एवं मन्त्रयिष्यते। निवर्ततां भवान्।

काश्यपः – वत्से उपरुध्यते तपोऽनुष्ठानम्।

शकुन्तला– (भूयः पितरमाश्लिष्य) तपश्चरण पीडितं तातशरीरम्।
तन्मातिमात्रं मम कृते उत्कण्ठस्व।

काश्यपः – (सनिःश्वासम्)।

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ?
उटजद्वारविरूढं नीवारबलिं विलोकयतः॥ २१॥

गच्छ, शिवास्ते पन्थान: सन्तु।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)।

सख्यौ - (शकुन्तलां विलोक्य) हा धिक् हा धिक्। अन्तर्हिता शकुन्तला वनराज्या।

काश्यप: - (सनि:श्वासम्) अनसूये, प्रियम्बदे गतवती वां सहचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्।

उभे- तात शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशाव: ?

काश्यप: - स्नेहप्रवृत्तिरेवं दर्शिनी। (सविमर्शं परिक्रम्य।) हन्त भो: शकुन्तलां पतिकुलं विसृज्य लब्धमिदानी स्वास्थ्यम्। कुत: -

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतु:।
जातो ममायं विशद: प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।। २२॥

(इति निष्क्रान्ता: सर्वे)।

११.४ चतुर्थअङ্কস্য মূল संस्कृत पाठ्यांशस्य असमीया अनुवाद:

(তেনেকুৰা মাঙ্গলিক কার্যত ব্যাপৃতা হৈ আসনত বহি থকা শকুন্তলাৰ প্ৰৱেশ, তাপসীসকলৰ শকুন্তলাক সম্বোধন)।

প্ৰথমা তাপসী - বাচা ❋ স্বামীৰ সমাদৰ সূচক মহাদেৱীৰ পদ লাভ কৰা।

দ্বিতীয় তাপসী - বাচা ❋ তুমি বীৰৰ জননী হোৱা।

তৃতীয় তাপসী - বাচা ❋ তুমি স্বামীৰ বৰ সমাদৰ লাভ কৰা।

(এইদৰে আশীর্বাদ দি গৌতমীক এৰি থৈ আন তাপসীসকলে বাহিৰ ওলাই যায়)।

সখীদ্বয় - (শকুন্তলাৰ ওচৰলৈ গৈ) সখী তোমাৰ মাঙ্গলিক স্নান সুখকৰ হওক।

শকুন্তলা - সখী, আহা দুয়ো সখী, ইয়াতে বহা।

সখীদ্বয় - (মাংগলিক সামগ্ৰীৰ পাত্ৰ লৈ) সখী, তুমি ভালকৈ বহা, তোমাৰ প্ৰসাধন কার্য কৰো।

শকুন্তলা - ইয়াকে বহুত বুলি ভাবিব লাগিব। এতিয়াৰে পৰা সখীসকলৰ হাতেৰে কৰা মণ্ডন কর্ম দুর্লভ হ'ব। (চকুলো টোকে)।

সখীদ্বয় - সখী ❋ শুভকার্যত কন্দা-কটা কৰা অনুচিত। (চকুলো মচি দিয়ে)।

প্ৰিয়ম্বদা - অলংকৰণৰ উপযুক্ত এই ৰূপ আশ্ৰমত প্ৰাপ্ত প্ৰসাধনেৰে বিকৃত হোৱাৰ সম্ভাবনা হয়। (হাতত আভৰণবোৰ লৈ দুজন ঋষিকুমাৰ আহে)।

কুমাৰ এজন - এয়া আভৰণ। এওঁক অলঙ্কৃত কৰা ।

গৌতমী - বাচা নাৰদ❋ এইবোৰ ক'ত পালা ?

প্ৰথমজন - পিতা কাশ্যপৰ তপস্যাৰ প্ৰভাৱত পোৱা গৈছে।

গৌতমী - এয়া তেওঁৰ মানসী সিদ্ধিৰ ফল নেকি?

দ্বিতীয়জন - নহয় নহয়। কওঁ শুনক। তেখেতে আমাক ক'লে, 'শকুন্তলাৰ কাৰণে গছৰ পৰা ফুল তুলি আনাগৈ'। তাকে কৰোঁতে এজোপা গছে দিলে চন্দ্ৰৰ দৰে ৰঙৰ মাঙ্গলিক পাটকাপোৰ, অন্য এজোপা গছে দিলে ভৰিত লগোৱা লাক্ষাৰস; অন্যান্য বন দেৱতাসকলে তেওঁলোকৰ কোমল হাত আগবঢ়াই নানান অলঙ্কাৰবোৰ দিলে, সেয়া যেন তেওঁলোকৰ কুঁহিপাতৰ সৈতে কৰা প্ৰতিদ্বন্দ্বিতাহে ।।

প্ৰিয়ম্বদা - (শকুন্তলালৈ চাই) সখী❋ এইবোৰ উপহাৰ এনেকৈ পোৱাৰ পৰা বুজা গৈছে তুমি স্বামীৰ ঘৰত কেনে শ্ৰীবৃদ্ধি লাভ কৰিবা। (শকুন্তলাই লাজুক ভাব দেখুৱায়)।

প্ৰথম ঋষিকুমাৰ - গৌতম❋ পিতা কাশ্যপৰ স্নান কাৰ্য সম্পন্ন যেন পাওঁ, বলা, তেখেতক বনদেৱতাসকলে দিয়া উপহাৰৰ কথা কওঁগৈ।

দ্বিতীয় ঋষিকুমাৰ - সেয়ে হওক। (দুয়ো ওলাই যায়)।

সখীদ্বয় - আমি অলংকৰনত অভ্যস্ত নহয়। চিত্ৰ কৰ্মৰ লগত থকা পৰিচয়ৰ ওপৰত নিৰ্ভৰ কৰি এওঁৰ অঙ্গবোৰত আভৰণবোৰ বিনিয়োগ কৰোহঁক।

শকুন্তলা - তোমালোকৰ নৈপুণ্যৰ কথা মই জানো। (দুয়ো শকুন্তলাক অলঙ্কাৰ পিন্ধায়)।

(তাৰ পাছত স্নান কৰি উঠা কাশ্যপে প্ৰৱেশ কৰে)।

কাশ্যপ - শকুন্তলা আজি শুচি যাব এই কাৰণে মোৰ মন বৰ উৎকণ্ঠিত হৈছে, চকুলো বাধা দিবলৈ যাওঁতে মোৰ কণ্ঠৰুদ্ধ হৈছে, চিন্তাত চকুৰ দৃষ্টি কম হৈছে। মই এজন বনবাসী, সন্তানৰ স্নেহত মোৰ যদি এনে অৱস্থা হয়, তেনেহ'লে, গৃহীসকলে প্ৰথমতে কন্যা উলিয়াই দিওঁতে নাজানো কিমান কষ্ট পায় ।। (আগবাঢ়ি গৈ)

সখীদ্বয় - সখী শকুন্তলা❋ অলংকাৰ পিন্ধোৱা হ'ল, এতিয়া পাটকাপোৰ জোৰ পিন্ধা।

(শকুন্তলা বহাৰ পৰা উঠি পাটকাপোৰজোৰ পিন্ধিলে)।

গৌতমী - বাচা❋ এয়া তোমাৰ পিতা আহিছে, তেওঁৰ দুচকুত আনন্দাশ্ৰু বৈ গৈ তোমাক যেন আলিঙ্গন কৰিবলৈহে উপস্থিত হৈছে। তুমি তেওঁক সেৱা কৰা ।

শকুন্তলা - (লাজ লাজ কৰি) পিতা, এয়া প্ৰণাম কৰিছো ।

কাশ্যপ - বাচা❋ শৰ্মিষ্ঠাই যেনেকৈ যযাতিৰ ওচৰত প্ৰিয়পাত্ৰী হৈছিল, তেনেকৈ তুমিও স্বামীৰ প্ৰিয়ভাজন হোৱা আৰু শৰ্মিষ্ঠাই পুৰুক লাভ কৰাৰ দৰে তুমিও সম্ৰাট পুত্ৰ লাভ কৰা ।।

গৌতমী - ভগবান❋ এয়া কেৱল আশীৰ্বাদেই নহয়; ই বৰো ।

কাশ্যপ - বাচা❋ আহা, এইফালে আহা। এয়া যে অগ্নিত্ৰয়ত এতিয়া আহুতি দিয়া হৈছে, তাক প্ৰদক্ষিণ কৰা।

(সকলোৱে পৰিক্ৰমণ কৰে, ঘূৰে)।

কাশ্যপ - (ঋগ্বেদৰ ছন্দেৰে আশীৰ্বাদ বাক্য উচ্চাৰণ কৰি) বেদিৰ ওপৰত যি অগ্নিত্ৰয় নিজ

নিজ কুণ্ডত অধিষ্ঠিত হৈ আছে, য'ত সমিধ দিয়া হৈছে আৰু যাৰ প্ৰান্তভাগত দৰ্ভ বিস্তৃত কৰা হৈছে, সেই যজ্ঞাগ্নিয়ে হব্যগন্ধেৰে সকলো অমঙ্গল নাশ কৰি তোমাক পবিত্ৰ কৰক ।।

এতিয়া যাত্ৰা আৰম্ভ কৰা। (দৃষ্টিক্ষেপ কৰি) শাৰ্ঙ্গৰৱ প্ৰভৃতি ক'ত?

শিষ্যদ্বয় - (প্ৰবেশ কৰি) ভগৱন❋ এয়া আমি ইয়াত আছো।

কাশ্যপ - তোমালোকৰ ভনীয়েৰাক বাট দেখুৱা।

শাৰ্ঙ্গৰৱ - তুমি এইফালে আহা (সকলোৱে ঘূৰে)।

কাশ্যপ - হে ওচৰত থকা তপোৱনৰ বৃক্ষসকল❋ যিজনীয়ে তোমালোকক জলপান নকৰাকৈ নিজে পানী পান নকৰিছিল, মণ্ডন ভাল পালেও চেনেহতে তোমালোকৰ পৰা এটি কুঁহিপাত চিঙা নাছিল, তোমালোকৰ প্ৰথম ফুল ফুলাৰ সময়ত যাৰ উৎসৱ যেন হৈছিল, সেই শকুন্তলা আজি পতিৰ ঘৰলৈ যাব, তোমালোক সকলোৱে তাৰ বাবে অনুমতি দিয়া ।।

(কুলিৰ মাত শুনাৰ অভিনয় কৰি)।

অৰণ্যত একেলগে বাস কৰা শকুন্তলাৰ বন্ধু এই তৰুবোৰে তেওঁক যাবলৈ অনুমতি দিছে, কাৰণ তেওঁলোকে এনেকৈ কুলিৰ মাতেৰে মোৰ কথাৰ উত্তৰ দিছে।।

(আকাশত)

এই পথ শুভময় হওঁক, মাজে মাজে হৰিৎবৰ্ণৰ মনোৰম সৰোবৰ আদিৰে, ছায়াময় গছৰে সূৰ্য্যৰ কিৰণৰ তাপ নিবাৰিত হৈ পদুমৰ পৰাগেৰে পথৰ ধূলিবোৰ কোমল হৈ শকুন্তলাৰ যাত্ৰাপথ শুভ আৰু বতাহ ধীৰ আৰু অনুকুল হওঁক।।।

(সকলোৱে আচৰিত হৈ আকাশবাণী শুনিলে)।

গৌতমী - বাচা❋ জ্ঞাতিসকলৰ দৰে তোমাক যিসকলে স্নেহ কৰে সেই তপোবনৰ দেৱীসকলে তোমাক যাত্ৰাৰ অনুমতি দিছে। এতিয়া ভগবতীসকলক প্ৰণাম কৰা।

শকুন্তলা - (প্ৰণাম জনাই যাবলৈ আৰম্ভ কৰি, একাষৰীয়াকৈ) হে সখী প্ৰিয়ম্বদা, যদিও আৰ্যপুত্ৰক দেখাৰ বাবে মোৰ এই ব্যগ্ৰতা হৈছে, তথাপিও কিন্তু আশ্ৰম এৰি যাবলৈ মোৰ চৰণ আগবঢ়া নাই।

প্ৰিয়ম্বদা - তপোবন ত্যাগ কৰি যাবলৈ ওলোৱা বাবে তোমাৰেই যে কেৱল দুখ হৈছে এনে নহয়, তপোৱনৰো একে অবস্থা হৈছে। সৌ চোৱা হৰিণবোৰৰ মুখৰ পৰা আধাচোবোৱা কুশ পৰিছে, ময়ূৰবিলাকে নৃত্য ত্যাগ কৰিছে, লতাবোৰৰ শুকান পাতবোৰ গুছি গৈ যেন চকুৰ পানী হৈ সৰি পৰিছে।।

শকুন্তলা - (সোঁৱৰণ কৰি) পিতা❋ লতাভগিনী বনজ্যোৎস্নাজুপিক এবাব মাত লগাওঁ।

কাশ্যপ - বনজ্যোৎস্নাৰ ওপৰত তোমাৰ ভনী যেন চেনেহ আছে সেয়া মই জানো। তোমাৰ সোঁহাতে লতাজুপি আছে।

শকুন্তলা - (ওচৰলৈ গৈ লতা জোপাক সাবতি ধৰি) বনজ্যোৎস্না❋ যদিও তুমি আম গছৰ

লগত সঙ্গত হৈছা, তথাপি তোমাৰ ঠাল-ঠেঙুলিবোৰেৰে এবাৰ মোক সাৱতি ধৰাচোন। আজিৰ পৰা মই বহুদূৰলৈ গুচি যাম।

কাশ্যপ - মই প্ৰথমৰে পৰা তোমাক উপযুক্ত স্বামীৰ হাতত তুলি দিম বুলি সংকল্প কৰিছিলো। এতিয়া তুমি তোমাৰ নিজৰ সুকৃতিৰ বলত তাকে পাইছা । এই নৱমালিকাই আম গছক আশ্ৰয় কৰিছে, তাইৰ বাবে আৰু তোমাৰ বাবে এতিয়া আৰু মোৰ কোনো চিন্তা ভাবনা নাই। এতিয়া যাত্ৰা আৰম্ভ কৰা । ।

শকুন্তলা - (সখী দুজনীৰ প্ৰতি) ইয়াক তোমালোক দুজনীৰ হাতত সঁপিলো।

সখীদ্বয় - মোক নো কাৰ হাতত সঁপি দিলা ? (চকুলো টোকে)।

কাশ্যপ - অনসূয়া ❋ কেলেই কান্দিছা। তোমালোকেহে শকুন্তলাক স্থিৰ কৰিব লাগে। (সকলোৱে পৰিক্ৰমণ কৰে)

শকুন্তলা - পিতা ❋ সেই হৰিণজনী লাহে লাহে কুটাবৰ কাষে কাষে ঘুৰি ফুৰিছে। তাইৰ পোৱালী জগোৱাৰ সময় আহিছে। তাই যেতিয়া বিঘিনি নঘটাকৈ পোৱালি দিব তেতিয়া কাৰোবাক পঠিয়াই মোক সেই সুখবৰটো জনাব।

কাশ্যপ - বাৰু ❋ মনত ৰাখিম।

শকুন্তলা - (গতি ভঙ্গৰ অভিনয় কৰি) কোনেনো মোৰ কাপোৰত টানে অ'?

কাশ্যপ - বাচা ❋ যাৰ মুখত কুশৰ কাঁইটে বিন্ধিলে, ক্ষত হ'লে তুমি ইঙ্গুদী গুটিৰ তেল লগাই দিছিলা, যাক তুমি নিজৰ পুত্ৰৰ দৰে ভাবা, সেই হৰিণৰ পোৱালিটোৱে তোমাৰ লগএৰানাহি।।

শকুন্তলা - বাচা ❋ তোক এৰি যে মই যাবলৈ ওলাইছো ❋ মোৰ লগত তই কিয় আহিছ? জন্মিবৰ অলপ দিন পাছতে তোৰ মা মৰিলেও তই জীবিত থাকি ডাঙৰ হৈছ, এতিয়া মই নাথাকিলেও দেউতাই তোক চাব। (কান্দি আগবাঢ়ে)।

কাশ্যপ - (আই) ❋ চকুলোৰে তোমাৰ দীঘল পক্ষ্মযুক্ত চকুৰ দৃষ্টি অৱৰুদ্ধ হৈছে, ধৈয্য ধৰি চকুলো বোৱা বন্ধ কৰা, এই ঠাইবোৰ ওখৰা-মোখৰা, তাকে নেদেখা বাবে তোমাৰ খোজবোৰ ঠিক ঠাইত পৰা নাই। (তোমাৰ পথ বিষণীকৃত হৈছে! হ'ব)।।

শার্ঙ্গৰৱ - ভগৱন ❋ স্নেহভাজন লোকৰ জলাধাৰ পৰ্যন্ত যোৱাৰ ৰীতি। এয়া আমি জলাশয়ৰ কাষ পালোহি। গতিকে ইয়াতে আপোনাৰ সন্দেশ শুনাই আপুনি উভতি যোৱা উচিত হ'ব।

কাশ্যপ - তেনেহ'লে সেই বৰগছ জোপাৰ ছায়াতে আশ্ৰয় লওহঁক। (সকলোৱে এপাক ঘূৰি ৰয়) (নিজে মনতে) ৰজা দুষ্যন্তকনো তেওঁৰ বাবে উপযুক্ত কি কথা সন্দেশৰূপে জনাওঁ? (চিন্তা কৰে)।

শকুন্তলা - (একাষৰীয়াকৈ) সখী। চোৱা, সেই চক্ৰবাকীজনীয়ে গিৰীয়েক পদুম পাতৰ আঁৰ হওঁতে নেদেখি আতুৰ হৈ চিঞৰিছে । ময়ো বৰ দুষ্কৰ কাম কৰিবলৈ ওলোৱা বুলি মনতে ভাবিছো।

অনসূয়া - সখী ❋ তেনেকৈ নাভাবিবাচোন । তায়ো প্রিয়জনৰ বিয়োগজনিত দীঘলীয়া ৰাতিটো দুঃখেৰে কটায় । সেই বিৰহৰ দুঃখ গুৰুতৰ হ'লেও পুনর্মিলনৰ আশাত তাকো সহ্যকৰে ।।

কাশ্যপ - শার্ঙ্গৰৱ ❋ শকুন্তলাক আগত থৈ ৰজা দুষ্যন্তক মোৰ বচনেৰে এনেকৈ ক'বা —

শার্ঙ্গৰৱ - আপুনি আজ্ঞা কৰক।

কাশ্যপ - তপোবৃদ্ধ আমাৰ কথা, আপোনাৰ নিজৰ বংশ মর্যাদাৰ কথা, আৰু আত্মীয় স্বজনৰ যত কোনো হাত নাছিল, আপোনাৰ প্রতি শকুন্তলাৰ সেই স্বতঃজাত গভীৰ প্রেমৰ কথা মনত পেলাই আপুনি তেওঁক আন পত্নীৰ সমান সমাদৰৰ দৃষ্টিৰে চাব; ইয়াতকৈ অধিক আশা কৰা ভাগ্যৰ অধীন, বধূৰ আত্মীয়-স্বজনৰ সেই বিষয়ে কোৱাৰ অধিকাৰ নাই।

শার্ঙ্গৰৱ - আপোনাৰ সন্দেশ-বার্তা গৃহীত হ'ল।

কাশ্যপ - বাচা ❋ এইবাৰ তোমাক উপদেশ দিওঁ। কাবাসী হ'লেও আমি সংসাৰৰ ৰীতি- নীতি জানো।

শার্ঙ্গৰৱ - ধীমান লোকৰ অজ্ঞাত একো নাথাকে।

কাশ্যপ - এতিয়াৰ পৰা তুমি ইয়াৰ পৰা গৈ পতিৰ কুল পাই গুকসকলৰ সেৱা-শুশ্রূষা কৰিবা, সতিনীসকলক প্রিয়সখী জ্ঞান কৰিবা, গিৰিয়েৰাই কেতিয়াবা দুর্ব্যবহাৰ কৰিলেও তেওঁৰ (প্রতি) প্রতিকূল আচৰণ নকৰিব, নিজৰ সৌভাগ্যত গর্বিতা নহৈ দাস-দাসীসকলৰ প্রতি সদয় ব্যৱহাৰ কৰিবা। যুৱতীসকলে এইদৰে আচৰণ কৰি সুগৃহিনীৰ পদ লাভ কৰে; ইয়াৰ বিপৰীত আচৰণ কৰা স্ত্রী কুলৰ বাবে যন্ত্রণাদায়ক হয়।। । গৌতমীয়ে বা কি কয়।

গৌতমী - ন বোৱাৰীৰ বাবে এইখিনি উপদেশেই যথেষ্ট। বাচা ❋ এইবোৰ উপদেশ মনত ৰাখিবা।

কাশ্যপ - বাচা ❋ মোক আৰু সখীসকলক আলিঙ্গন কৰা।

শকুন্তলা - দেউতা ❋ প্রিয়ম্বদাহঁত ইয়াৰ পৰাই উভতি যাব নেকি ?

কাশ্যপ - বাচা ❋ এওঁলোককো বিয়া দিব লাগিব। এওঁলোক তোমাৰ লগত তালৈ যোৱা উচিত নহ'ব। তোমাৰ লগত গৌতমী যাব নহয়।

শকুন্তলা - (পিতৃক আলিঙ্গন কৰি) এতিয়া দেউতাৰ কোলাৰ পৰা পৰি মলয় পর্বতৰ পৰা উভালি অনা চন্দন গছৰ দৰে দেশান্তৰত কেনেকৈ জীয়াই থাকিম ?

কাশ্যপ - বাচা ❋ তুমি ইমান কাতৰ হৈছা কিয় ? অনেক পৰিজনযুক্ত স্বামীৰ শ্লাঘনীয় গৃহিনীপদত প্রতিষ্ঠিত হৈ, সেই পদৰ উপযুক্ত অতুল বিভৱজনিত গুৰুতৰ কাম-কাজত ব্যাপৃত হৈ থাকি আৰু পূর্ব দিশে সূর্য্যক জন্ম দিয়াৰ দৰে শীঘ্রে বিশুদ্ধ পুত্রক জন্ম দি, মোৰ বিৰহত জন্মিব পাৰা দুঃখ শোক তুমি গণ্য কৰিবলগীয়া নহ'ব ।। ।

(শকুন্তলাই পিতৃকপ্রণাম জনালে)

কাশ্যপ - মই যি ভাবিছো সেয়া তোমাৰ হওঁক।

শকুন্তলা - (সখী দুজনীৰ কাষলৈ গৈ) দুয়ো মোক একেলগে সাবতি ধৰা।

সখীদ্বয় - (তাকে কৰি) সখী। যদি সেই ৰজাই তোমাক চিনি পোৱাত মন্থৰ হয় তেতিয়া তেওঁ দি যোৱা তেওঁৰ নামাঙ্কিত আঙঠিটো দেখুৱাবা।

শকুন্তলা - তোমালোকৰ এই সন্দেহে মোৰ হিয়া কঁপাইছে।

সখীদ্বয় - ভয় নাখাবা, অতি স্নেহে সদায় অমঙ্গল আশংকা কৰে।

শার্ঙ্গৰৱ - বেলা বহুত হ'ল। তুমি খৰধৰ কৰা।

শকুন্তলা - (আশ্রমলৈ মুখ কৰি থিয় হৈ) দেউতা আৰু নো কেতিয়া তপোবন দেখা পাম।

কাশ্যপ - বাচা শুনা ।বহুদিন চাৰিসাগৰে বেৰি থকা পৃথিবীৰ সপত্নী হৈ দুষ্যন্তৰ প্রতিদ্বন্দ্বীহীন পুত্রক সিংহাসনত বহুৱায় আৰু তোমাৰ স্বামীয়ে যেতিয়া তেওঁৰ ওপৰত আত্মীয় পৰিজনৰভাৰ অর্পণ কৰিব, তেতিয়া তেওঁৰ সৈতে আকৌ এই শান্তিপূর্ণ আশ্রমলৈ আহিবা।।

গৌতমী - বাচা ❋ যাত্রাৰ সময় গৈ আছে। পিতৃক ঘূৰাই পঠোৱা। অথবা এওঁতো বাৰে বাৰে বহুক্ষণ একে কথাকে কৈ থাকিব। আপুনিয়ে উভতি যাওঁক।

কাশ্যপ - বাচা ❋ মোৰ তপোনুষ্ঠানতে বাধা পৰিছে।

শকুন্তলা - (আকৌ পিতৃক আলিঙ্গন কৰি) পিতাৰ এই শৰীৰ তপস্যাৰে প্রপীড়িত হৈছে। মোৰ বাবে আপুনি অতিশয় উৎকণ্ঠিত নহ'ব।

কাশ্যপ - (নিঃশ্বাস পেলাই) বাচা ❋ কুটীৰৰ দুৱাৰ মুখত তুমি আগতে চতিয়াই দিয়া নীবাড় ধানৰ গজালিবোৰ দেখি মোৰ শোক কেনেকৈ গুচিব ? বাৰু, এতিয়া তোমালোকে যাত্রা কৰা তোমালোকৰ যাত্রাপথ সুখকৰ হওঁক।।

(সহযাত্রী সকলৰ সৈতে শকুন্তলা ওলাই যায়)।

সখীদ্বয় - (শকুন্তলালৈ চায়) হায় হায় ❋ শকুন্তলা হাবিৰ আঁৰ হ'ল।

কাশ্যপ - (দীর্ঘ নিশ্বাস পেলাই) অনুসূয়া ❋ প্রিয়ম্বদা ❋ তোমালোকৰ সহচৰী শকুন্তলা গ'লগৈ। এতিয়া দুঃখ শোক পাহৰি মোৰ পাছে পাছে আহা।

(আটায়ে প্রস্থান কৰে)।

উভয়ে - পিতা ❋ শকুন্তলা হীন শূন্য তপোবনত কেনেকৈ সোমাম ?

কাশ্যপ - স্নেহৰ বাবেই এনে হয়। (ভাবি অলপ আগলৈ।) হায় ❋ শকুন্তলাক পতিগৃহলৈ পঠিয়াই এতিয়াহে মই স্বাস্থ্য লাভ কৰিছো। কাৰণ কন্যা মাত্রই পৰৰ ধন, সেয়েহে শকুন্তলাক স্বামীৰ ওচৰলৈ পঠিয়াই মোৰ মন, অন্যই ন্যাসৰূপে তথা ধন ওভটাই দি চিন্তামুক্ত হোৱাৰ দৰে, একেবাৰে নিশ্চিত হ'ল ।।

(সকলোবোৰ ওলাই যায়)।

११.५ व्याकरणटिप्पणी

अलंकरणम्- अलम् + कृ + ल्युट्
इन्दुपाण्डु- इन्दुरिव पाण्डु (उपमान कर्मधा)
आविष्कृतम्- आविस् + कृ + क्त कर्मणि
स्नानोत्तीर्णः - स्नानात् उत्तीर्णः (सहसुपा)
चिन्ताजड़म्- चिन्तया जड़म् (तृतीया तत्पुरुष समास)
वैक्लवम्- विक्लव + ष्यञ्
अवाप्नुहि- अव्- आप् + लोट्, मध्यमपुरुष, एकवचन
समिद्वन्तः - समिध् + मतुप् बहुवचन
प्रान्तसंस्तीर्णदर्भाः - प्रान्तेषु संस्तीर्णाः दर्भाः येषां ते (बहुव्रीहि समास)
वैताना: -वितानस्य इमे इति वितान + अण्
अपघ्नन्तः - अप- हन् + शतृ १मा बहुवचन
प्रतिवचनीकृतम्- प्रतिवचन + च्वि + कृ + क्त कर्मणि
रम्यान्तरः - रम्यम् अन्तरं यस्य तथोक्तः (बहुव्रीहि समास)
दक्षिणेन- सप्त्यम्यर्थे एनप् प्रत्यय
आत्मसदृशम्- आत्मनः सदृशम् (षष्ठी तत्पुरुष समास)
वीतचिन्तः - वीता चिन्ता यस्य सः (बहुव्रीहि समास)
व्रणविरोपणम्- व्रणानाम् विरोपणम् (षष्ठी तत्पुरुष समास)
विषमीभवन्ति - विषम + चि + भू + लट्, १म पू., बहुवचन
विचिन्त्य - वि- चिन्त् + ल्यप्
भाग्यायत्तम्- भाग्ये आयत्तम् (सहसुपा)
आयत्तम् - आ- यम् + क्त कर्मणि
दृश्या - दृश् + क्यप् + टाप्
अनुशासनीया- अनु-शास् + अनीय + टाप्
विप्रकृता - वि + प्र कृ + क्त, कर्मधा, टाप्
कृत्यैः- कृ + क्यप् = कृत्यम्
प्रतिक्षणम् - क्षणे क्षणे (अव्ययीभाव समास)
प्रसूय- प्र-सू + ल्यप्
उपरुध्यते-उप - रुध् - लट्, कर्मणि
एवंदर्शिनी- एवम् + दृश्य + णिच् + णिनि, कर्तरि, (स्त्रीलिंगे)

११.६ श्लोकानां संस्कृतव्याख्या

१. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया

कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ता जडं दर्शनम्।
वैक्लव्यं मम तावदीदृशामिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ ६ ॥

महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य चतुर्थे अङ्के लभ्यते अयं श्लोकः। शकुन्तलायाः पतिगृहयात्राकाले महर्षिः कण्वः तस्य पालितकन्यायाः शकुंतलायाः कृते स्वशोकं प्रकाशयन्नाह अस्मिन् श्लोके। यथा–

अद्य अस्मिन्नहनि शकुन्तलया पतिगृहं गमिष्यति इति हेतोः मम हृदयम् उत्कण्ठया दुःखेन च संस्पृष्टम् अभूत्। कण्ठः स्वरस्तम्थेन अवरुद्धः कृतः। या बाष्पस्य नेत्रजलस्य वृत्तिः प्रवृत्तिः सा कलुषत्वेन विकृता कृतः स्वरभंगः च उत्पादितः। शकुन्तलायाः गमनरूपचिन्तया दर्शनम् जडत्वेन ग्रस्तम् कृतम्। तेन मया नयनाभ्यां दृष्टुं कर्णाभ्यां श्रोतुं च न शक्यते स्म। वनवासिना मया तादृशं गुरुतरं वैक्लव्यं बियोगवैधुर्यं च अनुभूतम्। यदि एवं दुःखं मया अनुभूयते, तर्हि गृहिणां गृहनिवासिनां नराणां प्रथमोत्पन्नैः कन्यकाविच्छेददुःखैः कथं नु व्याकुलता अनुभव्या स्यात् इति चिन्तितम्। अनपत्येन आरण्यकेन मया कृतकतनयाया विश्लेषेण यदि दुःखम् अनुभूतम्, तर्हि ममत्त्ववतां गृहस्थानां स्वाङ्गभूतानां कन्यानां बियोगवैधुर्यं नितरां दुर्बहमिति मन्यते। अत्रालंकारव्यतिरेकः दृश्यते ? छन्दश्च शार्दूलविक्रीड़ितः।


२. अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।। २२ ॥

अयं श्लोकः महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्'इति नाटकस्य चतुर्थे अङ्के समुपलभ्यते। अस्मिन् श्लोके शकुन्तलां पतिगृहप्रतिप्रेषणे कण्वमहर्षेः अन्तःकरणस्य प्रसन्नता वर्ण्यते। यथा–

यावत् कन्या पित्रालये स्थाप्यते तावत् तया परधनवत् सावधानतया रक्षणं क्रियते। तस्या न्यस्तत्वं परधनत्वं च स्वीक्रियते। सा कन्या अद्य पतिगृहं प्रति प्रेषिता। तस्या प्रेषणेन मम अर्थात् कण्वस्य चित्तं प्रत्यर्पितधनवत् पुनरर्पितम् इव जातम्। एवं परकीयस्य धनस्य प्रत्यर्पणस्य समये यथा चित्तप्रशान्तिः भवति, तथैव कन्यायाः पतिगृहप्रेषणेन पितुः चित्तप्रशान्तिः अनुभूयते इति भावः। अत्र उपमा नाम अलंकारः तथा इन्द्रवज्रा इति वृत्तम् अस्ति।

अस्मिन् विषये भासकृतस्वप्नवासवदत्तम् नाम नाटके अपि एका अनुरूपा उक्तिः दृश्यते—

'सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यस्तस्य रक्षणम्॥'



अग्रगत्याः निरीक्षणम्

प्रश्न १: दुर्वासामुनिः शकुन्तलां किम् अभिशापं दत्तवान् ?

.....

प्रश्न २: वनज्योत्स्ना इति कस्मिन् पुष्पं सूचयति ?

.....

प्रश्न ३: अभिज्ञानशकुन्तलम् इति नाटकस्य चतुर्थाङ्कः किमर्थं रम्यं इति उच्यते ?

प्रश्न ४: कन्यां महर्षिकण्वेन किमर्थं न्यासः इति उच्यते ?

.....

प्रश्न ५: हस्तिनापुरस्य कः राजा शकुन्तलायाः विवाहं कृतवान् ?

.....



११.७ अध्यायात् किमवगतम्

- अभिज्ञानशाकुन्तलम् नाटकस्य चतुर्थं अंशस्य मूल संस्कृतपाठः ज्ञातः।
- पाठस्य संस्कृतानुवादः अपि ज्ञातः।
- चतुर्थे अङ्के शकुन्तलायाः विदायदृश्येन सह परिचितः।
- शकुन्तलायाः पतिगृहप्रेरणदृश्ये प्रकृतिः कथं भागः गृहीतः इति विषये अपि ज्ञातः।
- शकुन्तला तथा प्रकृत्याः निकटसम्बन्धस्य विषये अवगतः।
- शकुन्तलायाः आसन्नविरहे कातरः कण्वस्य विषये अपि ज्ञातं।



११.८ ज्ञानाधिक्यम्

१) ठाकुर, रवींद्रनाथ (१९७०), प्राचीनसाहित्य, कोलकताः विश्वभारती।
२) ठाकुर, रमाशंकर (१९७२), महाकवि कालिदास (हिन्दी), चौखंभा, वाराणसी।
३) मीराशी, वी. वी. च नवाकर (१९५९), कालिदास, मुंबई।
४) शर्मा, थानेश्वर (२००८), अभिज्ञानशाकुन्तलम् - एक समीक्षा, गुवाहाटीः चन्द्रप्रकाश।
५) शर्मा, थानेश्वर (२००८), संस्कृतसाहित्यस्य इतिवृत्तम्, गुवाहाटीः चन्द्रप्रकाश।



११.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : दुर्वासा मुनिः शकुन्तलां प्रियजनः विस्मरिष्यति इति अभिशापं दत्तवान्।

प्रश्नः २ उत्तरम् : नवमल्लिका पुष्पम्।

प्रश्नः ३ उत्तरम् : अभिज्ञानशाकुन्तलम् नाटकस्य चतुर्थ अङ्कस्य नाटकीयता तथा विषयस्य प्रस्तुति अत्यन्तं आकर्षणीयम् अस्ति। तस्मात् एषः अङ्कः रम्यः इति उच्यते।

प्रश्नः ४ उत्तरम् : कन्यासन्तानःपरस्यधनम्। तस्मात् कन्यायाः न्यासः इति उच्यते।

प्रश्नः ५ उत्तरम् : राजा दुष्यन्तः।



११.१० अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नाः: (५० शब्देषु उत्तरं लिखत)

प्रश्नः १: शकुन्तलां कः अभिशापं दत्तवान्?

प्रश्नः २: दुर्वासाऋषिः आश्रमे आगमनकाले प्रियम्बदा अनसूया च किम् अकुर्वन्?

प्रश्नः ३: दुर्वासाऋषिः आश्रमे आगमनसमये शकुन्तलां किम् कुर्वती?

प्रश्नः ४: तस्मिन् समये कण्वऋषिः कुत्र आसीत्?

ख) लघू प्रश्नाः: (१५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: विदायकाले आश्रमस्य पशुनाम्, पक्षिणाम्, वृक्षानां च का स्थितिः आसीत्?

प्रश्नः २: शकुन्तलां केन सह राजधानीं प्रेषिता तथा किमर्थं प्रेषिता?

ग) रचनाधर्मी प्रश्नाः (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: अभिज्ञानशकुन्तलम् नाटकस्य चतुर्थ अङ्कस्य सारांशः लिखतु।

*** ***** ***

अध्यायः १२: अभिज्ञानशाकुन्तलम् (सप्तमाङ्कस्य पाठ्यात्मकाध्ययनम्)

अध्यायस्य संरचना

१२.१ उद्देश्यम्

१२.२ परिचयः

१२.३ अभिज्ञानशाकुन्तलम् नाटकस्य सप्तमाङ्कस्य मूलसंस्कृतपाठः

१२.४ सप्तमाङ्कस्यमूल संस्कृत पाठ्यांशस्य असमीया अनुवादः

१२.५ व्याकरणटिप्पणी

१२.६ श्लोकानां संस्कृतव्याख्या

१२.७ अध्यायात् किमवगतम्

१२.८ ज्ञानाधिक्यम्

१२.९ अग्रगत्याः निरूपणम्

१२.१० अभ्यासप्रश्नाः

१२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् -

- अभिज्ञानशाकुन्तलम् इति नाटकस्य सप्तमाङ्कस्य पाठस्य संस्कृतपाठेन सह परिचितः भविष्यति।
- सप्तमाङ्कस्य असमीया अनुवादविषये ज्ञातुं शक्ष्यति।
- सप्तमाङ्कस्य नाटकीयघटनानां विषये अवगतो भविष्यति।
- सप्तमाङ्कस्य किञ्चन उल्लेखनीयानां श्लोकानां संस्कृतव्याख्या अपि ज्ञास्यति।

१२.२ परिचयः

भवान् पूर्वस्मिन् अध्याये अभिज्ञानशाकुन्तलमिति नाटकस्य तृतीयाङ्कं विहाय प्रथमादारभ्य चतुर्थाङ्कपर्यन्तं विषय-वस्तुना सह परिचितोऽभवत्। पञ्चमाङ्के दुष्यन्तस्य सभायां मुनिशापप्रभावात् राज्ञा शकुन्तलाम् अभिज्ञातुं न शक्नम्। तत् स्थानात् शकुन्तलायाः अप्सरामाता मारीचस्य आश्रमे स्थापितवती। षष्ठाङ्के एकस्मात् धीवरात् राज्ञः नामाङ्कितम् अङ्गुलीयकं प्राप्य राज्ञः शकुन्तलायाः स्मृति पुनः जागरितः। सप्तमाङ्के राजा दुष्यन्तः स्वर्गादागमनकाले मारीचं श्रद्धानिवेदनार्थं आश्रमे प्रविष्टवान्। तत्रैव पुत्रसर्वदमनेन सह शकुन्तलायाः दर्शनमभवत्। तेषां पुनमिलनमेव सप्तमाङ्के विशदीक्रियते।

१२.३ अभिज्ञानशाकुन्तलम् इति नाटकस्य सप्तमाङ्कस्य मूलसंस्कृतपाठः

राजा – मातले कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सांध्य इव मेघपरिघः सानुमानालोक्यते।

मातलिः – आयुष्मन् एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपः संसिद्धि क्षेत्रम्। पश्य, –
स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥ ९।।

राजा – तेन ह्यनतिक्रमणीयानि श्रेयांसि। प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि।

मातलिः– प्रथमः कल्पः।
(नाट्येनावतीर्णौ)

राजा – (सविस्मयम्।)
उपोडशब्दा न रथाङ्गनेमयः प्रवर्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतयाऽनिरुद्धतस्तवावतीर्णोऽपि रथो न लक्ष्यते ॥ १०॥

मातलिः – एतावानेव शतक्रतोरायुष्मतश्च विशेषः।

राजा – मातले कतमस्मिन्प्रदेशे मारीचाश्रमः।

मातलिः – (हस्तेन दर्शयन्।)
वल्मीकार्धनिमग्नमूतिरुरसा संदष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः।
अंसव्यापि शंकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कविम्बं स्थितः ॥ ११॥

राजा– नमस्ते कष्टतपसे।

मातलिः – (संयतप्रग्रहं रथं कृत्वा) एतौ अदितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा – स्वर्गादधिकतरं निर्वृतिस्थानम् अमृतह्रदमिवावगाढोऽस्मि।

मातलिः – (रथं स्थापियत्वा) अवतरत्वायुष्मान्।

राजा – (अवतीर्य) मातले भवान्कथमिदानीम्?

मातलिः– संयन्त्रितो मया रथः वयमप्यवतरामः। (तथा कृत्वा।) इत आयुष्मन्,
(परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

राजा– ननु विस्मयादवलोकयामि।
प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशेधर्माभिषेकक्रिया।
ध्यानं रत्नशिलात हेषु विबुधस्त्रीसंनिधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ १२॥

मातलिः – उत्सर्पिणी खलु महत्तां प्रार्थना। (परिक्रम्य। आकाशे।) अये वृद्धशाकल्य किमनुतिष्ठति

भगवान् मारीचः। किं ब्रवीषि। दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति।

राजा - (कर्णं दत्वा।) अये प्रतिपाल्यावसरः खलु प्रस्तावः।

मातलिः - (राजानमवलोक्य। अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्, यावत् त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि।

राजा - यथा भवान् मन्यते। (इति स्थितः।)

मातलिः - आयुष्मन् साधयाम्यहम्। (इति निष्क्रान्तः।)

राजा - (निमित्तं सूचयित्वा)

मनोरथाय नाशंसे कि बाहो स्पन्दसे बृथा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते ॥ १३॥

(नेपथ्ये।)

मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्?

राजा - (कर्णं दत्वा) अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते।

(शब्दानुसारेणावलोक्य। सविस्मयम्?)

अये को नु खल्वसमनुबध्यमानस्तपस्विनीभ्यामबालत्त्वो बालः।
अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ १४॥

(ततः प्रविशत्ति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः)

बाल - जृम्भस्व सिंहदन्तांस्ते गणयिष्ये।

प्रथमा- अविनीत किं नः अपत्यनिर्विशेषाणि सत्त्वानि विकरोषि। हन्त वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामेधेयोऽसि।

राजा - किं नु खलु बालेऽस्मिन्नारैस इव पुत्रे स्निह्यति मे मनः। नूनमनपत्यता मां वत्सलयति।

द्वितीया - एषा खलु केसरिणी त्वां लङ्घयति यद्यस्याः पुत्रकं न मुञ्चसि।

बालः - (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

राजा - महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्षइव स्थितः॥ १५॥

प्रथमा- वत्स एनं बालमृगेद्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बालः - कुत्र? देहि एतत्। (इति हस्तं प्रसारयति।)

राजा- कथं चक्रवर्तिलक्षणमप्यनेन धार्यते? तथा ह्यस्य -

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङगुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम् ॥ १६॥

द्वितीया- सुव्रते न-शक्य एष वाचामात्रेण विरमयितुम्। गच्छत्वम्। मदीय उटजे मार्कण्डेयस्यऋर्षिकुमारस्यवर्णचित्रितो मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।

प्रथमा– तथा। (इति निष्क्रान्ता।)

बालः – अनेनैव तावत्क्रीडिष्यामि। (इति तापसीं विलोक्य हसति।)

राजाः – स्पृहयामि खलु दुर्ललितायास्मै –

आलक्ष्यदन्तमुकुलाननिमित्तहासै रव्यक्तवर्ण रमणीयवचः प्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ १७॥

तापसी – भवतु। न मामयं गणयति। (पार्श्वमवलोक्य।) कोऽत्र ऋषिकुमाराणाम्। (राजानमवलोक्य।) भद्रमुख एहि तावत्। मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।

राजा – (उपगम्य। सस्मितम्) अयि भो महर्षिपुत्र।

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया।
सत्त्वसंश्रय सुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः॥ १८॥

तापसी– भद्रमुख न खल्वयम् ऋषिकुमारः।

राजा– आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात् तु वयमेवंतकिर्णः। (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य। आत्मगतम्।)

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्कात्कृतिनः प्ररूढः॥ १९॥

तापसी – (उभौ निर्वर्ण्य।) आश्चर्यमाश्चर्यम्।

राजा – आये किमिव।

तापसी – अस्य बालकस्य तेऽपि संवादिन्याकृतिरिति विस्मिताऽस्मि।

अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति।

राजा – (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम् अथ कोऽस्य व्यपदेशः ?

तापसी – पुरुवंशः।

राजा – (आत्मगतम्) कथमेकान्ययो मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते।

अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्।
भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानिपश्चात् तरुमूलानि गृहीभवन्ति तेषाम्॥ २०॥

(प्रकाशम्।) न पुनरात्मगत्या मानुषाणामेष विषयः।

तापसी – यथा भद्रमुखो भणति। अप्सरः सम्बन्धेनास्य जननी अत्र देवगुरोस्तपोवने प्रसूता।

राजा – (अपवार्य।) हन्त, द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी।

तापसी – कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति।

राजा – (स्वगतम्।) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि। अथवा अनार्यः परदारव्यवहारः।

(प्रविष्य मृन्मयूरहस्ता।)

तापसी- सर्वदमन शकुन्तलावण्यं प्रेक्षस्व।

बालः - (सदृष्टिक्षेपम्।) कुत्र वा मम माता।

उभे - नामसादृश्येन वञ्चितो मातृवत्सलः।

द्वितीया - वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

राजा- (आत्मगतम्) किं वा शकुन्तलेत्यस्या मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादायकल्पते।

बालः - मातः रोचते म एषं भद्रमयूरः। (इति क्रीडनकमादत्ते।)

प्रथमा - (विलोक्य। सोद्वेगम्।) अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

राजा - अलमावेगेन। नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम्। (इत्यादातुमिच्छति।)

उभे- मा खल्वेतदवलम्ब्य -कथम्। गृहीतमनेन। (इति विस्मया दुरोनिहितहस्ते परस्परमवलोकयतः।)

राजा - किमर्थं प्रतिषिद्धाः स्मः।

प्रथमा - शृणोतु महाराजः। एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।

राजा - अथ गृह्णाति।

प्रथमा - ततस्तं सर्पोभूत्वादशति।

राजा - भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

उभे - अनेकशः।

राजा - (सहर्षम्। आत्मगतम्।) कथमिवसंपूर्णमपि मे मनोरथं नामि नन्दामि। (इति बालं परिष्वजते।)

द्वितीया - सुव्रते एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।
(इति निष्क्रान्ते।)

बाल - मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।

राजा - पुत्रक मया सहैव मातरमभिनन्दिष्यसि।

बालः - मम खलु तातो दुष्यन्तः। न त्वम् ।

राजा - (सस्मितम्।) एष विवाद एव प्रत्याययति।
(ततः प्रविशत्येकवेनीधरा शकुन्तला।)

शकुन्तला -विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न मे आशा आसीदात्मनो भागधेयेषु। अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यत एतत्।

राजा - (शकुन्तलां विलोक्य) अयेसेयम् अत्रभवती शकुन्तलायैषा -
वसने परिधूसरे वसाना नियमक्षाममुखी घृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं विभर्ति ॥ २१ ॥

शकुन्तला –(पश्चात्तापविवर्णं राजानं दृष्ट्वा।)
न खल्वार्यपुत्र इव। ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति।

बालः – (मातरमुपेत्य।) मातः एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति।

राजा – प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तम् अनुकूलपरिणामं संवृत्तम् यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

शकुन्तला –(आत्मगतम्।) हृदय समाश्वसिहि समाश्वसिहि। परित्यक्तमत्सरेण अनुकम्पितास्मि दैवेन। आर्यपुत्रः खल्वेषः।

राजा – प्रिये।
स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥ २२॥

शकुन्तला –जयतु जयतु आर्यपुत्रः। (इत्यर्धोक्ते बाष्पकण्ठी विरमति।)

राजा – सुन्दरि।
बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥ २३॥

बालः – मातः क एषः।

शकुन्तला –वत्स ते भागधेयानि पृच्छ।

राजा – (शकुन्तलायाः पादयोः प्रणिपत्यः)
सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
कमपि मनसः संमोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु हिवृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥ २४॥

शकुन्तला – उत्तिष्ठत्वार्यपुत्रः। नूनं में सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीत् येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः।
(राजोत्तिष्ठति।)

शकुन्तला –अथ कथमार्यपुत्रेण स्मृतो दुःखभाग्यं जनः।

राजा– उद्धृतविषादशल्यः कथयिष्यामि।
मोहान्मया सुतनु पुर्वमुपेक्षितस्ते
यो बद्धबिन्दुरधरं परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
बाष्पं प्रमृज्य विगतानुशयो भवेयम्।। २५।।
(इति ययोक्तमनुतिष्ठति।)

शकुन्तला –(नाममुद्रां दृष्ट्वा।) आर्यपुत्र इदं तदङ्गुलीयकम्।

राजा – अस्मादङ्गुलीयोपलम्थात् खलु स्मृतिरुपलब्धा।

शकुन्तला –विषमं कृतमनेन यत् तदा आर्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत्।

राजा – तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम्।

शकुन्तला – नास्य विश्वसिमि। आर्यपुत्र एवैतद्धारयतु।

(ततः प्रविशति मातलिः।)

मातलिः – दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते।

राजा – अभूत्सम्पादित इति स्वादुतरफलो मे मनोरथः। मातले न खलु विदितोऽयमाखण्डलेन वृत्तान्तःस्यात्।

मातलिः – (सस्मितम्।) किमीश्वराणां परोक्षम्। एत्वायुष्मान्। भगवान्मारीचस्ते दर्शनं वितरति।

राजा – शकुन्तले अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

शकुन्तला – जिह्रेम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम्।

राजा – अप्याचरितव्यमभ्युदयकालेषु। एह्येहि।

(सर्वे परिक्रामन्ति।)

(ततः प्रविशत्यदित्या सार्धमानसस्थो मारीचः)

मारीचः – (राजानमवलोक्य।) दाक्षायणि।

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्कुलिशमाभरणं मघोनः ॥ २६ ॥

अदितिः – सम्भावनीयानुभावा अस्याकृतिः।

मातलिः – आयुष्मन्एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तावुपसर्प।

राजा – मातले।

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञ भागेश्वरम्।
यस्मिन्नात्मभवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमारोचिसंभवमिदं तत्त्वष्टुरेकान्तरम् ॥ २७ ॥

मातलिः – अथ किम्।

राजा – (उपगम्य।) उभाभ्यामपि वासवनियोज्यो दुष्यन्तः प्रणमति।

मारीचः – वत्स चिरं जीवः। पृथिवीं पालय।

अदितिः – वत्स अप्रतिरथो भव।

शकुन्तला –दारकसहिता वां पादवन्दनं करोमि।

मारीचः – वत्से

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः।

आशीरन्या न ते योग्या पौलोमीसदृशो भव ॥ २८॥

अदितिः - जाते भर्तुर्बहुमता भव। अयं च दीर्घायुर्वत्सक उभयकुलनन्दनो भवतु। उपविशत।
(सर्वे प्रजापतिममित उपविशन्ति।)

मारीचः - (एकैकं निर्दिशन्।)
दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् ॥ २९॥

राजा - भगवन्, प्रागभिप्रेतसिद्धिः, पश्चाद्दर्शनम्। अतोऽपूर्वः खलु वोऽनुग्रहः। कुतः।
उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः।
निमित्त नैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्त सिद्धयः॥ ३०॥

मातलिः - एवं विधातारः प्रसीदन्ति।

राजा - भगवन् इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य। पश्चादङ्गुलीयक दर्शनादूढ पूर्वी तद् दुहितरमवगतोऽहम्। तच्चित्रमिव मे प्रतिभाति।
यथा गजो नेति समक्षरूपे तस्मिन्नपक्रामति संशयः स्यात्।
पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे मनसो विकारः॥ ३१॥

मारीचः - वत्स अलमात्मापराधशङ्कया। संमोहोऽपि त्वय्यनुपपन्नः श्रूयताम्।

राजा - अवहितोऽस्मि।

मारीचः - यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मिदुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टानान्यथेति। स चायमङ्गुलीयकदर्शनावसानः।

राजा - (सोच्छ्वासम्।) एष वचनीयान्मुक्तोऽस्मि।

शकुन्तला -(स्वगतम्) दिष्ट्या अकारणप्रत्यादेशी नार्यपुत्रः। न पुनः शप्तमात्मानं स्मरामि। अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितः। अतः सखीभ्यां संदिष्टास्मि भर्तुः अङ्गुलीयकं दर्शयितव्यमिति।

मारीचः - वत्से चरितार्थसि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः। पश्य -
शापादसि प्रतिहता स्मृतिरोधरुक्षे
भर्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥ ३२॥

राजा - यथाह भगवान्।

मारीचः - वत्स कच्चिदभिनन्दितस्त्वया, विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एष शाकुन्तलेयः?।

राजा - भगवन् अत्र खलु मे वंशप्रतिष्ठा। १ (इति बालं हस्तेन गृह्णाति।)

मारीचः - तथाभाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य -

रथेनानुद्घातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात्सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥ ३३॥

राजा - भगवता कृतसंस्कारे सर्वमस्मिन् वयमाशास्महे।

अदिति - भगवन् अनया दुहितृमनोरथसंपत्तेः कण्वोऽपि तावत् श्रुतविस्तारः क्रियताम्। दुहितृवत्सला मेनका इह एव उपचरन्ती तिष्ठति।

शकुन्तला - (आत्मगतम्।) मनोरथः खलु मे भणितो भगवत्या।

मारीचः - तपः प्रभवात् प्रत्यक्षं सर्वमेव तत्रभवतः।

राजा - अतः खलु मम नातिक्रुद्धो मुनिः।

मारीचः - तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः। कः कोऽत्र भोः ।

शिष्यः - भगवन् अयमस्मि।

मारीचः - गालव, इदानीमेव विहायसा गत्वा मम वचनात् तत्रभत्रते कण्याय प्रियमावेदय यथा पुत्रवती शकुन्तलातच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति।

शिष्यः - यदाज्ञापयति भगवान्। (इति निष्क्रान्तः।)

मारीचः - वत्स त्वमपि स्वापत्यदारसहित्यः सख्युराखण्डलस्य रथमारुह्य ते राजधानीं प्रतिष्ठस्व।

राजा - यदाज्ञापयति भगवान्।

मारीचः - अपि च

तव भवतुबिडौजाः प्राजवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व।
युगशतपरिवर्तानेवमन्योन्यकृत्यै
र्नेयतमुभय लोकानुग्रहश्लाघनीयौ॥ ३४॥

राजा - भगवन् यथाशाक्ति श्रेयसे यतिष्ये।

मारीचः - वत्स किं ते भूयः प्रियमुपकरोमि।

राजा - अतःपरमपि प्रियमस्ति। यदीह भगवान् प्रियं कर्तुम् इच्छति तर्हि इदमस्तु।

(भरतवाक्यम्)

प्रवर्ततां प्रकृति हिताय पार्थिवः
सरस्वती श्रुतमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५॥

(निष्क्रान्ताः सर्वे।)

इति सप्तमोऽङ्कः।

১২.৪ সপ্তম্ অঙ্কস্য মূল সংস্কৃত পাঠ্যাংশস্য অসমীয়া অনুবাদঃ

ৰজা - মাতলি ❋ পূব আৰু পশ্চিম প্ৰান্ত সাগৰত নিমগ্ন হৈ থকা, য'ৰ পৰা সোণৰ ৰস বৈ থকা যেন লাগে, সন্ধ্যাকালীন দীঘলীয়া মেঘৰাশিৰ দৰে সেইটোনো কি পৰ্বত?

মাতলি - হেমকূট নামে কিম্পুৰুষ পৰ্বত, ই তপঃসিদ্ধিৰ ক্ষেত্ৰ। স্বয়ম্ভু ব্ৰহ্মাৰ পুত্ৰ মাৰীচৰ বংশধৰ আৰু দেৱাসুৰৰ জনক কশ্যপ প্ৰজাপতিয়ে ইয়াত পত্নীৰ সৈতে তপস্যা কৰে।।

ৰজা - মহাত্মাসকলক সেৱা-সম্ভাষণ নকৰাকৈ যাব নোৱাৰি; ভগৱান কশ্যপক প্ৰদক্ষিণ কৰি যাব খোজো।

মাতলি - উত্তম কথা।

(অৱতৰণৰ অভিনয় কৰে)।

ৰজা - (সবিস্ময়ে) আপোনাৰ ৰথ যে নামি ৰৈছেগৈ তাক বুজিব পৰা নাই, কাৰণ ৰথখনে ভূমি স্পৰ্শ কৰা নাই, ৰথচক্ৰৰ নেমিৰ কোনো শব্দ হোৱা নাই আৰু ধূলি উৰা নাই।

মাতলি - ইন্দ্ৰ আৰু আপোনাৰ মাজতো প্ৰভেদ ইমানেই।

ৰজা - মাতলি ❋ মাৰীচৰ আশ্ৰম কোনফালে?

মাতলি - (হাতেৰে দেখুৱাই) যি ঠাইত সেই মুনিগৰাকীয়ে ডাল-পাতহীন ঘাই গছডালৰ দৰে লৰচৰ নকৰাকৈ একেৰাহে সূর্যলৈ চাই আছে, তেওঁৰ শৰীৰৰ আধাভাগ উঁই হাফলুত পোট খাই আছে, বুকুৰ অংশ সাপৰ মোটবোৰে মেৰিয়াই আছে, ডিঙিৰ অংশক শুকান লতাবোৰে মেৰিয়াই ধৰি কষ্ট দিছে আৰু চৰায়ে বাঁহ লোৱা জঁটা বন্ধা চুলিবোৰ কান্ধলৈকে ঢাকি ৰাখিছে, তাতে মাৰীচৰ আশ্ৰম।।

ৰজা - কঠোৰ তপস্যাত ৰত। আপোনাক নমস্কাৰ।

মাতলি - (ৰথৰ অশ্বৰ লেকাম টানি ধৰি) মহাৰাজ ❋ এয়া আমি অদিতিয়ে প্ৰতিপালন কৰি বৃদ্ধি কৰা মন্দাৰ গছেৰে ভৰা সেই প্ৰজাপতিৰ আশ্ৰম। আমি তাত প্ৰৱেশ কৰিছো।

ৰজা - এয়া স্বৰ্গতকৈও অধিক শান্তিময় স্থান। অমৃতৰ হ্ৰদত যেন স্নান কৰিছো (এনে লাগে)।

মাতলি - (ৰথখন ৰখায়) মহাৰাজ ❋ আপুনি অবতৰণ কৰক।

ৰজা - (অৱতৰণ কৰি) মাতলি ❋ আপুনি এতিয়া কি কৰিব খুজিছে?

মাতলি - মই ভালদৰে ৰথখন ৰাখিছো, ময়ো নামো। (তাকে কৰি) আয়ুষ্মন্ ❋ এইফালে আহক। (এপাক ঘূৰি) মহান্ ঋষিসকলৰ তপোৱনভূমিভাগ চাওক।

ৰজা - দেখি বিস্ময় মানিছো। কল্পবৃক্ষ থকা তপোবনতো মাথোন ৰায়ুৰে প্ৰাণধাৰণ কৰা হয়; স্বৰ্ণকমলৰ ৰেণুৰে পিংগলবৰ্ণ ধাৰণ কৰা জলত স্নান কৰা হয়; ৰত্নশিলাৰ ওপৰত বহি কৰা হয় ধ্যান; অপ্সৰাৰ সান্নিধ্যত থাকি কৰা হয় সংযম অভ্যাস—

আন মুনিসকলে তপস্যাৰে যি পাবলৈ আকাংক্ষা কৰে তাৰ মাজতে থাকি এওঁলোকে তপস্যাকৰে।।

মাতলি - মহৎলোকসকলৰ প্ৰাৰ্থনা ক্ৰমশঃ উচ্চতৰ হৈ থাকে। (আগুৱাই গৈ আকাশত) হেৰি বৃদ্ধশাকল্য ❋ ভগবান্ মাৰীচে এতিয়া কি কৰিছে? কি ক'লে? দাক্ষায়ণীয়ে তেওঁক পতিব্ৰতাসকলৰ পালনীয় ধৰ্ম সম্বন্ধে প্ৰশ্ন কৰিলত তেওঁ সেই পত্নী আৰু মহৰ্ষিসকলৰ পত্নীক সেই বিষয়ে কৈ আছে।

ৰজা - (ৰজাই কানপাতি) তেওঁ অৱসৰ পোৱালৈকে আমি অপেক্ষা কৰা উচিত হ'ব।

মাতলি - (ৰজালৈ চাই) আয়ুষ্মানে এই অশোক গছৰ তলতে বহক; মই ইন্দ্ৰগুৰু কাশ্যপেৰে সৈতে আপোনাক সাক্ষাৎ কৰাই দিবলৈ সুযোগ বিচাৰি চাওঁ।

ৰজা - আপুনি যি ভাল বুলি ভাৱে তাকে কৰক। (ঠিয় হৈ ৰয়)।

মাতলি - আয়ুষ্মান। এয়া মই আহিছো। (ওলাই যায়)।

ৰজা - (নিমিত্তৰ সূচনা পাই) মই মনোৰথ পূৰণ হোৱাৰ কোনো আশা কৰা নাই। তথাপি, হে বাহু ❋ অকাৰনে স্পন্দিত হৈছা? শ্ৰেয়ক এবাৰ প্ৰত্যাখ্যান কৰিলে সি দুঃখত পৰিৱৰ্তিত হৈআহে।

(নেপথ্যত)

চপলতা নকৰিবা। পুনৰ তুমি তোমাৰ স্বভাৱ অনুকৰন কৰিছা।

ৰজা - (তাকে শুনি) এয়াতো অশিষ্ট আচৰণৰ ঠাই নহয়। তেন্তে কাক এনেদৰে নিষেধ কৰা হৈছে। (শব্দানুসৰি দৃষ্টিপাত কৰি আচৰিত হৈ।) সেয়েতো, লগত দুগৰাকী তপস্বিনীৰ লগত শিশুৰ আকৃতিৰ তুলনাত অধিক বলবান সৌ ল'ৰাটো কোন? মাকৰ গাখীৰ খোৱা শেষ নৌহওঁতেই সিংহৰ পোৱালিটোক কেসৰত ধৰি অত্যাচাৰ কৰিটানি আনিছে খেল ধেমালি কৰ্ব্বিলৈ।।

(তপস্বিনী দুজনীৰ সৈতে তেনে কাৰ্যত ব্যাপৃত বালকৰ প্ৰবেশ)।

বালক - হে সিংহৰ পোৱালি। মেল, মুখ মেল, তো�ৰ দাঁতকেইটা গণোঁ।

প্ৰথমা (তাপসী) - হেৰ দুষ্ট ❋ আমি যাক সন্তানৰ দৰে দেখো, সেই প্ৰাণীক কিয় কষ্ট দিছা ? হেৰা, তোমাৰ দুষ্টামি বাঢ়িহে গৈছে। ঋষিসকলে তোমাৰ নাম 'সৰ্বদমন' দিয়াটো উপযুক্ত হৈছে।

ৰজা - এই ল'ৰাটোৰ ওপৰত নিজৰ ল'ৰাৰ দৰে মোৰ চেনেহ কিয় হৈছে ? সন্তানহীনতাই নিশ্চয় মোৰ বাৎসল্য-স্নেহ জগাই তুলিছে।

দ্বিতীয় (তাপসী) - নিজৰ পোৱালীটোক এৰি নিদিলে সিংহীজনীয়ে তোমাক আক্ৰমন কৰিব।

বালক - (অকনমান হাঁহি) ও, বৰ ভয় খাইছো। (এইবুলি কৈ ওঠ বেঁকা কৰি দেখুৱালে)।

ৰজা - (বিস্মিত হৈ) এয়া যেন ইন্ধনৰ অপেক্ষাত থকা অগ্নি স্ফুলিঙ্গৰ নিচিনা এই বালকক দেখি মহাশক্তিৰ অংকুৰ যেন বোধ হৈছে।।

প্ৰথমা - বাচা ❋ সিংহৰ পোৱালীটোক এৰি দিয়া। তোমাক আন এটা খেলনা দিম।

বালক - ক'তা, সেয়া ক'ত ? দিয়ানা। (এই বুলি হাত মেলিলে)।

ৰজা - এওঁৰ হাতত যে চক্রবর্তীৰ চিইম আছে। কাৰণ লোভৰ বস্তু পোৱাৰ আশাত আগবঢ়োৱা হাতত আঙুলিবোৰ একেলগে জোৰা দিয়া তাকে দেখি এনে লাগে যেন ৰক্তিমবৰণৰ নতুন ঊষাত ফুলি উঠা এটা পদুম, যাৰ পাহিবোৰৰ মাজত কোনোব্যবধান চকুতনপৰে।।

দ্বিতীয়া - সুব্রতা ❋ এওঁক কেৱল কথাৰে শান্ত কৰিবলৈ নোৱাৰা। যোৱা, মোৰ কুটীৰত ঋষি কুমাৰ মার্কণ্ডেয়ৰ এটা নানাৰঙৰ মাটিৰ ময়ূৰ আছে। সেইটো আনি এওঁক দিয়া।

প্রথমা - সেয়ে হওক। (ওলাই যায়)।

বালক - তেতিয়ালৈ ইয়াৰ লগতে খেলোঁ। (এইদৰে তাপসীৰ মুখলৈ চাই হাঁহে)।

ৰজা - এই ততাতিঙা ল'ৰাটোক দেখি ভাল লাগিছে। অকাৰণে হাঁহি, অলপ অলপ দেখা দিয়া সৰু সৰু দাঁতবোৰ দেখুৱাইছে, আধা আধাকৈ মিঠা কথা কোৱাৰ চেষ্টা, কোলাত উঠাৰ ইচ্ছা- এনে শিশুক কোলাত লৈ তাৰ গাৰ ধূলিৰে যিসকল মলিন হ্যাতেওঁলোকধন্য।।

দ্বিতীয়া (তাপসী) - এওঁ পিছে মোলৈ কেৰেপকে নকৰে। (কাষলৈ চাই) ঋষি কুমাৰসকলৰ কোননো ইয়াত আছে। (ৰজাক দেখা পাই) মহাশয় ❋ এবাৰ ইয়ালৈ আহকচোন। এওঁ বৰ জোৰেৰে সিংহ পোৱালীটোক ধৰি তাক বৰ কষ্ট দিছে। পাৰে যদি তাক তাৰ হাতৰ পৰা এৰুৱাই দিয়কচোন।

ৰজা - (বালকৰ ওচৰলৈ গৈ অলপ হাঁহি) হেৰা মহর্ষিপুত্র আশ্রমবিৰুদ্ধ আচৰনৰ দ্বাৰা প্রাণীৰ আশ্রয়স্বৰূপ সংযম গুণক শিশুকৃষ্ণসর্পই চন্দনগছক দূষিত কৰাৰ দৰেই বাল্যকালৰপৰাইদূষিতকৰিছ।।

তাপসী - মহাশয় ❋ এওঁ ঋষিকুমাৰ নহয়।

ৰজা - এওঁৰ আকাৰ সদৃশ আচৰণেও তাকে কয়। কিন্তু ঠাইৰ কথা বিবেচনা কৰিহে তাকে ভাবিছিলো। (তাপসীৰ কথা মতে কৰিবলৈ গৈ বালকৰ স্পর্শ লাভ কৰি নিজে) আন কুলত জন্মা এওঁৰ পৰশত মোৰ শৰীৰত যদি ইমান সুখবোধ হয় তেনেহলে যি ভাগ্যৱানৰ কোলাত এওঁ বাঢ়িছে তেওঁৰ মনত নাজানো কিমান সুখ হ্য়া।

তাপসী - (দুয়োলৈ ভালদৰে চাই) কি আচৰিত, কি আচৰিত ?

ৰজা - আর্যা, কিয় আচৰিত হৈছে?

তাপসী - আপোনাৰ আৰু এই বালকৰ শৰীৰৰ (চেহেৰাৰ) মিল দেখা পাই মোৰ মনত আশ্চর্যবোধ হৈছে। আপুনি অপৰিচিত হ'লেও আপোনাৰ ওচৰত ল'ৰাটি শান্ত হৈ পৰিল। (আপোনাৰ প্রতি ল'ৰাটো যে বিৰূপ নহ'ল। তাকে দেখিও আচৰিত হ'লো)।

ৰজা - ল'ৰাটোক আদৰ কৰি। যদি এওঁ মুনি কুমাৰ নহয়, তেনেহলে এওঁ কোনবংশৰ বংশধৰ ?

তাপসী - পুৰুবংশৰ।

ৰজা - (নিজে মনতে) তেনেহ'লেও এওঁ আমাৰে একে বংশৰ। সেইবাবে এই তাপসীয়ে এওঁক মোৰ দৰে একে চেহেৰাৰ যেন দেখিছে। পৌৰৱবংশত শেষ বয়সত এনে নিয়ম আছে যে, প্রথম জীবনত তেওঁলোকে পৃথিৱী ৰক্ষাৰ বাবে ৰসভোগময় গৃহত বাস কৰে আৰু শেষ জীৱনত একমাত্র যতিব্রত পালন কৰি গছৰ গুৰিত বাস কৰে।।

(প্রকাশ কৰি) কিন্তু মানুহে নিজ ইচ্ছামতে এই ঠাইলৈ আহিব নোৱাৰে।

তাপসী - ডাঙৰীয়াই ঠিক কথাকে কৈছে। অপ্সৰাৰে সম্বন্ধ থকা বাবে এওঁৰ জননীয়ে ইয়াত দেৱগুৰুৰ তপোবনত প্রসৱ কৰিছে।

ৰজা - (একাষৰীয়াকৈ) হায় ❋ ই মোৰ বাবে দ্বিতীয় আশাৰ জন্ম দিছে। (প্রকাশ কৰে) তেওঁনো কোন ৰাজর্ষিৰ পত্নী ?

তাপসী - কোনে সেই ধর্ম পত্নী ত্যাগ কৰা জনৰ নাম ল'বলৈ চিন্তা কৰিব?

ৰজা - (নিজে নিজে) এই কথা মোকে লক্ষ্য কৰি কৈছে নেকি? তেনেহ'লে শিশুটোৰ মাকৰ নাম সোধো নেকি? পৰস্ত্রীৰ বিষয়ে জানিব খোজাটো ভদ্রোজনোচিত নহয় কথা সোধাটো অনার্য্য ব্যৱহাৰ।

(মাটিৰ ময়ূৰ হাতত লৈ প্রৱেশ কৰি)।

তাপসী - সর্বদমন ❋ চৰাইটোৰ লাৱন্য চোৱা।

বালক - (চকু ফুৰাই) ক'ত মোৰ মা?

দুয়ো তাপসী -নামৰ সাদৃশ্যৰে মাতৃবৎসল ল'ৰাটো বঞ্চিত হৈছে।

দ্বিতীয় তাপসী - বাচা ❋ মই মাটিৰ ময়ূৰৰ সৌন্দয্য চোৱা বুলি কৈছিলো।

ৰজা - (নিজে মনতে) তেনে ল'ৰাটিৰ মাকৰ নাম শকুন্তলা হয় নেকি? কিন্তু একে নামৰ সাদৃশ্য বহুতৰে হ'ব পাৰে। বোধহয় কেবল নাম মাত্রৰ ওপৰত আশা কৰা মৃগতৃষ্ণিকাৰ দৰে শেষত মোৰ দুঃখ ওপজাব।

বালক - মা ❋ এই সুন্দৰ ময়ূৰটো মোৰ বৰ ভাল লাগিছে।

(এইদৰে কৈ ময়ূৰটো হাতত ল'লে)।

প্রথমা - (ব্যগ্রভাবে চাই) হায়, সর্বনাশ ❋ এওঁৰ হাতৰ গাঁঠিত ৰক্ষা কবচটো নাই দেখোন।

ৰজা - উদ্বিগ্ন নহ'ব। সিংহৰ পোৱালীটোৰে ধেমালি কৰোঁতে কবচটো পৰি গৈছে। এইবুলি কৈ কৱচটো তুলি ল'ব খোজে।

তাপসীদ্বয় - সেইটো নুচুব, নুচুব। তেওঁ তুলি ললে।

(আচৰিত হৈ দুয়ো বুকুত হাত দি পৰস্পৰৰ মুখলৈ চায়)।

ৰজা - মোক কৱচটো চুবলৈ কিয় বাধা দিছে ?

প্রথমা - শুনক মহাৰাজ ❋ এওঁৰ জাতকর্মৰ সময়ত ভগবান মাৰীচে 'অপৰাজিতা' নামে এই ঔষধটো দিছিল। এইটো মাটিত পৰিলে পিতৃ-মাতৃ বা বালকে নিজৰ বাহিৰে আন

কোনেও স্পর্শ কৰা নিষেধ।

ৰজা - যদি আনে লয়।

প্রথমা - তেনেহ'লে সি সাপ হৈ খুটিয়ায়।

ৰজা - আপোনালোকে নিজ চকুৰে এনেকুৱা হোৱা কেতিয়াবা দেখা পাইছে নে?

তাপসীদ্বয় - বহুবাৰ (দেখিছো)।

ৰজা - (আনন্দমনে, মনতে) মনোৰথ পূৰণ হোৱাত এতিয়া মোৰ আনন্দ নহ'ব কিয় ? (এইদৰে কৈ তেওঁ বালকক সাৱতি ধৰিলে)।

দ্বিতীয় - সুব্রতা❋ বলা, ব্রতপালনত ৰতা শকুন্তলাক এই কথা জনাওগৈ। (দুয়ো ওলায় যায়)।

বালক - মোক এৰি দিয়া, মাৰ ওচৰলৈ যাওঁ।

ৰজা - পুত্র মোৰ, মোৰ সৈতে গৈ মাৰাক অভিনন্দিত কৰিবা।

বালক - মোৰ পিতা দুষ্যন্ত, তুমি নহয়।

ৰজা - (অলপ হাঁহি) এই প্রতিবাদেই তাৰ প্রমাণ। (এডাল বেণীৰে শকুন্তলাৰ প্রবেশ)।

শকুন্তলা - সর্বদমনৰ ঔষধিৰ বিক্রিয়া নহওতে মই মোৰ ভাগ্য লৈ আশাবাদী হোৱা নাই। অথবা সানুমতীয়ে যিদৰে কৈছে সেইদৰে হ'লে ই সম্ভৱো হয়।

ৰজা - (শকুন্তলাক দেখি) এয়াই সেই শকুন্তলা — পৰিধানত বৰ মলিয়ন বস্ত্র, ব্রত-নিয়মাদি পালনত শীর্ণ মুখৰ, এক বেণীধাৰিণী আৰু শুদ্ধশীলা হৈ অতিশয় নিষ্ঠুৰ মোৰ বাবেইসুদীর্ঘ বিৰহ্ব্রতপালন কৰিছে।। 📂①①

শকুন্তলা - (অনুতাপত দুগ্ধ ৰজাক দেখি) এখেতকতো আর্য্যপুত্র যেন লগা নাই। তেনেহ'লে এখেত কোন, মোৰ ৰক্ষা কৰচধাৰী পুত্রক নিজৰ গাত্রস্পর্শৰে দূষিত কৰিছে।

বালক - (মাকৰ ওচৰলৈ গৈ) মা, এই গৰাকী পুৰুষে মোক পুত্র বুলি আলিঙ্গন কৰিছে।

ৰজা - প্রিয়ে❋ তোমাৰ প্রতি মই যি নিষ্ঠুৰ ব্যৱহাৰ কৰিছিলো মোৰ বাবে তাৰ ফল অনুকূলেই হ'ল, কাৰণ তুমি মোক চিনিব পাৰিছা।

শকুন্তলা - (নিজে নিজে) হে হৃদয়, আশ্বস্ত হোৱা, আশ্বস্ত হোৱা। দৈৱ এতিয়া তোমাৰ ওপৰত কঠোৰতা এৰি সদয় হৈছে। এখেত আর্য্যপুত্রই হয়।

ৰজা - প্রিয়ে❋ সৌভাগ্যবশতঃ স্মৃতি ঘূৰাই পোৱাত মোহান্ধকাৰ দূৰ হোৱাত, তুমি মোৰ সমুখত উপস্থিত হৈছা। যেন গ্রহণৰ শেষত ৰোহিণী নক্ষত্রৰ পুনৰ চন্দ্রৰ সৈতে মিলন হ'ল।।📄①①

শকুন্তলা - জয় হওঁক, আর্য্যপুত্রৰ জয় হওঁক। (এইদৰে কৈ থাকোতে কণ্ঠবাষ্পৰুদ্ধ হোৱাত আৰু নিমাত হ'ল।)

ৰজা - সুন্দৰী❋ প্রসাধনৰ অভাৱত ৰক্তিম দুই ওঠযুক্ত তোমাৰ মুখ যে দেখা পালো, ইয়াতে তুমি যি 'জয়' শব্দ উচ্চাৰণ কৰিলা, তোমাৰ চকুলোৰে কণ্ঠৰুদ্ধ হ'লেও তাত মোৰ

জয় লাভেই হৈছে।

বালক - মা ! এওঁ কোন ?

শকুন্তলা - বাচা ! তোমাৰ ভাগ্যক সুধি চোৱা। (এইদৰে কৈ কান্দিবলৈ ধৰিলে)।

ৰজা - (শকুন্তলাৰ ভৰিত পৰি) হে সুতনু, তোমাৰ হৃদয়ৰ পৰা প্রত্যাখ্যানজনিত দুঃখ দূৰ হৈ যাওক, কি কাৰণে নাজানো সেই সময়ত মোৰ মনত সম্মোহ বলবান হৈছিল। প্রৱল তমো গুণেৰে মন আচ্ছন্ন হোৱাত মানুহে শুভ বিষয়তো এনেকুৱা আচৰণেই কৰে, অন্ধ লোকৰ মূৰত ফুলৰ মালা পৰিলেও তাক সাপ বুলি ভাবি দলিয়াই পেলায়।

শকুন্তলা - উঠক আর্য্যপুত্র ! সেই সময়ত নিশ্চয়, মোৰ পূর্ব জন্মকৃত কোনো মঙ্গল প্রতিৰোধক পাপ কর্মৰ পৰিণতি প্রাপ্তিৰ সময় হৈছিল, যাৰ বাবে আর্য্যপুত্র সদয় লোক হ'লেও মোৰ প্রতি বিৰূপ হ'ল।

(ৰজা উঠিল)

শকুন্তলা - এই দুঃখভাগিনীলৈ আর্য্যপুত্রৰ মনত পৰিল কেনেকৈ ?

ৰজা - মোৰ বুকুত বিদ্ধ হৈ থকা বিষাদৰ শেল উভালি পেলাই তাৰ পাছত কম। সুতনু ! তোমাৰ অধৰ পতিত যি বিন্দু বিন্দু চকুলো মই আগতে মোহৰ বশত উপেক্ষা কৰিছিলো, আজি তোমাৰ কুঞ্চিত পক্ষ্মবিলগ্ন সেই অশ্রুজল প্রথমে মঁচি পেলাও। (তাকে কৰিলে)।

শকুন্তলা - (ৰজাৰ নামাঙ্কিত আঙঠিটো দেখি) আর্য্যপুত্র। এয়ে সেই আঙঠিটো নে ?

ৰজা - এই আঙঠিটো পোৱাৰ পাছত হে মোৰ স্মৃতি জাগ্রত হ'ল।

শকুন্তলা - আর্য্যপুত্র বিশ্বাস জন্মাব লগা সময়ত ইয়াক নোপোৱাত ইযে কি অনর্থই নঘটালে ?

ৰজা - তেনেহ'লে ঋতুৰ লগত সংযোগৰ চিহ্নস্বৰূপ লতাই ফুলটো ধাৰণ কৰক।

শকুন্তলা - ওহো, ইয়াক আৰু বিশ্বাস নকৰো। আর্য্যপুত্রই ইয়াক ধাৰণ কৰক।

(মাতলিৰ প্রবেশ)।

মাতলি - ভাগ্যৰ বলত ধর্মপত্নীৰ সৈতে মিলিত হৈ আৰু পুত্রৰ মুখদর্শন কৰি আয়ুষ্মানে সফল মনোৰথ হৈছে।

ৰজা - মোৰ মনো বাসনাৰ মধুৰ পৰিণতি ঘটিত মাতলি ! ইন্দ্রই এই বিষয়ে নিশ্চয় নাজানে।

মাতলি - (অলপ হাঁহি) ঈশ্বৰৰ কিবা অজ্ঞাত থাকেনে ? আয়ুষ্মান আহক, ভগবান মাৰীচে আপোনাক দেখা দিব।

ৰজা - শকুন্তলা ল'ৰাটোক লোৱা। তোমাক আগত লৈ ভগৱান মাৰীচৰ সৈতে দেখা কৰিব খোজো।

শকুন্তলা - আর্য্যপুত্রৰ সৈতে গুৰুজনৰ ওচৰলৈ যাবলৈ লাজ লাগিছে।

ৰজা - মঙ্গলোৎসৱ আদিৰ সময়ত এনেকুৱা কৰিবলগীয়া হয়। আগে আগে যোৱা।

(সকলোৱে আগবাঢ়ি গ'ল)।

(অদিতিৰ সৈতে একেখন আসনত বহি থকা মাৰীচৰ প্ৰৱেশ)।

মাৰীচ - (ৰজাক দেখি) দাক্ষায়নী! তোমাৰ পুত্ৰ ইন্দ্ৰৰ যুদ্ধকৰ্মত যিজনে সদায় সমুখত থাকে, এৰেঁ সেই দুষ্যন্ত নামে পৃথিবীপালক, এওঁৰ ধনুৰ দ্বাৰা ইন্দ্ৰৰ সুতীক্ষ্ণ বজ্ৰৰ কাৰ্য্য সম্পন্ন হোৱাত ইন্দ্ৰৰ বাবে বজ্ৰ তেওঁৰ অলংকাৰ মাত্ৰলৈ পৰ্য্যবসিত হৈছে।।

অদিতি - এওঁৰ মূৰ্ত্তিতেই এওঁৰ পৰাক্ৰম অনুভব কৰা হয়।

মাতলি - আয়ুষ্মান! সৌৱা দেৱতাসকলৰ জনক-জননীয়ে পুত্ৰৰ যিদৰো স্নেহপূৰ্ণ দৃষ্টিৰে আপোনালৈ চাই আছে। তেওঁলোকৰ সমুখলৈ যাওঁক।

ৰজা - মাতলি ! মুনিসকলে বাৰজন আদিত্যৰ উৎপত্তিস্থান বুলি কয়, যিসকল ত্ৰিভুৱনৰ পালক, যিসকলে যজ্ঞভোগী দেৱতাসকলৰ ৰজা ইন্দ্ৰক জন্ম দিছে, স্বয়ম্ভূ বিষ্ণু পৰম পুৰুষ হৈও জন্ম গ্ৰহণৰ বাবে যাৰ আশ্ৰয় গ্ৰহণ কৰিছিল, মৰীচি আৰু দক্ষৰ পৰা যিসকল জন্মিছে, সৃষ্টিকৰ্তা ব্ৰহ্মাৰ পৰা যিসকলৰ মাত্ৰ এক পুৰুষৰ ব্যবধান, এওঁলোকে সেইদম্পতী।।

মাতলি - নহয়নো কি ?

ৰজা - (ওচৰলৈ গৈ) ইন্দ্ৰৰ ভৃত্য দুষ্যন্তই আপোনালোক উভয়কে প্ৰণাম কৰিছে।

মাৰীচ - বাচা ! চিৰঞ্জীৱী হোৱা পৃথিবী পালন কৰা।

অদিতি - বাচা ! অপ্ৰতিদ্বন্দ্বী হোৱা।

শকুন্তলা - পুত্ৰৰ সৈতে আপোনালোক দুয়োৱে পাদবন্দনা কৰিছো।

মাৰীচ - বাচা ! তোমাৰ পতি ইন্দ্ৰতুল্য, তোমাৰ পুত্ৰ জয়ন্তোপম আৰু কোনো আশীৰ্বাদ তোমাৰ যোগ্য নহ'ব, তুমি ইন্দ্ৰৰ পত্নী শচীৰ দৰে হোৱা।।

অদিতি - বাচা ! তুমি স্বামীৰ দ্বাৰা বহুমানিতা হোৱা। তোমাৰ পুত্ৰই দীৰ্ঘজীৱন লাভ কৰি দুয়োকুলৰ আনন্দবৰ্ধন কৰক।

তোমালোক বহা। (সকলোৱে প্ৰজাপ্ৰতিৰ চাৰিওফালে বহে।)

মাৰীচ - (প্ৰত্যেককে পৃথকভাবে নিৰ্দেশ কৰি) তুমি সাধ্বী শকুন্তলা, এওঁ সুপুত্ৰ আৰু তুমি দুষ্যন্ত, ভাগ্যৰ বলত শ্ৰদ্ধা, বিত্ত আৰু বিধি- এই তিনি একত্ৰে মিলিত হৈছাহঁক।।

ৰজা - ভগৱন ! প্ৰথমতে অভিপ্ৰেত সিদ্ধি হ'ল, তাৰ পাছত আপোনাৰ দৰ্শন লাভ কৰিলো, সেয়ে আপোনাৰ অনুগ্ৰহ অপূৰ্ব, কাৰণ প্ৰথমতে ফুল ফুলে, তাৰ পাছত ফল ফলে, প্ৰথমতে মেঘৰ আবিৰ্ভাব হয়, তাৰ পাছত হয় বৰষুণ; এয়ে কাৰণ আৰু কাৰ্য্যৰ ক্ৰম, কিন্তু আপোনাৰ অনুগ্ৰহলাভৰ আগতে সিদ্ধি লাভ হ'ল ।

মাতলি - বিধাতাসকলে এনেদৰে কৃপা বৰ্ষণ কৰে।

ৰজা - ভগৱন ! আপোনালোকৰ আজ্ঞাকাৰিণী এওঁক গান্ধৰ্ব প্ৰথামতে বিয়া কৰোৱাৰ কিছুদিন পাছত এওঁৰ আত্মীয়সকলে যেতিয়া এওঁক মোৰ ওচৰলৈ লৈ আহিল,

তেতিয়া স্মৃতিৰ শিথিলতা হেতু মই এওঁক প্ৰত্যাখ্যান কৰি আপোনাৰ সগোত্ৰ মাননীয় কন্বৰ ওচৰত অপৰাধী হৈছো। তাৰ পাছত আঙঠি দেখি তেওঁৰ কন্যাক বিয়া কৰোৱা কথা মনত পৰিল। এইটো মোৰ মনত বিচিত্ৰ যেন লাগি আছে। সমুখেৰে হাতী পাৰ হৈ যোৱা সময়ত যদি মনত সন্দেহ হয় এইটো হাতী নে আন কিবা, তাৰ পাছত তাৰ ভৰিৰ খোজ দেখি প্ৰত্যয় হয় (যে সেয়া হাতীয়ে হয়), মোৰ মনৰ বিকাৰো তেনেকুৱা হৈছিল।

মাৰীচ - বৎস ❋ তুমি নিজে অন্যায় কৰিছিলা বুলি ভাবি নাথাকিবা। তোমাৰ বাবে সম্মোহ তেনেই অসম্ভব। শুনা —

ৰজা - কওঁক।

মাৰীচ - অপ্সৰা তীৰ্থৰ পৰা যেতিয়া অত্যন্ত কাতৰ অৱস্থাত শকুন্তলাক লৈ মেনকাই দাক্ষায়ণীৰ ওচৰলৈ আহিল, তেতিয়াই মই ধ্যান কৰি জানিলোঁ যে তোমাৰ সহধৰ্মচাৰিণী এই দুৰ্ভগীয়াজনীযে দূৰ্বাসাৰ শাপত পৰি তোমাৰ হাত প্ৰত্যাখ্যাতা হৈছে, আন কোনো কাৰণত নহয়, আৰু সেই শাপৰ অৱসান আঙঠি দেখিলেই হ'ব।

ৰজা - (উচ্ছাসেৰে) মই বৰ অপবাদৰ পৰা মুক্ত হ'লো।

শকুন্তলা - (নিজে মনতে) সৌভাগ্যৰ কথা এয়ে যে আৰ্য্যপুত্ৰই অকাৰণতে মোক প্ৰত্যাখ্যান কৰা নাছিল। কিন্তু মোক কোনোবাই শাপ দিছিল বুলি মোৰ মনত নপৰে। হয়তো শাপ দিছিল, কিন্তু বিৰহবশতঃ শূন্য মনে থকা বাবে মই জানিব পৰা নাছিলো। সেইবাবেই সখীসকলে মোক কৈছিল যে (আৱশ্যক হ'লে) আঙঠিটো দেখুৱাবা।

মাৰীচ - বাচা ❋ এতিয়া তুমি সকলো কথা জানিলা। গতিকে সহধৰ্মচাৰীৰ ওপৰত তুমি ক্ৰোধভাৱ নাৰাখিবা। শুনা- শাপৰ ফলতে স্মৃতিৰোধ হোৱাত ৰুক্ষ হৈ স্বামীয়ে তোমাক প্ৰত্যাখ্যান কৰিছিল; এতিয়া তেওঁৰ সেই অন্ধকাৰ যেতিয়া দূৰ হৈছে, তেতিয়া তুমি তেওঁৰ ওপৰত প্ৰভাৱ দেখুৱাব পাৰিবা। ময়লাৰে দাপোনৰ নিৰ্মলতা আচ্ছন্ন হ'লে তাত প্ৰতিবিম্ব প্ৰকশিত নহয়, দাপোন পৰিষ্কৃত হ'লে তাত প্ৰতিবিম্ব সহজতেপ্ৰকাশপায়।

ৰজা - ভগৱানে সঁচা কথাকে কৈছে।

মাৰীচ - বাচা ❋ শকুন্তলাৰ এই পুত্ৰটিৰ জাতকৰ্ম আদি মই বিধিমতে অনুষ্ঠিত কৰিছো, তুমি তাক অভিনন্দিত কৰিছানে ?

ৰজা - ভগৱন্ ❋ এৰেঁ মোৰ বংশ প্ৰতিষ্ঠাৰ কাৰণ।

(এইদৰে কৈ তেওঁ বালকৰ হাতত ধৰিলে)।

মাৰীচ - তোমাৰ বংশৰ প্ৰতিষ্ঠাৰ কাৰণ এই পুত্ৰ চক্ৰবৰ্তী হ'ব জানিবা। চোৱা — অপ্ৰতিহত গতিৰ ৰথত উঠি সমুদ্ৰ পাৰ হৈ প্ৰতিদ্বন্দ্বীহীনভাবে এওঁ সপ্তদ্বীপা পৃথিবী জয় কৰিব। বলেৰে প্ৰাণীসকলক দমন কৰা কাৰণে ইয়াত এওঁক 'সৰ্বদমন' নাম দিয়া

হৈছে; পাছত পৃথিৱীৰ লোক ভৰণপোষণ কৰাৰ ফলত এওঁ 'ভৰত' নামে জনাজাত হ'ব।

ৰজা - ভগৱনে যেতিয়া এওঁৰ সংস্কাৰকৰ্ম কৰিছে তেতিয়া এওঁৰ সম্বন্ধে মই সকলো আশা কৰিম।

অদিতি - ভগৱন ❋ তেওঁৰ কন্যাৰ মনোৰথ যে সম্পূৰ্ণ সিদ্ধ হৈছে, সেই কথা কন্বকো জনাওঁক। কন্যা বৎসলা মেনকা আমাৰ সেৱাতে ব্যাপৃত হৈ ইয়াতে উপস্থিত আছে।

শকুন্তলা - (নিজে নিজে) ভগৱতীয়ে মোৰ মনৰ কথাকে কৈছে।

মাৰীচ - তপস্যাৰ বলত কন্বৰ সকলো জ্ঞাত হৈছে।

ৰজা - সেইবাবে মুনি মোৰ ওচৰত ক্রুদ্ধ হোৱা নাই।

মাৰীচ - তথাপি এই শুভ সংবাদ তেওঁক জনোৱা উচিত হ'ব। ইয়াত কোন আছে ? (প্রৱেশ কৰি)

শিষ্য - ভগৱন ❋ এয়া মই আছোঁ।

মাৰীচ - গালব ❋ এই মুহূৰ্তে আকাশী পথেৰে গৈ মান্যবৰ কন্বক মোৰ নাম কৈ এই সুসম্বাদ জনোৱা যে সেই শাপ নিবৃত্ত হোৱাত দুষ্যন্তই স্মৃতি লাভ কৰি পুত্রৱতী শকুন্তলাক পুনর্বাৰ গ্রহণ কৰিছে।

শিষ্য - ভগৱনে যেনে আশা কৰিছে; সেয়ে হ'ব। (ওলাই যায়)।

মাৰীচ - বাচা ❋ তুমিও তোমাৰ স্ত্রী আৰু পুত্রক লগত লৈ তোমাৰ মিত্র ইন্দ্রৰ ৰথত উঠি তোমাৰ ৰাজধানীলৈ ৰাওনা হোৱা।

ৰজা - ভগৱনে যি আদেশ কৰিছে সেয়ে হওঁক।

মাৰীচ - আৰু, তোমাৰ প্রজাসকলৰ বাবে ইন্দ্রই প্রচুৰ বৰষুণ দিয়ক। তুমিও বহু যজ্ঞৰে ইন্দ্রক প্রীতিমান কৰা; এইদৰে স্বর্গ আৰু মর্ত্ত দুয়ো লোকৰ পক্ষে হিতকৰ হোৱাত যি শ্লাঘণীয় হ'ব, পৰস্পৰৰ প্রতি সেই কর্ত্তব্য সম্পন্ন কৰি তোমালোকে শ শ যুগ অন্তৰাহিতকৰা।।

ৰজা - ভগৱন ❋ মই যথাশক্তি এই মঙ্গলকার্য্য কৰিবলৈ যত্নবান হ'ম।

মাৰীচ - বৎস ❋ তোমাৰ আৰু কি অধিক উপকাৰ কৰিব পাৰো ?

ৰজা - ইয়াৰ অধিক উপকাৰ কি হ'ব পাৰে ? তথাপি যদি ভগৱনে আৰু কিবা বৰদান কৰিব খোজে, তেনেহ'লে এনে হয় —

(ভৰতৰাক্য)

ৰজাই প্রজাৰ হিতকৰ কার্য্যত প্রবৃত্ত হৈ থাকক। বিদ্বানৰ জ্ঞানে যেন সকলো লোককে মহিমান্বিত কৰে। স্বয়ম্ভূ মহেশ্বৰে বহু শক্তি ধাৰণ কৰি মোৰ পুনর্জন্ম ক্ষয় কৰে যেন।

(সকলো ওলায় যায়)।

१२.५ व्याकरणटिप्पणी

उदाररमणीया- उदारा चासौ रमणीया चेति (कर्मधा)

मेघपरिघः - मेघः परिघ इव (कर्मधा)

सपत्नीकः - पत्न्या सह वर्तमानः (बहुव्रीहि समास)

प्रतिपाल्यावसरः - प्रतिपाल्यः प्रतीक्षणीयः अवसरः यस्य तादृशः (बहुव्रीहि समास)

मनोरथाय - मनोरथं लब्धुम् इति तुमर्थे कर्मणि चतुर्थी

अनुबध्यमानः - अनु- बध् + यक् + शानच्

जालग्रथिताङ्गुलिः - जालवत् ग्रथिताः अङ्गुलयः यस्मिन् स तथोक्तः (बहुव्रीहि समास)

अलक्ष्यपत्रान्तरम्- अलक्ष्याणि पत्रान्तराणि यस्मिन् तत् (बहुव्रीहि समास)

मलिनीभवन्ति - मलिन + च्वि (अभूततद्भावे) + भू+ लट्, प्रथम पुरुष, बहुवचन

एवंतर्किणः - एवम् + तर्क + णिच् + णिनि कर्तरि, प्रथमा बहुवचन

वसाना - वस् + शानच् कर्तरि स्त्रियाम्

शुद्धशीला - शुद्धं शीलं यस्याः सा (बहुव्रीहि समास)

असंस्कारपाटलोष्ठपुटम्- असंस्कारेण पाटलः उष्ठपुटः यस्य तत् तादृशम् (बहुव्रीहि समास)

सुतनु- सुष्ठः तनूः यस्याः सा सुतनूः (बहुव्रीहि समास)

प्रत्यादेशव्यलीकम्- प्रत्यादेशेन व्यलीकम् (तृतीया तत्पुरुष समास)

प्रवलतमसाम्- प्रवलं तमः येषां तेषां तादृशानाम् (बहुव्रीहि समास)

पविराधमानः- परि - राध् + शानच्

प्रमृज्य- प्र- मृज् + ल्यप्

विनिवर्तितकर्म - विनिवर्तितं कर्म यस्य तत् (बहुव्रीहि समास)

आत्मबलः आत्मनः भवः जन्म यस्य सः (बहुव्रीहि समास)

जयन्तप्रतिमः - जयन्तेन तुल्यः (अस्वपदविग्रह नित्यसमास)

पौलोमीसदृशी - पौलोम्या सदृशी (तृतीया तत्पुरुष समास)

अपराद्धः - अप - राध् + क्त कर्तरि

चरितार्था- चरितः अर्थः यस्याः सा (बहुव्रीहि समास)

सुलभावकाशा- सुलभः अवकाशः यया सा तथोक्ता (बहुव्रीहि समास)

अनुष्ठितजातकर्मा - अनुष्ठितं जातकर्म यस्य तथाविधः (बहुव्रीहि समास)

शाकुन्तलेयः - शकुन्तला + ढक्, 'स्त्रीभ्यो ढक्'

विड़ौजा- विट् उजः यस्य सः (बहुव्रीहि समास)

प्राज्यवृष्टिः - प्राज्या वृष्टिः यस्मात् सः (बहुव्रीहि समास)

विततयज्ञः - विततः यज्ञाः येन सः (बहुव्रीहि समास)

प्रकृतिहिताय - तादर्थे चतुर्थी

नीललोहितः - नीलश्चासौ लोहितश्चेति (कर्मधारय समास)

१२.६ श्लोकानां संस्कृतव्याख्या

१. दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तिं विधिश्चेति त्रितयं तत्समागतम् ॥ २९॥


श्लोकोऽयम् महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमे अङ्के समुपलभ्यते। रथेन स्वर्गात् प्रत्यावर्तनकाले पथि हेमकूटपर्वत-शिखरे महर्षेः मारीचस्य तपोवनं दूरादेव दृष्ट्वा राजर्षिः दुष्यन्तः तत्रभवतः काश्यपस्य पुण्यदर्शनलाभाय तत्र प्राविशत्। दैवक्रमेण तत्र सर्वदमनम् आश्रित्य शकुन्तलया सह तस्य पुनर्मेलनम् अभवत्। अनन्तरं यदा मारीचम् अभितः सदारापत्यः दुष्यन्तः उपविष्टः अभवत्, तदा एकैकं निर्दिशन् महर्षिः एवं प्रस्तौति स्म।

अहो आनन्दकरम् इदं यत् सपरिवारः राजा तपोवने विराजते। राजा स्वयं विधितुल्यः, शकुन्तला श्रद्धोपमा, पुत्रः सर्वदमनः वित्तसदृशः। श्रद्धा नाम शास्त्रेषु दृढप्रत्ययः, वित्तं यज्ञादिसाधनोपयोगि धनम्, विधिः शास्त्रविहितकर्मानुष्ठानम्। श्रद्धावित्तविधीनां समवाये यथा यज्ञकर्म सुसम्पन्नं भवति, तथा स्त्रीपुत्रपतीनां सम्मेलनात् गृहकार्यं निष्पन्नम् आनन्दकरं च भविष्यति इति मुनेः आशयः॥

२. शापादसि प्रतिहता स्मृतिरोधरुक्षे
भर्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥ ३२॥

श्लोकोऽयं महाकविकालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमे अङ्के समुपलभ्यते। महर्षेः मारीचस्य आश्रमे दुष्यन्तेन सह शकुन्तलायाः पुनर्मेलनात् परं पतिग्रहणाय पुनः शकुन्तलाम् उपदिशन्नाह तत्रभवान् काश्यपः।

दुर्वाससः अभिशापात् चित्तविभ्रमात् शकुन्तला दुष्यन्तेन प्रत्याख्याता आसीत्। दुर्वाससः शापादेव भार्तुर्विकारलाभात् तस्मिन् तव प्रभावः व्यर्थः आसीत्। अधुना तमोबिमुक्ते तस्मिन् अधिकारः अव्यर्थः एव। प्रतिविम्बं यस्य उज्ज्वलता मलसंपर्कात् विनष्टा तस्मिन् मुकुरपृष्ठे न विम्बिता भवति। निर्मले दर्पणतले तस्य विम्बं सुष्पष्टं प्रतिफलति इति भावः। मलपूर्णे दर्पणे यथा प्रतिविम्बं न फलति बिगतमले मुकुरे एब तं सुष्पष्टं दृश्यते। तथा शापप्रतिहतचित्ते दुष्यन्ते शकुन्तलायाः प्रतिकृतीः न हि प्रभावं प्रकाशयितुम् अशक्नोत्। यदा तु असौ शापमुक्तिः तदा एब तस्मिन् अस्याः सुलभावसरः इति भावः॥



अग्रगत्याः निरीक्षणम्

प्रश्न १: मातलि कः ?

.....

प्रश्न २: मारीच-आदितिः के स्तः ?

.....

प्रश्न ३: शकुन्तलायाः मातापितरौ के स्तः ?

.....

प्रश्न ४: शकुन्तलायाः पुत्रस्य नाम किम् ?

.....

प्रश्न ५: इन्द्रस्य मातापितरौ के स्तः ?

.....



१२.७ अध्यायात् किमवगतम्

- अभिज्ञानशाकुन्तलम् इति नाटकस्य सप्तमाङ्कस्य संस्कृतपाठं अवगतम्।
- ग्रन्थस्य असमीयानुवादेन सह परिचितो अभवत्।
- तस्य नाटकस्य सप्तमे अङ्के दुष्यन्तशकुन्तलयोः पुनर्मिलनविषये ज्ञातवान्।
- नाटके महत्त्वपूर्णां श्लोकानां संस्कृतव्याख्या अपि ज्ञातवान्।
- अभिज्ञानशकुन्तलम् इति नाटकं सामञ्जस्यम् इति अपि सः अवगच्छत्।



१२.८ ज्ञानाधिक्यम्

१) टैगोर, रवीन्द्र नाथ (१९७०), प्राचीन साहित्य, कलकत्ता: विश्व-भारती।
२) बसु, देबेन्द्र नाथ, शकुन्तला नाट्य कथा (वंगाबद १३७९), कलकत्ता: सरस्वत पुस्तकालय।
३) शर्मा, थानेश्वर, (२००८), अभिज्ञानशकुन्तलम्-एक सर्वेक्षण, गुवाहाटी: चन्द्र प्रकाश।
४) शर्मा, थानेश्वर, (२००८), संस्कृत साहित्य का इतिहास, गुवाहाटी: चन्द्रप्रकाश।



१२.९ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : इन्द्रस्य सारथि।

प्रश्नः २ उत्तरम् : मारिचः मरिचेः पुत्रः च, अदितिः दक्षस्य पुत्री च, इन्द्रादीनां देवतानां माता।

प्रश्नः ३ उत्तरम् : विश्वामित्रः तथा मेनका (अप्सरा)।

प्रश्नः ४ उत्तरम् : सर्वदमनः तथा भरतः।

प्रश्नः ५ उत्तरम् : कश्यपः च अदितिः।



१२.१० अभ्यासप्रश्नाः

क) वस्तुधर्मी प्रश्नाः: (१० शब्देषु उत्तरं लिखतु)

प्रश्नः १: अभिज्ञानशाकुन्तलम् इति नाटकस्य सप्तमांकस्य पृष्ठभूमिमधिकृत्य टिप्पणी लिखतु।

ख) लघुप्रश्नाः (१५० शब्देषु उत्तरं लिखतु)

प्रश्नः १: अभिज्ञानशाकुन्तलम् नाटकस्य सप्तमे अङ्के वर्णित नायक-नायिकयोः पुनर्मिलनदृश्यं स्वभाषया लिखतु।

ग) रचनाधर्मी प्रश्नाः: (३००-५०० शब्देषु उत्तरं लिखतु)

प्रश्नः १: अभिज्ञानशाकुन्तलम् नाटकस्य सप्तमे अङ्के प्रतिबिम्बितस्य सर्वदमनस्य चरित्रः विश्लेषयताम्।

*** ***** ***

अध्यायः १३ : वेणीसंहारः (भट्टनारायणः, नाटककर्त्ता)

अध्यायस्य संरचना

१३.१ उद्देश्यम्

१३.२ परिचयः

१३.३ भट्टनारायणस्य जीवनवृत्तम्

१३.४ भट्टनारायणस्य समयः

१३.५ भट्टनारायणस्य धार्मिकविश्वासः

१३.६ भट्टनारायणस्य पाण्डित्यम्

१३.७ भट्टनारायणस्य रचनाशैली

१३.८ संस्कृतनाट्यसाहित्ये भट्टनारायणस्य स्थानम्

१३.९ अध्यायस्य असमीया भाषायां सारांशः

१३.१० अध्यायात् किमवगतम्

१३.११ ज्ञानाधिक्यम्

१३.१२ अग्रगत्याः निरूपणम्

१३.१३ अभ्यासप्रश्नाः

१३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान् –

- भट्टनारायणस्य जीवनविषये अधिकं ज्ञातुं शक्नोति।
- भट्टनारायणस्य कृतिविषये ज्ञातुं शक्नोति।
- नाट्यकारभट्टनारायणस्य रचनाशैलीविषये अधिकं ज्ञातुं शक्नोति।
- संस्कृतनाट्यसाहित्ये भट्टनारायणस्य स्थान विषये ज्ञास्यत्ति।

१३.२ परिचयः

भवान् पूर्वाध्याये कालिदासविरचितस्य अभिज्ञानशाकुन्तलनाटकेन सह परिचितः अभवत्। अधुना अस्मिन् अध्याये भट्टनारायणविरचितस्य वेणीसंहारनाटकेन सह तथा च मुख्यरूपेण भट्टनारायनेन सह परिचितः भवति। संस्कृतनाट्यसाहित्यं नितान्तं सुसमृद्धमस्ति। अत्र भास-कालिदास- शूद्रक-विशाखदत्त -भवभूति – हर्षवर्धनादीनां नाट्यकाराणां नाटकस्य दीर्घा शृंखला विराजते। संस्कृतनाट्यसाहित्ये भट्टनारायणस्य एकं सुविशेषं स्थानं वर्तते। तस्य एका एव कृतिः विद्यते। वेणीसंहारनाटकं तस्य एका एव कृतिः अस्ति। भट्टनारायणस्य जीवनविषये किञ्चिद्रुपेण ज्ञायते। नाटके अपि नाट्यकारः स्वविषये स्पष्टतया किमपि न लिखितवान्। संस्कृतकवीनां

कालनिर्धारणम् एकं कठिनं कार्यम् अस्ति। भट्टनारायणः स्वकालविषये किमपि न उक्तवान्। परन्तु आन्तरिक –वाह्य – साध्याधारेण शोधकर्तृभिः पण्डितैः वा नाटककारस्य विविधानि तथ्यानि प्रकाशितानि सन्ति। अस्मिन् अध्याये भवन्तः नाट्यकारस्य प्रादुर्भावतिथिं, जीवनवृत्तं, पाण्डित्यं च ज्ञास्यन्ति।

१३.३ नाट्यकार भट्टनारायणस्य जीवनवृत्तम्

आलोचितस्य अध्यायस्य परिचयस्य अनन्तरं भवन्तः इदानीं भट्टनारायणस्य जीवनविषये ज्ञास्यन्ति। इदमत्रोल्लेखनीयं यत् संस्कृतकवयः स्वविषये अधिकं न लिखन्ति अतः तेषां विषये अधिकं तथ्यं नोपलभ्यते। सप्तमसताब्द्याः कविबाणभट्टं विहाय अन्यसंस्कृतकवयः स्वग्रन्थेषु स्वविषये प्रायः किमपि न वदन्ति। अतः कवीनां जीवनवृत्तान्तं तथैव ज्ञातुं न सम्थवति। भट्टनारायणस्य कदा कुत्र जन्म अभवत् इत्यस्मिन् विषये समालोचकेषु मतनैक्यं दृश्यते। भट्टनारायणः स्वविषये वेणीसंहारनाटके किमपि न उल्लिखितवान्। आन्तरिकबाह्यप्रमाणसहायेन भट्टनारायणस्य विषये ज्ञातुं शक्यते यत् सः मृगराजलक्षमकविःआसीत्। नाटकस्य प्रस्तावनायां तेन कथ्यते- 'यदिहं कवर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिं वेणीसंहारं नाम नाटकं प्रयोक्तुमुद्यता वयम्।' एतत् शीर्षकं विहाय तस्य विषये अधिका सूचना नास्ति। अत्र मृगराजशब्दस्य अर्थः सिंहः अथवा चन्द्रः इत्यस्मिन् विषयेऽपि स्पष्टता नास्ति। तस्य अपरेकः उपाधिः वर्तते निशानारायण इति। यतो हि तेन रात्रेः वर्णना अति सुंन्दररूपेण दीयते।

बङ्गप्रदेशस्य शासकानां विषये संस्कृतभाषायां निबद्धाः काश्चन वंशावल्यः प्राप्युते। क्षीतिशवंशावल्यानुसारं भट्टनारायणः मूलतः कान्यकुब्जस्य अथवा कनौजस्य निवासी आसीत्। पश्चात् स बङ्गदेशे निवसति स्म। राज्ञः आदिशूरस्य विशेषानुरोधेन शाण्डिल्यगोत्रीयः भट्टनारायणः कान्यकुब्जज्ञः चतुर्णां ब्राह्मणानां नेतृत्वे बङ्गदेशे आगतवान्। राजादिशूरः तस्मैः कतिपयान् ग्रामान् उपहाररूपेण प्रदत्तवान्। भहनारायणः स्वस्य सम्पत्तेः विस्तारं कृत्वा आधिपत्यं स्थापितवान्। काल-क्रमेण स सम्राजस्य संस्थापकः अभवत्। आदिशुरस्य भट्टनारायणाय पञ्चग्रामदानविषयः महाभारतस्य वेणीसंहारस्य च घटनया सह सर्वथा सङ्गतिः अस्ति। अस्मिन विषये गजेन्द्रगजकरः तस्य वेणीसंहारनाटकस्य भूमिकायाम् ऐतिहासिक Grill महोदयस्य मतं एवं प्रकारेण स्थापयति-

"The number of these villages, according to the chronicles, was five, Grill thinks that the bestowal of these five villages surprisingly agress with the demand for the same number of villages made by yudhisthira. He therefore holds that the episode of the five villages proves that the Bhattanarayana of the chronicles was identical with the author of Venisamhara."

बङ्गप्रदेशे प्रचलितपरम्परानुसारं भट्टनारायणः बङ्गशासकेन आदियूरेण आमन्त्रितासु

पञ्चबाहमणेषु अन्यतमः आसीत्। आदिशुरः किमर्थं भट्टनारायणम् आहुतवान्? अस्मिन् विषये कभाद्वयं प्रचतितमस्ति-

१. आदिशूरः कमपि यज्ञं कर्तुं वाञ्छति स्म, परन्तु सः शूद्रः आसीत् अतः बङ्गदेशीयाः ब्राहमणाः तस्य विरोधं कृतवन्तः। तदा आदिशूरः कान्यकुब्जतः पञ्चब्राह्मणान् आहूतवान्। तेषु पञ्चसु अन्यतमः आसीत् महाकविभट्टनारायणः।


२. एकदा आदिशूरस्य राज्ये अवृष्टिः जाता, तदा अवृष्टेः निवारणार्थम् आदिशूरः कान्यकुब्जात् पञ्चब्राह्मणान् यज्ञं कारयितुम् आहुतवान्। तेषु अन्यतमः आसीत् भट्टनारायणः इति अपरा कथा अस्ति।

अन्यकथानुसारं कान्यकुब्जतः ये ब्राह्मणाः बङ्गप्रदेशे आगतवन्तः ते सारस्वतशाखायाः ब्राह्मणाः आसन्। ते बङ्गप्रदेशे गौड़सारस्वतनाम्ना परिचिताः अभवन्। भट्टनारायणः गौड़सारस्वत शाखायाः नेता आसीत्। प्रायः प्रत्येकग्रन्थे दृश्यते यत् कान्यकुब्जात् बङ्गदेशं प्रति ये पञ्चब्राह्मणाः आगतवन्तः तेषु मुख्योऽस्ति भट्टनारायणः।

भट्टनारायण सम्बन्धीया अतन्या एका कथा प्रचलिता अस्ति यत् - कान्यकुब्जे बौद्धधर्मस्य प्रभावः अतीव प्रबलःआसीत्। तत्र ब्राह्मणाः स्ववैदिकधर्मस्य पालनं कर्तुम् असमर्थाः आसन्। वैदिकधर्मः मुख्यतया संस्कारात्मकः आसीत्। बौद्धधर्मस्य तु मूलसिद्धान्ताः अहिंसा, अहत्या चेत्यादयः आसन्। परन्तु बङ्गदेशः ब्राह्मणधर्मस्य यज्ञकर्माणां च मूलक्षेत्ररूपेण परिचितः आसीत्। अतः कान्यकुब्जे बौद्धानां धार्मिकपीडया पीडिताः ब्राह्मणाः बङ्गदेशे आगतवन्तः।

एतत् सर्वं वृत्तान्तं सत्यं गृहीत्वाऽपि एतत् स्वीकरणे किमपि प्रमाणं नास्ति यत् क्षितीशयवंशावलीचरिते उल्लिखितः भट्टनारायणः एव वेणीसंहारनाटकस्य रचयिता भट्टनारायणः आसीत्। यतः क्षितीशवंशावली चरिते भट्टनारायणस्य कवित्वविषये कोऽपि उल्लेखः नास्ति।

भट्टनारायणः क्षत्रियः अथवा ब्राह्मणः आसीत् इत्यस्मिन् इति विषयेऽपि मतभेदः दृश्यते। भट्टनारायणस्य नाम राजवंशावल्याम् उक्तत्वात् पण्डिताः तं क्षत्रियपुरुषः इति मन्यन्ते। किन्तु अपरे तस्य नान्मा सह भट्टशब्द संयोगात् ब्राह्मण इति आमनन्ति। सः ब्राह्मणः आसीत् इत्यस्मिन् विषये सन्देहः न अवशिष्यते। तस्य प्रथमुदाहारणं भवति तस्य नाम्ना भट्टशब्दस्य संयोगः। द्वितीयोदाहरणमस्ति सः कान्यकुब्जात् आगतेषु पञ्चब्राह्मणेषु अन्यतमः। वेणीसंहारनाटके ब्राह्मणानां प्राशस्त्यवर्णनेन मतत् सिद्धं भवति - 'ब्राह्मणशोणितं खल्वेतत् गलं दहत् प्रविशति' (तृतीयाङ्के) एवमेव कर्णाश्वत्थामयोः वाग्युद्धे (तृतीयाङ्के) अश्वत्थामपक्षे सहृदयानां सद्यनुभूतिः कविना अकृष्टा वर्तते इति तृतीयविन्दुः। वेणीसंहारनाटकस्य प्रस्तावनायां तेन तरिहरयोः स्तुतिः क्रियते। अतः भट्टनारायणः आस्तिकः परम्परावादी शाण्डिल्यगोत्रीमः ब्राह्मणः आसीत्। सः कार्मकाब्जस्य पण्डितः अपि आसीत्।



अग्रगत्याः निरीक्षणम्

प्रश्न १: भट्टनारायणविरचितस्य नाटकस्य नाम किम ?

.....

प्रश्न २: भट्टनारायणेन वेणीसंहारनाटके स्वस्य कृते कः विशेषणः व्यवहृयते ?

.....

प्रश्न ३: वेणीसंहारनाटकस्य प्रस्तावनायां कयोः देवयोः स्तुतिः प्राप्यते ?

.....

प्रश्न ४: भट्टनारायणः कस्य राज्ञः अनुरोधात् कान्यकुब्जतः बङ्गदेशे आगतवान् ?

.....


१३.४ भट्टनारायणस्य समयः

वेणीसंहारनाटकस्य कर्तुः भट्टनारायणस्य कालविषये सुनिश्चित तथ्यं नोपलभ्यते। तस्य कालसम्बन्धे बहिःसाक्ष्यम् उपलभ्यते। अनेके पूर्वपाश्चात्यसमीक्षकाः बहुवर्षेभ्यः एतत् ज्ञातुं प्रयत्नते यत् वेणीसंहारनाटकस्य रचयितुः भट्टनारायणस्य कदा कुत्र जन्म अभवत्। यद्यपि नानापण्डितानां सिद्धान्तेषु सत्यता, यथार्थता विद्यते परन्तु वयं कस्यापि कवेः कालं निर्दिष्टसमये सीमितं कर्तुं न शक्नोमः। अतःवयं कस्यापि कालस्य पूर्वसीमां तथा च अन्तिमसीमां चेष्टां कुर्मः। संस्कृतकवीनां कालनिर्धाणमपि अति दुष्करं कार्यम् अस्ति। अतः Witney महोदयः कथयति - "All dates given in Indian history are pins set up to be bowled down again."

यदि बंङ्गप्रदेशस्य वंशावल्याम् उल्लिखितः भट्टनारायणः तथा च वेणीसंहारनाटकस्य कर्ता एकमेव कल्पते तर्हि नाट्यकारस्य आनुमानिकः कालः अष्टमशताब्द्याः प्रारभः सप्तमशताब्द्याः उत्तरार्धः वा। सः भवभूतेः समकालीनः वर्तते। आदिशूरः सेनवंशस्य प्रतिष्ठापकः अस्ति। आदिशूरः भट्टनारायणं कान्यकुब्जात् आहूतबान्। कानिंगघम् महोदयानुसारं ६५० ईस्वीतः ११०८ ईस्वी पर्यन्तम् आसीत। भट्टनारायणः संस्कृतालङ्कारशास्त्रे सुप्रतिस्थितः अस्ति। संस्कृतकाव्यशास्त्रस्य अनेकेः आचार्यैः वेणीसंहारनाटकस्योदाहरणानि स्वग्रण्ठेषु उद्धृतानि सन्ति। आलंकारिकेषु आचार्य वामनः अन्यतमः आलङ्कारिकः। सः प्रथमतया वेणीसंहारनाटकस्य उद्धृतिः स्वग्रण्ठे काव्यालङ्कारसूत्रवृत्तौ कृतवान्। आचार्यवामनस्य समयः ७५०-८०० ई.। आचार्यानन्दवर्धनाऽपिवेणीसंहारस्यश्लोकान् उद्धृतवान्। तस्य समयः ८४०-८७० ई.। दशरुपककारः धनञ्जयः सरस्वतीकन्ठभरणकारः भोजराजश्च वेणीसंहारश्लोकान् उद्धृतवन्तौ एतयोराचार्योः कालः ९५०-१०५० ई. च वर्तते। आचार्यमम्मतेन अपि काव्यप्रकाशे वेणीसंहारश्लोकाः उद्धृताः सन्ति। मम्मटस्य समयः ११०० ई. वर्तते।

एतेन स्पष्टीभवति यत् भट्टनारायणः ८०० ईस्वीतः पूर्वतनीयः कविः आसीत्। एवमेव वानभट्ट (६००-६५०ई.) अपि हर्षचरिते अनेकान् कवीन उल्लिखितवान। परन्तु तेषु भट्टनारायणः

नास्ति। अतः एतत्प्रमाणेन सिद्धयति यत् भट्टनारायनस्य कालः ६५० ईस्वीतः ७५० ईस्वी मध्ये आसीत्।



अग्रगत्याः निरीक्षणम्

प्रश्न ५: 'भट्टनारायणस्य' नाम वंगप्रदेशस्य केन राज्ञः सह संयुक्तमस्ति?

.....

प्रश्न ६: भट्टनारायणस्य वैणीसंहारस्य उद्धृतिः कः आलङ्कारिकः प्रथमतया दत्तवान्?

.....

१३.५ नाट्यकारभट्टनारायणस्य धार्मिकविनासः

अधुना भवान् वैणीसंहारनाटके वर्णितस्य भट्टनारायणस्य धार्मिकविश्वासविषये ज्ञातुं शक्नोति। पूर्वे वयं ज्ञातवन्तः यत् भट्टनारायणः शाण्डिल्यगोत्रीयः ब्राहमणः आसीत् तथा च कर्मकाण्डादीनां ज्ञाता आसीत्। भट्टनारायणस्य आस्था कस्मिन् धर्मे वर्तते इत्यस्मिन विषयेऽपि पण्डितेषु आलोचना दृश्यते। वेणीसंहारशीर्षकनाटके त्रयः नान्दीश्लोकाः प्राप्यन्ते। किन्तु श्लोकेषु श्लोकद्वये विष्णुः उपासना भट्टनारायणेन कृता तथा च अपरे श्लोके शिवस्य स्तुतिः तेन कृता। यथा–

निषिद्धैरप्येभिलुलितमकरन्दो मधुकरैः
करैरिन्दोरन्तश्छुरित इव संभिन्नमुकुलः।
विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः
प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम्॥ १.१॥
कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं
गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम्।
तत्पादप्रतिमान्निवेशितपदस्योद्भूतरोमोद्गते–
रक्षुण्णोऽनुनयः प्रसन्नयितान्दृष्टस्य पुष्णात वः॥ २.२॥

एषः श्लोकं महादेवं प्रति–

दृष्टः सप्रेम देव्या किमिदमिति भयात्सम्भ्रमाच्चासुरीभिः
शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितञ्च।
आकृष्यास्त्रं सगर्वैरुपशमितवधूसम्भ्रमैदत्यवीरैः
सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान्॥ ३॥

भगवन्तं विष्णुं प्रति भट्टनारायणस्य श्रद्धा द्रष्टुं शक्नुमः। सः विष्णुभक्तः आसीत् इति मन्यते। भट्टनारायणः यादवस्य नेतारं श्रीकृष्णं वारम्बार विष्णो अवतारूपेण प्रतिस्थापयति। केचन जनाः भट्टनारायणं शेवसम्प्रदायस्य समर्थक रूपेण स्वीकुर्वन्ति। परन्तु अस्मिन् विषये

अधिकतथ्यं नोपलभ्यते। अतः भट्टनारायणं वैष्णवसम्प्रदायस्य समर्थक इति कथनं युक्तिपूर्णः अस्ति। वेणीसंहारे अनेके श्लोकाः सन्ति ये साक्ष्यं ददाति यत् भट्टनारायणः वैष्णववादी आसीत्। यद्यपि भट्टनारायणः वैष्णव तथापि सः वौष्णवसम्प्रदास्य पञ्चरात्रशास्नायाः अनुगामी आसीत्। महाभारतस्य शान्तिपर्वे अस्याः शाखायाः उल्लेखः प्राप्यते।

भट्टनारायणः एकः महान् दार्शनिकः आसीत्। सः सम्थवतः अद्वैतसम्प्रदायस्य अनुगामी आसीत्। वेणीसंहारनाटकस्य षष्ठाङ्के अद्वैतवादी नाटयकारस्य परिचयः प्राप्यते-

'भवतु भगवन् भक्तिदैवं विना पुरुषोत्तमे।'

पुनश्च-

गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।

अनया उक्त्या स्पष्टं भवति यत् भट्टनारायणः सगुणवादी आसीत्। ईश्वरभक्त्या आमत्यागेन च मोक्षः प्राप्यते इति तस्य मतमस्ति। भट्टनारायणः दैवं विश्वासयति स्म। भट्टनारयणः जीवनस्य दुर्भाग्यनिवारणाय पूजा-अर्चनादियः ईश्वरीयतत्वानि मन्यते। द्वितीय अङ्कस्य भानुमत्याः घटना तस्य स्पष्टंप्रमाणमस्ति। भानुमती एकः अशुभः श्वप्नः दृष्टवती तत् निवारणाय सा पूजां कृतवती। लोकान्तरस्य अस्तित्वां भट्टनारायणः मन्यते। द्रोणाचार्यस्य मृत्यौः पश्चात् अश्वत्थम्नो विलापेन तत् प्रकाश्यते। भट्टनारायणः पुरुषार्थवादी भाग्यवादी च। यथा -

'देवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।'


एम्. कृष्णमाचारियारमतानुसारं धर्मक्रीतेः रुपावतारग्रन्थस्य 'नीवी' टीकायाम् उल्लेखितोऽस्ति यत् भट्टनारायणः बौद्धधर्मस्य ग्रहणं कृतवान्। बौद्धधर्मस्य ज्ञानं प्राप्य सः धर्मकीर्तिं पराजितवान्। रूपावतारग्रन्थः धर्मकीर्तिभट्टनारायणयोः संयुक्तकीर्तिः अस्ति।

भट्टनारायणः वेदवेदाङ्गरामायणमहाभारतादिभिः शास्त्रेभिः प्रभावितः आसीत्। इतोऽपि सः भोगवादिनः चार्वाकदर्शनस्य उपहासं करोति स्म। एवं प्रकारेण वेणीसंहारनाटकात् भट्टनारायणस्य धार्मिकविश्वासस्य परिचयः प्राप्यते।



ज्ञातव्यम्

पञ्चरात्रम् - पञ्चरात्रं वैष्णवधर्मस्य एकः भागः अस्ति। अपिच इदम् एकम् दर्शनमस्ति। पञ्चरात्र दर्शनं परवर्तीसमये भागवतपरम्परया सह संमिलितो भवति। वैष्णवधर्मस्य विवर्तनः तथा च क्रमविकासे अस्य प्रभावो विद्यते। पञ्चरात्रदर्शस्प अनेक-आगम ग्रन्थाः उपलब्ध्या सन्ति। नारायणः तथा च नारायणस्य अवतारवादस्य दार्शनिकतत्वन्पाञ्चैरिव पञ्चरात्रदर्शस्य मुलविषयोऽस्ति। द्वेतदर्शने, रामानुजदर्शन अस्य प्रभाव दर्शनीयः।



अग्रगत्याः निरीक्षणम्

प्रश्न ७: वेणीसंहारस्य नान्दीश्लोके कस्य देवस्य स्तुतिः क्रियते ?

.....

प्रश्न ८: पञ्चरात्रदर्शनस्य मूलोपास्यदेवः कः ?

.....

१३.६ भट्टनारायणस्य पाण्डित्यम.

भट्टनारायणस्य पाण्डित्यस्य बहुनि उदाहरणानि वेणीसंहारनाटके उपलभन्ते। वेणीसंहारनाटकम् भट्टनारायणस्य एका एव कृतिः अस्ति। अस्य नाटकस्य आधारो भवति महाभारतम्। सः महाभारतस्य कथांशः आश्रित्य तस्य परिवर्धितं परिवर्तनं च कृत्वा एनं नाटकम् अरचयत्। नाट्यकारः योगसांख्यवेदान्तादिनां दर्शनानां सुविज्ञः पन्दितः आसीत्। दर्शनशास्त्राणां तत्वभिः सह सुपरिचितः आसीत् भट्टनारायणः। वेदव्यासप्रणीतस्य महाभारतस्य उद्योगपर्वतः शान्तिपर्वपर्यन्तां कथामाश्रित्य तेन वेणीसंहारनाटक लिखितं वर्तते। अनेन ज्ञायते यत् भट्टनारायणः शतसाहस्त्रीसंहितायाः सम्पूर्णआध्ययन कृत्वा सामाजिकानां कृते संक्षिप्तरूपेण महाभारतस्य कथावस्तुनं प्राप्नोत्ति। परन्तु कतिपय स्थानेषु कविना नवीना कल्पना कृता यथा–

१. द्वितीयाडके उल्लिखितः भानुमत्याः स्वप्नदर्शनं मूलमहाभारते नास्ति।
२. महाभारते कर्णआश्वत्थामयोः वाक्कलहः द्रोणमृत्योः पूर्वमेव भवति, परन्तु वेणीसंहारनाटके अयं कलहः द्रोणमृत्योः पश्चाद् भवति।
३. मूलमहाभारते भीमसेनस्य प्रतिज्ञा न दृष्टा।
४. चार्वाकराक्षस्य कथा महाभारते नास्ति।
५. महाभारते जलाशयमध्ये स्थित दुर्योधन मधराज युधिष्ठिरः युद्धार्थम् आह्वयति, परन्तु वेणीसंहारनाटके चेटी, राक्षसमिथुनम् इत्यादीनि पात्राण्यपि काल्पनिकानि सन्ति।

अर्थनीतिः तथा च राजनीति विषयेऽपि महाकवेः पाण्डित्यं विद्यते। षष्ठे अङ्के युधिष्ठिरः दुर्योधनम् अन्वेष्टुं स्पष्ट औजपूर्णवचनेन च निर्देशम् अददत् –

पङ्के वा सैकते सुनिभूतपदवीवेदिनो यान्तु वाशाः।
कक्षेषु क्षुण्णवीकन्निचयपश्चिया बल्लवाः संचरन्तु।
नागव्याध्रातवीषु श्वपचपुरविदो ये च रन्ध्रेष्वभिज्ञा
ये सिद्धव्यञ्जना वा प्रविमुनिनिलयं ते च चाराश्चरन्तु॥

पूर्वे उल्लीख्यते यत् भट्टनारायणः भारतीयदर्शनेन सह सुपरिचितः आसीत्। निम्नलिखितश्लोकेन एतत् स्पष्ट भवति यत् सः योगदर्शनस्य ज्ञाता आसीत् –

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रत्ययः सत्त्वनिष्ठाः।

यं वीक्षन्ते कमपि तमसां ज्योतिषं वा परस्ता –

त्त्वं मोहान्धः कथमयममुं वेत्तु देवं पुराणम्।।

अनेन भगवतः श्रीकृष्णस्य स्वरूप तथा चदुर्योधनस्य अज्ञता भट्टनारायणेन प्रकाश्यते। नाटयकारः मीमांसादर्शनस्य कर्मकाण्डविषयम् एवम् उपस्थापितवान् –

चत्वारो वयमृत्विजः स भगवान्कर्मोपदेष्टा हरिः।

संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता।

कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं

राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः।।

अनेन मीमांसादर्शनस्य ज्ञानं स्पष्टं क्रियते। षष्ठाडके श्रीकृष्णयुधिष्ठिरयोः वार्तालापेन सांख्यदर्शनस्य प्रतिफलन भवति। यथा–

कृतगुरुमहदादिक्षोभसंभूतभूतिं

गुणिनमुदयाशस्थानहेतुं प्रजानाम्।

अजराममरमचिन्त्यं चिन्तयित्वाऽपि न त्वां

भवति जगति दुःखी किं पुनर्देवं दृष्ट्वा।। ४३।।

वेणीसंहारनाटक विहाय भट्टनारायणस्य अन्याः कृतयः सन्तीति पण्डितानां मतः, परन्तु इदानीं ताः नोपलभ्यन्ते। सुभाषितसंग्रहेपि भट्टनारायणविरचितस्य अनेकाः श्लोकाः प्राप्यन्ते।

नाट्यकारः भट्टनारायणः नाट्यशास्त्रस्य गभीराध्ययन कृत्वा वैणीसंहारनाटकस्य रचनां कृतवान्। अतः परवर्तीकाल नाट्यशास्त्रस्य लेखकाः नाटकस्य भिन्नाङ्गानाम् उदाहरणरूपेण वेणीसंहारनाटकस्य उद्धृतवन्तः। अनेन नाट्यकारस्य पाण्डित्यं प्रकाश्यते।

१३.७ नाट्यकारभट्टनारायणस्य रचना शैली

भट्टनारायणविरचितं वेणीसंहारनाटकम् एकम् वीररसात्मक नाटकमस्ति। नाटके अस्मिन् षष्ठांकाः सन्ति। इदं उल्लेखनीयं यत् संस्कृतसाहित्येव वीररसात्मकस्य नाटकस्य संख्या अत्यल्पसंख्यका। नाटयशास्त्रीय नियमानुसार नातकस्य मुख्यरसः शृङ्गार वीरः वा भवनीयः। परन्तु प्रायशः शृंगार प्रधाननाकमेव दृश्यते अतः अस्यां दिशि भट्टनारायणस्य वेणीसंहारनाटकस्य स्थानं श्रेष्ठतममस्ति। वेणीसंहारे प्रयुक्ता भाषा अस्ति गौडीरित्यात्मिका भाषा। यथोक्तम् चन्द्रशेखरपाण्डेमहाभागेन संस्कृतसाहित्यस्य रूपरेखायाम् –

ओजः संसूचकैः शब्दैः युद्धोत्साहसप्रकाशक।

वेण्यामुजृम्भयन् गौड़ीं भट्टनारायणो बभौ॥

यथा –

यो यः शस्त्रं बिभर्ति स्वभुजगुरूमदः पाण्डवीनां चमूनां

यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।

यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः

क्रोधान्धस्तस्य तस्य स्वयमर्पि जगतामन्तकस्यान्तकोऽहम्।। ३/३२॥

भट्टनारायणेन गौड़ीरीत्या वैणीसंहारं रचितम, परन्तु सः तस्मिन् रीत्यामेव न सिमीतः आसीत्। वैदर्भीरीते सरलवैशिष्टयानि अपि भट्टनारयणस्य रचनायां दृश्यते। भट्टनारायणस्य रचनाशैलीविषये Wilson महोदयः सानन्देन एवं कथ्यते- 'Rather powerful than polished'. वेणीसंहारनाटकस्य गोड़ीरीतेः उदाहरणम् अस्ति

चञ्चदभुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरूयुगलस्य सुयोधनस्य।
स्त्यानापविद्धधनशोणित शोणपाणि-
रक्तं सयिष्यति कचांस्तव देवि भीमः॥ (वे.सं-१/२१)

M. R. Kale महोदयः अस्य नाटकस्य प्रशंसा कृत्वा एवं कथ्यते-

"On the whole Venisamhara will be found to have many attractions for the general reader. As regards its dramatic construction it has been as often drawn upon as the Ratnavali for illustration by the writers on dramaturgy."

अस्य नाटकस्य गद्यभागेष्वपि भावानुरूपिणी विषयानूरूपिणी भाषा प्रयुक्ता अस्ति। अस्य संवादाः अतीवसरलानि वर्तन्ते। यथा -

काञ्चुकी - देव भग्नम, भग्नम!

राजा - केन ?

काञ्चुकी-भीमेन

राजा - कस्य

कस्य - भवतः

राजा -आः, किं प्रलपसि।

भानुमती- आर्ये किमनिष्टं मन्त्रयसे ?

राजा -धिक् प्रलापिन्, वृद्धाप्रसद, कोऽयमद्य तेन्यामोहः ?

काञ्चुकी- देव, न खलु कश्चिद् सत्यमेव ब्रवीमि (द्वितीयांकः)

नाटकेऽस्मिन् छन्दसां सम्यक् प्रयोगो दृश्यते। अत मन्दाक्रान्ता हरिणी दूतबिलम्बितादिनां छन्दसां यथाप्रयोगे भवति।

वेणीसंहारनाटकस्य रचना सरलः बोधगम्यः प्रसाद गुण युक्तः च। भट्टनारायणस्य रचनायाः अपरं लक्षणमस्ति काकुवक्रोक्ते प्रयोगः।


उदाहरणं यथा-

मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिवाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू

सन्धिं करोतु भवतां नृपतिः पणेन। (वे.सं १/१५)

शब्दानां समुचितचयनं, शब्दार्थयोः संयोजनं, देश-काल-पात्र विशेषेशब्दस्य प्रयोगं, गीतिमयछन्दसां व्यवहारं च भट्टनारायणस्य रचनाशैलेः प्रधानं वैशिष्ट्यमस्ति।

अन्तिमे वक्तुं शक्यते यत् वेणीसंहारनातकम् एकं आदशपूर्णनाटकमस्ति। अत्र नाट्यशास्त्रीयनियमाः यथारीतिः अनुसृयते।



अग्रगत्याः निरीक्षणम्

प्रश्न ९: वेणीसंहारनाटकस्य प्रधानरसः कः ?

.....

प्रश्न १०: वेणीसंहारनाटके कस्य रीतेः प्रयोगोभवति ?

.....

१३.८ संस्कृतनाट्यकारेषु भट्टनारायणस्य स्थानम्

अधुना भवान् संस्कृतनाटयकारैः सह भट्टनारायणस्य तुलनात्मका अध्ययनस्य विषये पठितुम् अर्हति।


भट्टनारायणः एकः कुशलः सुकविः नाट्यकारश्चः अस्ति। सः संस्कृत-नाट्यकारेषु एकं श्रेष्ठं स्थानम् अधिकरोति। नाटकीय संरचना, रसप्रयोगः, चरित्र-चित्रणम् इत्यादिषु विषयेषु सः अन्यनाट्यकारात् पृथक् वर्तते। विषयवस्तुसंग्रहः, नाट्यकारस्य अस्य विषयवस्तुसंग्रहः, नाटकस्य नामकरणं च प्रशंसनीयमस्ति।

संस्कृतनाट्यसाहित्ये अन्ये कवयः महाभारतमाश्रित्य नाटकानि विरचितवन्तः। यद्यपि भट्टनारायणस्य अपि आधारः महाभारतं तथापि तत्र तस्य स्वकीयता विराजते। विशालकायस्य महाभारतस्य समग्रघटना एकस्मिन् नाटके विन्यासः सरल दुस्साध्योऽस्ति।

भट्टनारायणः आलङ्कारिकाणां प्रियः अस्ति। अतः प्राप्यः सर्वैः आलंकारिकैः वेणीसंहारस्य उदाहरणानि उद्धृतानि सन्ति। सम्पूर्णवेणीसंहारनाटकस्य मुख्यरसः वीरः अस्ति। प्रकाशार्थे वीररसस्य सः भीमसेनं धीरोद्धात्त नायकरूपेण चित्रयति। धीरोद्धत्तनायकस्य प्रयोगः नाटये सर्वदा द्रष्टुं शक्यते। अतः भट्टनारायणः अतुलनीयः नाट्यकारः अस्ति।

वेणीसंहारनाटकस्य नायकः कः इत्यस्मिन् विषये पण्डितानां मतभेदः दृश्यते। भट्टनारायणः कमपि पुरुषचरित्रं मुख्यनायकरूणेण न चित्रयति। अस्मिन् विषये तं समालोचकाः समालोच्यन्ते। भवभूतिः इव सः संस्कृते तथा प्राकृते दीर्घसमासवद्धपदस्य व्यव्यहारं कृतवान्।

अतः नाटकमिदं किञ्चिद् भिन्नमस्ति। नाट्यशास्त्रीय-परम्परातः किञ्चित् अग्रे गत्वा नाट्यकारेण नाटकमिदं विरचितम्। समस्तविषयं पर्यालोचनं कृत्वा वक्तुं शक्यते यत् भट्टनारायणः एकः श्रेष्ठनाट्यकारः अस्ति। अतः संस्कृत नाट्यकारेषु भट्टनारायण नाम उज्ज्वलज्योतिष्क इव विराजते।



अग्रगत्याः निरीक्षणम्

प्रश्न ११: वेणीसंहारनाटकस्यः उत्सः कः ?

.....

प्रश्न १२: वेणीसंहारनाटकम् आलंकारिकाणां / वैयाकरणानां प्रियः ?

.....

१३.९ अध्यायस्य असमीया भाषायां सारांशः

আপুনি এই অধ্যায়ত ভট্টনাৰায়ণৰ জীৱনসম্পর্কে তেওঁৰ কাল সম্পর্কে তথা তেওঁৰ একমাত্র কৃতি বেণীসংহাৰ নাটক সম্পর্কে অৱগত হ'ব।

সংস্কৃত সাহিত্যত ভট্টনাৰায়ণৰ এক বিশেষ স্থান আছে। মহাভাৰত আশ্রিত বেণীসংহাৰ নাটকখন তেওঁৰ একমাত্র কৃতি হিচাপে পণ্ডিতসকলে মত পোষন কৰি আহিছে। ভট্টনাৰায়ণৰ জীৱনৰ বিষয়ে কোনো সঠিক তথ্য উপলব্ধ নহয়। বংগদেশত প্রচলিত পৰম্পৰা মতে-ভট্টনাৰায়ণ বংগদেশৰ শাসক আদিশূৰে কনৌজৰ পৰা আমন্ত্রণ কৰি অনা পাঁচগৰাকী গৌড় ব্রাহ্মণৰ এগৰাকী। মহাৰাজ আদিশূৰে ভট্টনাৰায়ণক সন্মানৰ সৈতে পাঁচখন গাঁও প্রদান কৰিছিল। পৰৱর্তী কালত ভট্টনাৰায়ণ সেই গাঁওকেইখনৰ অধিপতি হৈ পৰিছিল। বংগদেশৰ ৰাজবংশাৱলীত এই কথা উপলব্ধ হয়। ভট্টনাৰায়ণে বেণীসংহাৰ নাটকৰ প্রস্তাৱনাত 'মৃগৰাজ' উপাধি ব্যবহাৰ কৰি নিজৰ পৰিচয় দাঙি ধৰিছে। ভট্টনাৰায়ণ এজন শাণ্ডিল্য গোত্রীয় ব্রাহ্মণ। কিন্তু বহুতো সমালোচকে তেওঁক ক্ষত্রিয় মত প্রদান কৰে। সংস্কৃত কবিসকলৰ কাল নির্ণয় কৰা অতি কঠিন কাম। কিয়নো এই কবিসকলে নিজৰ কালসম্পর্কে কোনো ইংগিত প্রদান কৰা নাই। ঠিক একেদৰে বেণীসংহাৰ নাটকৰ ৰচয়িতা ভট্টনাৰায়ণেও নিজৰ কাল সম্পর্কে কোনো তথ্য প্রদান কৰা নাই। ৰাজবংশাৱলীত উল্লিখিত ভট্টনাৰায়ণ আৰু বেণীসংহাৰ নাটকৰ ৰচয়িতা একেগৰাকীয়েই যদি ধৰা হয়, তেন্তে নাট্যকাৰগৰাকীৰ কাল ভৱভূতিৰ সমসাময়িক অষ্টম শতাব্দীৰ আৰম্ভণি বা সপ্তম শতাব্দীৰ শেষ বুলি গ্রহণ কৰিব পাৰি। ভট্টনাৰায়ণ আলংকাৰিকসকলৰ প্রিয় আছিল। আচার্য বামনে পোন-প্রথমে ভট্টনাৰায়নৰ বেণীসংহাৰ নাটকৰ উল্লেখ কৰিছিল। আচার্য্য ধনঞ্জয় ভোজৰাজ আৰু মম্মটেও ভট্টনাৰায়ণৰ বেনীসংহাৰৰ পৰা উদ্ধৃতি দিছিল। এই সকলোবোৰ বিচাৰ কৰি চালে দেখা যায় যে ভট্টনাৰায়ণ সপ্তম শতিকাৰ শেষৰ ভাগৰ আৰু অষ্টম শতিকাৰ আদি ভাগৰ নাট্যকাৰ।

ভট্টনাৰায়ন এজন ধার্মিক কবি আছিল সেই কথা নাটকখনৰ জৰিয়তে প্রকাশ পাইছে। নান্দীশ্লোকত কবিয়ে বিষ্ণু আৰু শিৱৰ উপাসনা কৰিছে আৰু ভট্টনাৰায়ন এজন বৈষ্ণৱধর্মৰ অনুগামী আছিল। তেওঁ যাদবসকলৰ নেতা ভগৱান শ্রীকৃষ্ণক সঘনাই নাৰায়নৰ অৱতাৰ বুলি উল্লেখ কৰিছে। ইয়াৰ উপৰিও ভট্টনাৰায়ণে ভোগবাদী চার্বাকদর্শনৰ উপহাস কৰিছে। গতিকে ইয়াৰ পৰা গম পোৱা যায় যে ভট্টনাৰায়ণ এজন ধার্মিক লোক আছিল।

বেণীসংহাৰ নাটকে ভট্টনাৰায়নৰ পাণ্ডিত্যৰ পৰিচয় দিছে। প্রাচীন পৰম্পৰা অনুসৰি

ভট্টনাৰায়ণ সর্বশাস্ত্রবিদ আছিল। নাটকখনৰ কাহিনীভাগ বেদব্যাস প্রণীত মহাভাৰতৰ পৰা লোৱা হৈছে গতিকে তেওঁ মহাভাৰতৰ অধ্যয়ন অতি ত্রুটিপূর্ণভাৱে কৰিছিল। তেওঁ মহাভাৰতৰ কাহিনীভাগক নাটকীয়ৰূপ প্রদান কৰাৰ বাবে মূল কাহিনীত কিছুমান নতুন নতুন কথাৰ সংযোজন কৰিছিল। ভট্টনাৰায়ণ এজন দার্শনিকো আছিল। তেওঁ সাংখ্য, যোগ, মীমাংসাদি দর্শনৰ জ্ঞাতা আছিল। বৈদিক যাগ-যজ্ঞ আৰু লৌকিক কর্মকাণ্ড আদিতো নাট্যকাৰ পৰিচিত আছিল।

বেণীসংহাৰ নাটক এখন বীৰৰস প্রধান নাটক। নাটকখনৰ দ্বাৰা কবিয়ে সংস্কৃত নাট্য সাহিত্যত এক সুকীয়া স্থান দখল কৰিবলৈ সক্ষম হৈছে। মুঠ ছয়টা অংকৰ সমষ্টিৰ এই নাটকখন ওজঃপূর্ণ। এই নাটকখনৰ ছন্দসমূহো গীতিময়। ইয়াৰ গদ্য অংশও অতি প্রভাৱশালী। ভট্টনাৰায়ণৰ ছন্দ প্রয়োগ, অলংকাৰ প্রয়োগ, ৰস প্রয়োগ অতুলনীয়। নাটকখনৰ প্রতিটো চৰিত্রক অতি নিপুণভাৱে চিত্রিত কৰিছে ।

নাটকখনে নাট্যশাস্ত্রৰ প্রায় বিধিসমূহৰ পালন কৰিছে কিছু ক্ষেত্রত ইয়াৰ ব্যতিক্রমো নোহোৱা নহয়। তথাপিও ভট্টনাৰায়ণৰ বেণীসংহাৰ এখন আদর্শপূর্ণ নাটক। আৰু সংস্কৃত নাট্যজগতত ভট্টনাৰায়ণ এগৰাকী অসামান্য নাট্যকাৰ ।



१३.१० अध्यायात् किमवगतम्

- भट्टनारायणस्य जीवनेन सह परिचितः अभवत्।
- भट्टनारायणस्य कालेन सह परिचितः अभवत्।
- नाट्यकारस्य पाण्डित्यस्य परिचयं प्राप्यते।
- संस्कृतनाट्यकारेषु भट्टनारायणस्य स्थानं परिचयं च प्राप्यते।



१३.११ ज्ञानाधिक्यम्

१) शास्त्री, चि शंकर राम (१९४३), वेणीसंहार, मादाज।
२) काले, एम्. आर (२९७७), वैणीसंहार, दिल्ली।
३) त्रिपाठी, डॉ रामशंकर (२०१०), वेणीसंहार, दिल्ली।
४) रटाते, आचार्य जनार्दन' माधव (२०२२), वैणीसंहारनाटकं, दिल्ली।
५) गजेन्द्रगडकर, ए.बी. (१९२७), बेणीभिसंहार बोम्बई।



१३.१२ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : भट्टनारायणविरचितस्य नाटकस्य नाम भवति वैणीसंहारम्।

प्रश्नः २ उत्तरम् : भट्टनारायणेन स्वस्य कृते वैणीसंहारनाटके मृगराज इति विशेषणः व्यवह्रियते।

प्रश्नः ३ उत्तरम् : विष्णुशिवयोः स्तुतिः प्राप्यते।

प्रश्नः ४ उत्तरम् : भट्टनारायणः राज्ञः आदिशूरस्य अनुरोधान् कान्यकुब्जतः बंगप्रदेशे आगतवान्।

प्रश्नः ५ उत्तरम् : भट्टनारायणस्य नाम बंगप्रदेशस्य आदिसूरेण सह संयुक्तमस्ति।

प्रश्नः ६ उत्तरम् : आचार्यवामनः प्रथमतया वैणीसंहारस्य उद्धृतिः दत्तवान्।

प्रश्नः ७ उत्तरम् : वेणीसंहारस्य प्रथम नान्दिश्लोके विष्णोः स्तुतिः प्राप्यते।

प्रश्नः ८ उत्तरम् : पञ्चरात्रदर्शनस्य मूलोपास्य देवता नारायणः।

प्रश्नः ९ उत्तरम् : वेणीसंहारनाटकस्य प्रधानरसः वीरः।

प्रश्नः १० उत्तरम् : वेणीसंहारे गौडीरीतेः प्रयोगः भवति।

प्रश्नः ११ उत्तरम् : वेणीसंहारनाटकस्य उत्सः महाभारतमस्ति।



१३.१३ अभ्यासप्रश्नाः

क) वस्तुनिष्ठप्रश्नाः (उत्तरं ५० शब्देषु लिखत)।

प्रश्नः १: भट्टनारायणस्य जीवनविषये लिखत।

(ख) लघुप्रश्नः (उत्तरं २५० शब्देषु लिखत)।

प्रश्नः १: नाट्यकारभट्टनारायणस्य पाण्डित्यविषये लिखत।

(ग) निबन्धप्रश्नाः (२००-५०० शब्देषु उत्तराणि लिखन्तु)।

प्रश्नः १: भट्टनारायणस्य रचनाशैलेः वैशिष्ट्यविषये आलोचनां करोतु।

प्रश्नः २: संस्कृतनाट्यकारेषु भट्टनारायणस्य स्थानं निरूपयत।

*** ***** ***

अध्यायः १४ : वेणीसंहारम् — साधारण-आलोचनम्

अध्यायस्य संरचना

१४.१ उद्देश्यम्

१४.२ परिचयः

१४.३ कवेः भट्टनारयणस्य परिचयः

१४.४ वेणीसंहार-नाटकस्य आलोचनम्

१४.५ नाटकस्य रसः

१४.६ नाटकस्य नायकः

१४.७ वेणीसंहारनाटकस्य अङ्कानां सारांशः

१४.८ वेणीसंहारनाटकस्य प्रधानचरित्राणां परिचयः

१४.९ अध्यायात् किमवगतम्

१४.१० ज्ञानाधिक्यम्

१४.११ अभ्यासप्रश्नाः

१४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- नाटकस्य स्वरूपं ज्ञातुं शक्नुवन्ति।
- वेणीसंहारकारस्य परिचयं ज्ञातुं शक्नुवन्ति।
- वेणीसंहारनाटकस्य नायकपरिचयं प्राप्नुवन्ति।
- वेणीसंहारनाटकस्य सारांशं ज्ञातुं शक्नुवन्ति।
- वेणीसंहारनाटकस्य प्रत्येकाङ्कानां परिचयं प्राप्नुवन्ति।
- वेणीसंहारनाटकस्य प्रधानचरित्राणां परिचयं प्राप्तुं शक्नुवन्ति।

१४.२ परिचयः

काव्यस्य स्वरूपदृष्टया द्विविधो भागो वर्तते। तद्यथा - दृश्यकाव्यं श्रव्यकाव्यं च। श्रव्यकाव्यं श्रोतुमेव शक्यते। दृश्यकाव्यं द्रष्टुमपि शक्यते। अर्थात् दृश्यकाव्यम् अभिनयेन प्रदर्शयितुं शक्यते। दृश्यकाव्यस्य अपरं नाम अस्ति रूपकम् इति। यतो हि रूपके नटे अनुकार्यस्य रामादेः स्वरूपस्य आरोपः भवति। विभाजनमिदं प्रस्तुय विश्वनाथकविराजेन साहित्यदर्पणस्य षष्ठपरिच्छेदे उल्लिख्यते यत् --

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्॥ (साहित्यदर्पणः, ६/१)

रूपकस्य दशप्रकाराः सन्ति। तथा हि - नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथिः, प्रहसनम्, च। यथोच्यते विश्वनाथेन-

नाटकमथप्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥ (साहित्यदर्पणः, ६/३)

तथैव अष्टादश उपरूपकाणामपि विभाजनं प्रदर्शयति असौ। तानि यथा - नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका च। यथोच्यते विश्वनाथेन --

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकं च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥
अष्टादश प्राहुरूपरूपकाणि मनीषिणः।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्॥ (साहित्यदर्पणः, ६/४, ५,६)

नाटकस्य लक्षणं विश्वनाथकविराजेन इत्थमुक्तम् --

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासद्धैर्यादिगुणवद्युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ॥
दिव्योऽथ दिव्याऽदिव्यो वा गुणवान्नायको मतः॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तत्र कीर्तितम् ॥ (साहित्यदर्पणः, ६/७-११)


अस्य अयमेव अर्थो यत् नाटकस्य कथावस्तु प्रसिद्धं स्यात्। तत्र मुखं, प्रतिमुखं, गर्भः, विमर्शः, उपसंहृतिः चेति पञ्च सन्धयो स्युः। नाटकं विलासः, समृद्धिः इत्यादिभिः गुणैः तथा बहुविभूतिभिः युक्तं स्यात्। नाटके सुखस्य दुःखस्य च समुद्भवो भवति। विभिन्नाः रसाः अनवरतं प्रकाशिताः स्युः। नाटके पञ्चतः दशसंख्यकपर्यन्तम् अङ्काः स्युः। नाटके नायकः प्रख्यातवंशोत्पन्नः अथवा राजर्षिः स्यात्। सः च नायकः धीरोदात्तगुणोपेतः, प्रतापशाली, देवलोकवासी, मर्त्यलोकवासी अथवा देवः सन्नपि मर्त्यलोकवासी, गुणगणैश्च युक्तः स्यात्। नाटके शृङ्गारवीरयोः कश्चिदेक एवाङ्गी इत्युक्ते मुख्यः रसः स्यात्। अन्ये च हास्यकरुणरौद्रभयानकबीभत्साद्भुतशान्ताः अङ्गत्वेन प्रयुक्ताः स्युः। नाटके निर्वहणसन्धौ अद्भुतरसस्य प्रयोगः करणीयः। नाटके तेषु तेषु प्रमुखकार्येषु

चत्वारः अथवा पञ्च प्रधानपुरुषाः भवन्ति। नाटकीया अङ्काः गोपुच्छाग्र इव क्रमशः बृहतः सुक्ष्मपर्यन्तं बन्धनं अर्थात् निर्माणं कर्तव्यम् ।

१४.३ कवेः भट्टनारयणस्य परिचयः

भट्टनारायणप्रणीते 'वेणीसंहारम्' इत्याख्यस्य नाटकस्य प्रस्तावनायां 'मृगराजलक्ष्मणो भट्टनारायस्य कृति वेणीसंहारं नाम नाटकम्' इति एतावन्मात्रकथनात् अतिरिक्तं स्वविषये सूचनाप्रदाने कविः यथा कार्पण्यत्वं प्रदर्शयति तेन सिद्धयति यत् आन्तरिकसाक्ष्यस्य आधारेण कोऽपि दार्शनिकजिज्ञासुः कवेः भट्टनारायणस्य जीवनवृत्तान्तं विस्तरेण ज्ञातुं न शक्नोति। केवलम् एतावता सूचना वेणीसंहारस्य प्रस्तावनातः प्राप्यते यत् एतत् नाटकं कस्यचित् 'मृगराजलक्ष्म' कवेः भट्टनारायणस्य रचना अस्ति। अयं कविः भट्टनारायणः कः आसीत्, सः स्वजन्मना कं प्रदेशं, कं वंश च अलङ्कृतवान् इत्यादिनि सर्वाणि रहस्यानि इव तिष्ठन्ति, परन्तु कस्यापि कवेः जीवनी कालादिविषये किमपि प्रामाणिकतथ्यावाप्तिहेतोः आन्तरिकसाक्ष्यैः सह बाह्यसाक्ष्यस्य अपि आलोचनं कर्तव्यम्। आन्तरिकप्रमाणाधारेण कविना स्वकार्य्ये कियत् आत्मनः विषये उक्तम् इति दृश्यते। एतदतिरिक्तम् अन्यप्रमाणमाश्रित्य कवेः जीवनवृत्तस्य विषये अपि संकेताः अन्विष्यन्ते, समयः च निर्धारितः भवति, यः बाह्यप्रमाणाधारितः भवति। वस्तुतः प्राप्यते यत् बङ्गप्रदेशस्य राज्ञां विषये संस्कृतभाषायां लिखिताः केचन वंशानुगताः ऐतिहासिकाः लेखाः सन्ति, येषां अध्ययनेन भट्टनारायणस्य विषये काश्चन सूचना प्राप्यते, परन्तु एतत् वक्तुं दुष्करं यत् एतेषु ऐतिहासिकलेखेषु उल्लिखितः भट्टनारायणः वेणीसंहारप्रणेतुः भट्टनारायणात् अभिन्नः अथवा नेति। येषु संस्कृतग्रन्थेषु बङ्गराजानाम् वंशावली प्रस्तुता भवति तेषु 'क्षितिशवंशवलीचरितम्', 'बङ्गराजघटक', 'राजावली' तथा 'दक्षिण-राधियघटककारिका' इत्यादयः प्रमुखाः सन्ति। क्षितिश्वंशवलीचरितानुसारं भट्टनारायणः कान्यकुब्जस्य निवासी आसीत्। सः शाण्डिल्यगोत्रे जातः सारस्वतः ब्राह्मणः आसीत्। तथा च तत्कालीनस्य बङ्गराज्ञः आदिसूरस्य आमन्त्रणेन सः अन्यैः चतुर्भिः ब्राह्मणैः सह कन्नौजतः गत्वा बङ्गादेशे निवसति स्म। आदिसुराभीष्टयज्ञस्य सम्पादनहेतोः आदिसूरः दक्षिणदिशि भट्टनारायणाय पञ्च ग्रामान् दत्तवान्। तदनन्तरं भट्टनारायणस्तत्र निवसति स्म।

भट्टनारायणस्य एकमात्रकृतिरस्ति वेणीसंहारम्। यद्यपि सुभाषितसङ्ग्रहे भट्टनारायणनाम्ना कतिपयाः श्लोकाः उद्धृताः सन्ति, परन्तु ते श्लोकाः वेणीसंहारे न उपलभ्यन्ते, अतः तेषां श्लोकानां रचयिता भट्टनारायणः, वेणीसंहारकर्ता एव अथवा अन्यः कोऽपि भट्टनारायणः आसीत् इत्यस्मिन् विषये स्पष्टं प्रमाणं नोपलभ्यते। प्रो.ए.बी.गजेन्द्रगडकरः भट्टनारायणस्य कृतीनां विषये किञ्चित् प्रकाशितवान् 'द वेणीसंहारः : ए क्रिटिकेल स्टडी' इति स्वपुस्तके। हरिशर्मनाम्ना विदुषा प्रतिलिपिकृतस्य दशकुमारचरितस्य पाण्डुलिप्याः आधारेण असौ भट्टनारायणं दशकुमारचरितस्य पूर्वपीठिकायाः रचयिता इति मन्यते।



अग्रगत्याः निरीक्षणम्

प्रश्नः १. वेणीसंहारस्य प्रतिनायकः कः ?

.....

प्रश्नः २. वेणीसंहारनाटके कति अङ्काः सन्ति ?

.....

प्रश्नः ३. अश्वत्थामा कस्य पुत्र अस्ति ?

.....

प्रश्नः ४. भीमः कीदृशः नायकः अस्ति ?

.....

प्रश्नः ५. वेणीसंहारस्य कथानकः कुतः गृह्यते ?

.....

प्रश्नः ६. मथ्नामि कौरवशतं समरे न कोपात् - एषा उक्तिः कस्य अस्ति ?

.....

प्रश्नः ७. द्रौपद्याः केशवस्त्रकर्षणं केन कृतम् ?

.....

प्रश्नः ८. वेणीसंहारस्य अङ्गीरसः कः ?

.....

१४.३ वेणीसंहार-नाटकस्य आलोचनम्

पूर्वकथा —

हस्तिनापुरस्य राजकुलस्य कौरवः पाण्डवः च राजकुमाराः आसन्। कौरवस्य पिता धृतराष्ट्रः पाण्डवस्य पिता पाण्डुः च आसीत्। पाण्डो असामयिकमृत्युपश्चात् तस्य अन्धभ्राता धृतराष्ट्रः हस्तिनापुरस्य सिंहासने आरुह्यवान्। अतः कौरवपाण्डवराजकुमारयोः मध्ये उत्तराधिकारप्रश्नस्य विषये बाल्यकालात् स्पर्धा, ईर्ष्या च आरब्धा आसीत्। दुर्योधनः कौरवानां मध्ये ज्येष्ठः आसीत् यः पाण्डवान् बलेन, प्रवञ्चनया च राज्यच्युतान् कर्तुम् इच्छति स्म। पाण्डवैः इन्द्रप्रस्थः स्वराजधानी निर्मिता , परन्तु दुर्योधनः स्वस्य धूर्तमातुलस्य शकुनेः साहाय्येन पाण्डवानां ज्येष्ठं युधिष्ठिरं द्यूतक्रीडायां पराजित्य सर्वान् पाण्डवान् द्रौपदीन् च स्वदासान् कृतवान्। न केवलमेतत्, द्रौपद्याः केशवस्त्राणि आकृष्य ऊरौ उपवेशनरूपं दुष्टप्रयासमपि कृतवान्। द्रौपदीकेशवस्त्रकर्षणकार्यं दुर्योधनस्य अनुजदुःशासनेन कृतम्। एवं प्रकारेण पाण्डवानां कुटुम्बानां च अपमानं कृत्वा दुर्योधनः तान् त्रयोदशवर्षाणि यावत् वनवासं दत्तवान्।

वनवासं गच्छन् पाण्डवाः कौरवविहितस्य अपमानस्य प्रतिशोधाय प्रतिज्ञां कृतवन्तः। युधिष्ठिरस्य अनुजः अत्यन्तः शक्तिशाली भीमसेनः प्रतिज्ञां कृतवान् यत् सः दुःशासनस्य वक्षःस्थलं

विदीर्य तस्य रक्तं पास्यति, दुर्योधनस्य ऊरुं च तस्य उग्रगदया: भङ्गं करिष्यति, तस्य रक्तेन च द्रौपद्या: केशान् अलङ्करिष्यति इति। 'वेणीसंहारम्' इति शीर्षकात् स्पष्टं भवति यत् नाटकमिदं द्रौपदी मुक्तकेशानां संयमनप्रसंगेन सह सम्बद्धम् अस्ति। वनवासं पूरयित्वा युधिष्ठिरः श्रीकृष्णं दूतरूपेण दुर्योधनं प्रति सन्धिं प्रयासार्थं प्रेषयति, तत् श्रुत्वा द्रौपदी भीमश्च दुःखं अनुभवतः। प्रतिशोधरूपे अग्नौ प्रज्वलितौ तौ युधिष्ठिरस्य एतत् कर्म अरुचिकरं मन्येते। तौ कौरवेभ्यः अपमानस्य प्रतिशोधं नेतुम् इच्छतः। मूलं नाटकम् इतः एव आरभ्यते।

१४.४ नाटकस्य रसः

भट्टनारायणेन प्रणीतस्य 'वेणीसंहारम्' इति नाटकं नाटकीयतत्त्वदृष्ट्या उत्तमं नाटकं वर्तते। वीररसस्य मुख्यत्वात् अस्मिन् नाटके ओजगुणाः, गौडीयशैली च प्रधानाः सन्ति। वैदर्भी पाञ्चाली च अनेकेषु सन्दर्भेषु प्रयुक्ताः सन्ति। भाषा प्रबला, प्रौढा, परिष्कृता, सरला च अस्ति। अनुप्रासादि-अलङ्कारयोजनायाः दृष्ट्या एषा उत्तमनाट्यरचना अस्ति। वेणीसंहारनाटके आशायाः महत्त्वं सुन्दरतया प्रसादगुणोपेतया शैल्या वर्ण्यते। भीष्मद्रोणकर्णादीनां मृत्योः पश्चात् शल्ये विजयाशा बध्यते। यथोच्यते-

गते भीष्मे हते द्रोणे कर्णे च विनिपातिते।
आशा बलवती राजन् शल्यो जेष्यति पाण्डवान्।।

ओजगुणेन सह प्रसादगुणः मणिकाञ्चनसंयोगं प्रस्तुतं करोति। कर्णस्य प्रसादगुणोपेतवचनेषु कियत् आत्मसम्मानं तेजः च अस्ति! तस्य कथं जन्म दैवगतं पुरुषार्थः च तदधीनः इति सन्दर्भे निम्नोक्तश्लोकः द्रष्टव्यः —

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।।

कविना माधुर्यगुणस्य अपि सुन्दरं प्रयोगं कृतम् अस्ति। भानुमतीं प्रति दुर्योधनवचनेषु ध्वन्यात्मकता, संगीतात्मकता, लयात्मकनृत्यस्य च चित्रं चित्र्यते। यथा त्वं मन्दं गच्छसि, मा कम्पयसि, माम् आलिङ्गयसि।

कुरु घनोरु पदानि शनैः शनैरयि विमुंच गतिं परिवेपिनीम्।
सुतनु बाहुलतोपरिबन्धनं मम निपीड्य गाढमुरःस्थलम्।।

रससन्दर्भे साहित्यदर्पणकारस्य विश्वनाथकविराजस्य मतानुसारम् —

एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यं निर्वहणेऽद्भुतम्।।

वेणीसंहारे वीररसः एव प्रधानरसत्वेन वर्तते। वीभत्सकरुणादिरसाः अङ्गरूपेण तिष्ठन्ति। कविः भट्टनारायणः कृत्रिमशैलीम् अङ्गीकरोति। समासबहुलतायाः, क्लिष्टतायाः, गभीरध्वनिरूपशब्दानां च निर्वहने ओजगुणस्य प्रचुरप्रयोगं विदधाति। नाटककारः अस्मिन् नाटके गौडीरीतेः प्रयोगं करोति, या रीतिः वीररसस्य कृते सर्वथा अनुकूला वर्तते। वीररसस्यापि नैकान्

भेदान् प्रतिपादयति आचार्याः। आचार्यः भरतमुनिः नाट्यशास्त्रे दानवीरः, धर्मवीरः युद्धवीरः इति वीररस्य भेदत्रयं समुपस्थापयति। वेणीसंहारस्य नायकः भीमः सदैव युद्धस्य कृते समुद्यतः परिलक्ष्यते। अतः तस्य चरित्रे युद्धवीररसस्य स्थापनं भवति। नाटकस्य नायकः भीमः सर्वदा स्वबलं प्रदर्श्य द्रोपद्याः अपमानस्य प्रतिशोधाय चेष्टारतः परिलक्ष्यते। श्रीकृष्णस्य माध्यमेन तस्य अग्रजः युधिष्ठिरः कौरवैः सह सन्धिं कर्तुम् इच्छति इति वार्तां प्राप्य भीमः अग्रजं युधिष्ठिरं प्रति क्रोधं प्रदर्शयति। प्रतिशोधाग्नौ प्रज्ज्वलितः भीमः दुःशासनस्य वक्षःस्थलस्य रक्तपानं करिष्यति तथा ऊरुं भङ्गयित्वा? तेन रक्तेन द्रौपद्याः मुक्तां वेणीं संहरणं करिष्यति इति स्वप्रतिज्ञया नाटकेऽस्मिन् वीररसस्य सञ्चारं करोति। यथा —

चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि! भीमः।

गौडीरीतेः सुन्दरं उदाहरणं भीमस्य उद्धरणे प्राप्यते। यथा--

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेशु गर्जत्पलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदू कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्तसंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्।।

भीमस्य वचने वीररसस्य सुन्दरम् अभिव्यक्तिः अस्ति। यथा-

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू।
संधिं करोतु भवतां नृपतिः पणेन।।

भीमः सहदेवं वदति, किं युद्धे क्रोधात् कौरवशतं न वधिष्यामि? किं दुशासनस्य वक्षःस्थलस्य रक्तं न पिबामि? किं न गदया दुर्योधनस्य ऊरुं न भङ्गं करिष्यामि? यदि भवतः राजा युधिष्ठिरः सन्धिं करोति तर्हि तत् करोतु, अहं सन्धिं न करिष्यामि। तथैव दुर्योधनवचने अपि वीररसस्य सुन्दरं वर्णनं प्राप्यते। यथा -

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा।
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।
अस्मिन् वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा।
बाह्वोर्वीर्यातिरेकद्रविणगुरुमदं मामजित्वैव दर्पः।।

भीमादयः पाण्डवाः द्रौपदी च मम आदेशेन केशैः कर्षिता सर्वेषां नृपाणां पुरतः। मया सह कलहः भवति। अन्यैः राज्ञैः का क्षतिः कृता। त्वं मयि महाबले अविजितोऽपि तावत् गर्वितः असि?

१४.५ नाटकस्य नायकः

वेणीसंहारनाटकस्य नायकः कोऽस्ति, अयं प्रश्नः अद्यापि विवादास्पदो वर्तते। अद्यावधि अस्य प्रश्नस्य विषये विदूषां मध्ये मतानैक्यम् अस्ति तथा च प्राचीनानाम् आलङ्कारिकानां शास्त्रीयसिद्धान्तानुसारं युधिष्ठिरः नायकः इति मन्यते। परन्तु आधुनिकचिन्तनस्य केचन विद्वांसः भीमं नाटकस्य अस्य नायकत्वेन अङ्गीकुर्वन्ति। एतेषामुपरि केचन विद्वांसः दुःखान्तनाटकदृष्ट्या दुर्योधनं प्रस्तुतनाटकस्य नायकत्वेन अङ्गीकुर्वन्ति। एतादृश्यां परिस्थितौ वेणीसंहारस्य नायकस्य विषये कोऽपि निष्कर्षं कर्तुं न शक्यते। दुर्योधनसम्बन्धे सर्वप्रथमं विचारणीयम्। नाट्यवस्तुनः योजनानुसारं दुर्योधनः प्रतिनायकः इति सिद्धः न तु वीरः। द्वितीयं तु दुर्योधनं नाटकस्य नायकत्वसिद्धिः नाटकीयानां सिद्धान्तानां विरुद्धा वर्तते। दशरूपकानुसारम् अधिकारिणः वधप्रदर्शनं सर्वथा निषिद्धम् अस्ति। षष्ठे अङ्के दुर्योधनस्य वधः प्रदर्शितः, येन दुर्योधनस्य नायकत्वं स्वत एव समाप्तं भवति। अतः दुर्योधनस्य नायकरूपेण अङ्गीकरणं नाट्यशास्त्रानुरूपं न भवति।

अधुना नायकपदस्य कृते पात्रद्वयं अवशिष्टम् अस्ति। एकः युधिष्ठिरः द्वितीयः भीमः। वेणीसंहारनायकस्य निर्णयार्थं परम्परामार्गः अथवा विवेकमार्गः अनुकरणीयः। कारणं यत् प्राचीनालङ्कारिकानां दृष्टौ, नाट्यशास्त्रीयानां सिद्धान्तानाम् आलोके च केवलं युधिष्ठिर एव नायकत्वपदस्य श्रेयः प्राप्नोति। शास्त्रानुसारं नायकस्य लक्षणं यथा--

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः॥

एतानि सर्वाणि लक्षणानि युधिष्ठिरे वर्तन्ते। धैर्यवान् शान्तः अविकत्थनः च। एतदतिरिक्तं नाटकस्य नायकः नाटकस्य मुख्यफलस्य भोक्ता भवति। यदि अनया दृष्ट्या विचारयामः चेत् प्रस्तुते नाटके युद्धान्ते युधिष्ठिरः राज्यप्राप्तिरूपस्य नाटकस्य मुख्यफलस्य भोक्तृत्वेन दृश्यते। नाटककारः अपि युधिष्ठिरं नायकत्वेन प्रदर्शयितुम् वाञ्छति। अत एव नाटकस्य अन्ते युधिष्ठिरः स्वयमेव भरतवाक्यं उच्चारयति। संस्कृतनाट्येषु नायकेन एव भरतवाक्यप्रयोगस्य परम्परा प्रायः प्रचलिता भवति। तेन सह नाटककारः नाटकारम्भे बीजरूपेण युधिष्ठिरस्य क्रोधाग्नेः चित्रणं कृत्वा युधिष्ठिरस्य वीरतां अधिकं सुदृढं कृतवान्। इत्थं नाट्यशास्त्रस्य प्रचलितायाः भारतीयपरम्परायाः आधारेण युधिष्ठिरः वेणीसहरस्य नायकः इति सिद्धः भवति।

आधुनिकविचारधारायां केचन विद्वांसः युधिष्ठिरं प्रस्तुतनाटकस्य नायकं न मन्यन्ते अपि तु भीमं नायकत्वेन अङ्गीकुर्वन्ति। ते शास्त्रीयपरम्परायाः सिद्धान्तान् परित्यज्य सामान्यज्ञानस्य आधारेण स्वमतानि प्रस्तुवन्ति। ते भीमस्य नायकत्वविचारस्य मुख्यकारणद्वयं उल्लिखन्ति। वेणीसंहारस्य घटना मूलतः द्रौपदीभीमाभ्यां सह सम्बन्धा अस्ति न तु युधिष्ठिरेण। भीमः दुर्योधनस्य ऊरुभङ्गं कृत्वा द्रौपदीकेशान् तद्रक्तेन अलङ्करिष्यतीति प्रतिज्ञां करोति। एतद् वृत्तान्तमेव विद्वांसः नाटकस्य बीजत्वेन स्वीकृतवन्तः। स्वप्रतिज्ञापूरणे भीमः नाटकस्य आदितः अन्तपर्यन्तं सज्जः दृश्यते। यस्मिन् अङ्के सः मञ्चे न दृश्यते तस्मिन् अपि तस्य परोक्षः प्रभावः दृश्यते। प्रत्येके अङ्के

तस्य स्वरः क्रुद्धः सगर्जनं श्रूयते। द्वितीये अङ्के दुर्योधनं प्रति कञ्चुकिना प्रदत्ता 'भग्नं भीमेन भवतो मरुता रथकेतनम्।'(२.२४) इति एषा सूचना नाटके भीमस्य प्रभावं स्पष्टतया सूचयति। तृतीये अङ्के भीमस्य वाणी पृष्ठतः श्रूयते यत् सः दुःशासनस्य रक्तं पातुं गच्छति इति। चतुर्थे अङ्के भीमस्य शौर्यस्य विस्तृतं वर्णनं सुन्दरवचनेन कृतम् अस्ति। एवं प्रकारेण विविधान् तर्कान् प्रमाणान् च प्रस्तुत्य नूतनविचारधारिणः विद्वांसः भीमस्य वीरत्वेन विचारस्य पक्षे स्वमतं प्रकटितवन्तः। नाटकारम्भे क्रुद्धेन भीमेन कृता प्रतिज्ञा नाटकस्य बीजं, नाटकान्ते द्रौपद्याः वेणीसंहरणं च नाटकस्य फलं इति मत्वा भीमस्य नायकत्वेन सिद्धिरूपं सिद्धान्तं प्रदीयते।

१४.६ वेणीसंहारनाटकस्य अङ्कानां सारांशः

प्रथम अङ्कः

नान्दीपाठस्य अनन्तरं नाटकस्य परिचयप्रदर्शनसमये पृष्ठभूमितः उक्तं यत् भगवान् श्रीकृष्णः व्यासादिभिः महर्षिभिः सह कौरवपाण्डवयोः मध्ये सन्धिं कर्तुं दूतरूपेण दुर्योधनपार्श्वं गतवान्। यत् श्रुत्वा सूत्रधारो वदति - भगवतः एषः प्रयत्नः सफलः भवतु, पाण्डवाः श्रीकृष्णेन सह सुखिनः भवन्तु कौरवाः अपि स्वपरिवारेण सह स्वस्थाः भवन्तु। तदनन्तरं भीमस्य गर्जनं श्रूयते - 'अहो दुष्ट! किं वदसि? अस्माकं कृते लाक्षगृहं निर्मीय, विषयुतभोजनप्रदानाय कृतयोजनाः कौरवाः द्रौपद्याः केशानि वस्त्राणि च आकृष्य अस्माकं जीवनं सम्पत्तिं च अपहर्तुं प्रयतन्ते स्म, तेषां स्वास्थ्यं किं भवन्तः इच्छन्ति? इत्युक्त्वा गदाधारी क्रुद्धः भीमसेनः स्वस्य अनुजः सहदेवेन सह मञ्चे प्रादुर्भवति। मञ्चं प्रति आगत्य पुनः कथयति - 'किं युद्धे कौरवं न मर्दयिष्यामि, किं वक्षःस्थलात् रक्तं न पास्यामि दुशासनस्य? दुर्योधनस्य ऊरुं न भङ्गं करिष्यामि वा? (अर्थात् एतानि सर्वाणि कार्याणि अवश्यं करिष्यामि इति)। यद्यपि युधिष्ठिरः सन्धिमेव करिष्यति? तस्मिन् एव काले दुर्योधनपत्न्याः भानुमत्याः व्यंग्यवचनेन व्यथितः द्रौपदी भीमस्य पुरतः प्रादुर्भवति। द्रौपद्याः दुःखस्य कारणं पृष्ट्वा भीमः ज्ञातवान् इदानीं एव भानुमती द्रौपदीं प्रति एवम् उक्तवती यत् - 'अरे द्रौपदी! सन्धिप्रयासः प्रारब्ध एव, तर्हि त्वं किमर्थं मुक्तवेणीं न अलङ्करोषि?' एतत् श्रुत्वा भीमस्य क्रोधः अधिको वर्धितः। किन्तु भानुमत्याः व्यङ्ग्यस्य यदा चेटी सम्यक् उत्तरं दत्तवती तदा भीमः आश्वासितः अभवत्। भानुमतीं प्रति चेट्याः उत्तरम् एवम् आसीत् - 'अहो भानुमति! यावत् भवती पतिहीना न भवति तावत् अस्माकं राज्ञी स्वस्याः मुक्तकेशान् कथं अलङ्करोति?' एतस्मिन्नन्तरे रणक्षेत्रात् रणध्वनिः आगता। कञ्चुकिना सन्धिप्रस्तावः भग्नः इति सूचना प्राप्ता तथा दुर्योधनेन श्रीकृष्णः वन्दीकृतः इति। यस्मात् कारणात् पाण्डवशिबिरे आतङ्कः उत्पन्नः। एवं श्रुत्वा भीमसेनः द्रौपदीं सान्त्वयित्वा शीघ्रं युद्धक्षेत्रं प्रति गच्छति।

द्वितीय अङ्कः

अभिमन्योः वधानन्तरं राजा दुर्योधनः प्रसन्नः भूत्वा स्वपत्न्या भानुमत्याः समक्षम् एतां वार्ताम् उपस्थापयति। परन्तु स्वमित्रैः सह मृदुतया वार्तालापं कुर्वतीं भानुमतीं दृष्ट्वा दुर्योधनः चिन्तितः भूत्वा यवनिकापार्श्वे स्थित्वा आत्मानम् आच्छादयन् भानुमत्याः वचनं श्रोतुं आरभते।

राज्ञी भानुमती तस्मिन् समये स्वसखीं वदति – 'हे सखे! तदनन्तरं तं नकुलं देवेभ्योऽपि सुन्दरतरं दृष्ट्वा अहम् उत्साहितः अभवम्, मम हृदयं तस्य प्रति आसक्तं जातम्, ततः अहं तत् स्थानं त्यक्त्वा लताकुञ्जं गतः। स च नकुलः अपि माम् अनुसृत्य तस्मिन् वने प्रविश्य मम स्तनावरणानि अशिष्टतया अपसारितवान् इति। एतादृशानि अपूर्णानि वचनानि श्रुत्वा राजा दुर्योधनः क्रोधेन रक्तः भूत्वा मनसि वक्तुं प्रवृत्तः – 'अहो, माद्रीसुते नकुलेण मोहिते दुष्टे! अहं भवत्याः सर्वेषां कुकर्मणां विषये ज्ञातवान्। हे पापिनि ! अत एव अद्य प्रातःकाले एव त्वम् अत्र आगतः। (चिन्तयित्वा) तदेव। अस्माकं कौरवानां शत्रुः माद्रिसुतः नकुलः हस्तं प्रसारयित्वा स्तनस्य आवरणं निष्कासितवान्! आह ! पापहृदयिनि ! किं मम मानमपि पाण्डवैः नष्टम्? इदानीम् अधिकं चिन्तनस्य श्रवणस्य वा आवश्यकता नास्ति। एतत् मनसि चिन्तयन् राजा दुर्योधनः खड्गम् आकृष्य अग्रे गच्छति। तदा एव सः पुनः भानुमत्याः स्वरं शृणोति। सा वदति – 'सखि! तदनन्तरं प्रातःकालः जातः। अहं प्रातःकाले मृदङ्गस्य शब्देन सह वेश्यासङ्गीतं श्रुत्वा आर्यपुत्रस्य सम्बोधनाय जागरिता। एतत् सर्वं श्रुत्वा दुर्योधनः अवगच्छति यत् सा स्वप्नस्य कथां कथयति इति, राजा दुर्योधनः अपराधबोधं चिन्तयति – 'इदं साधु यत् अहं क्रोधात् राज्ञीं कटुवचनं न श्रावितवान्। अद्य दिवसेषु मम मनः स्थिरं नास्ति। सम्पूर्णं कथां श्रोतुं पूर्वमपि अहं नकुलं भीमस्य अनुजः माद्रीसुतः इति भ्रान्त्या मम पत्न्याः कण्ठं विदारयितुं सज्जः अभवम्। साधु, अधुना राज्ञी अशुभस्वप्नजन्यदोषनिवृत्त्यर्थं भास्करं प्रार्थनां कृत्वा ध्यानं कुर्वती अस्ति। एषः राज्ञ्याः समीपं गन्तुम् उत्तमः अवसरः अस्ति।' इति चिन्तयित्वा राजा दुर्योधनः तस्याः सखीन् दूरीभवितुं संकेतं ददाति, सः राज्ञ्याः कृते पुष्पाणि अर्पयितुं आरभते। राज्ञ्याः शरीराङ्गस्पर्शेन राजा दुर्योधनः कामलिप्तः भवति येन तस्य हस्तात् पुष्पाणि भूमौ पतितुं आरभन्ते, राज्ञी च राज्ञः अशोभनव्यवहारेन क्रुद्धा भवति, राजा च अत्यन्तं कामुकाचरणं करोति। तस्मिन् एव काले हस्तिनापुरे अराजकता भवति, दुर्योधनस्य विजयरथस्य ध्वजः भग्नः भवति, कौरवशिबिरे कोलाहलः भवति तथा च राज्ञी भानुमती अपि भयभीता भवति। जयद्रथस्य माता तथा तस्य पत्नी दुःशला आगत्य दुर्योधनस्य पुरतः वक्तुं आरभते – 'महाराज! गाण्डीवधारी अर्जुनः स्वपुत्रवियोगेन व्यथितः सन् अद्य सूर्यास्तात् पूर्वं महारथी जयद्रथं हन्तु प्रतिज्ञां कृतवान् इति। तस्य प्रकोपात् पृथिवी कम्पते। वायुमण्डलं प्रचण्डपवनेन दूषितं जातम् अस्ति। मां रक्ष महाराज, रक्ष मां!'

तृतीयः अङ्कः

अस्य अङ्कस्य प्रवेशके रुधिरप्रिय इति नाम्नः कश्चित् राक्षसः तस्य पत्नी वसागन्धा च इत्यनयोः मध्ये जातेन वार्तालापेन युद्धक्षेत्रस्य भयानकतायाः, द्रोणाचार्यस्य वधस्य च सूचना प्राप्यते। अस्मिन् अङ्के पितृवधशोकेन दुःखितः क्रुद्धः अश्वत्थामा प्रविशति। कृपाचार्यः अश्वत्थामां सान्त्वयति। अत्र कर्णः दुर्योधनं व्याख्यायते यत् द्रोणः एव युद्धं त्यक्तवान् अत एव सः हतः। द्रोणः स्वपुत्रं अश्वत्थामां सम्पूर्णपृथिव्यां राजा कर्तुम् इच्छति स्म अधुना अश्वत्थामस्य मृत्योः कारणात् वृद्धस्य ब्राह्मणस्य द्रोणस्य शस्त्रग्रहणं व्यर्थं भवति। इत्थं चिन्तयित्वा द्रोणः दूखितः सन् अस्त्रं त्यक्तवान्। तस्मिन् एव काले कृपाचार्यः अश्वत्थामा च दुर्योधनपार्श्वम् आगच्छन्ति, अश्वत्थामा

दुर्योधनं स्वात्मानं सेनापतिं निर्मातुं याचते येन सः स्वपितुः मृत्योः प्रतिशोधं कर्तुं शक्नोति। परन्तु दुर्योधनः पूर्वमेव कर्णं सेनापतिं पदं दातुं प्रतिज्ञां कृतवान् आसीत्। अतः अश्वत्थामा अधिकः क्रुद्धः भवति। कर्ण-अश्वत्थामयोः मध्ये वाक्ययुद्धं भवति। अश्वत्थामा प्रतिज्ञां करोति यत् यावत् कर्णः जीवति तावत् सः शस्त्राणि न ग्रहिष्यति। एतस्मिन्नन्तरे भीमस्य गौरववचनं पृष्ठभूमितः श्रूयते यत् दुःशासनः वन्दीभूतः अभवत्, भीम तस्य रक्तं पातुं गच्छति, यदि कोऽपि कौरवः तस्य रक्षणं कर्तुं शक्नोति तर्हि सः करोतु इति। दुःशासनस्य दुःखदां स्थितिं श्रुत्वा अश्वत्थामा शस्त्रं स्वीकृत्य व्रतभङ्गं कर्तुं सज्जः भवति, परन्तु अश्वत्थामा आकाशस्य स्वरेण चेतयति यत् सः स्वव्रतं न भङ्गयेत् इति। अश्वत्थामा दुशासनं त्रातुं असमर्थः अभवत्, देवाः अपि पाण्डवानां पक्षपातित्वं स्वीकुर्वन्ति इति सः खेदं अनुभवति।

चतुर्थः अङ्कः

दुर्योधनस्य सारथिः युधि क्षतम् अचेतनं च दुर्योधनं युद्धक्षेत्रात् दूरं नीत्वा वटवृक्षस्य छायायां स्वस्य रथं निक्षिपति। अचेतनतायाः समाप्तेः अनन्तरं दुर्योधनः दुःशासनस्य वधस्य विषये जानाति, यस्मात् कारणात् सः अत्यन्तं शोकग्रस्तः भूत्वा विलापं कर्तुम् आरभते। कर्णस्य सेवकः सुन्दरकः दुर्योधनम् अन्वेष्य तत्र गच्छति, सः दुर्योधनं कर्णपुत्रस्य वृषसेनस्य वधस्य विषये सूचयति, युद्धक्षेत्रस्य गतिविधिम् अपि सूचयति। एतां द्वितीयां अशुभवार्तां श्रुत्वा दुर्योधनः अत्यन्तं दुःखितः जायते। सुन्दरकः तं स्वपुत्रवृषसेनस्य वधेन निराशस्य क्रुद्धस्य युद्धक्षेत्रं गच्छतः च अङ्गराजकर्णस्य सन्देशं कथयति। दुर्योधनः अपि स्वप्रियस्य अङ्गराजकर्णस्य साहाय्यार्थं पुनः युद्धक्षेत्रं प्रति गन्तुम् इच्छति, परन्तु तस्मिन् एव काले दुर्योधनस्य पिता धृतराष्ट्रः, माता गान्धारी च तत्र आगच्छतः।

पञ्चमः अङ्कः

धृतराष्ट्रगान्धार्यौ पुत्रहानिदुःखितौ दुर्योधनं पाण्डवैः सह सन्धिं कर्तुं उपदिशतः, परन्तु दुर्योधनः तदर्थं सज्जः नास्ति। सः अनुजस्य दुशासनस्य वधस्य प्रतिशोधं पाण्डवेभ्यः नेतुम् इच्छति। अस्मिन् विषये धृतराष्ट्रः गुप्तसाधनेन पाण्डवानां वधाय आदिशति, परन्तु गर्वितः दुर्योधनः एतदपि न स्वीकरोति। एतस्मिन्नन्तरे कर्णस्य मृत्योः वार्ता प्राप्य दुर्योधनः युद्धाय गन्तुं सज्जः भवति। अथ भीम-अर्जुनौ दुर्योधनं युद्धक्षेत्रे न लब्ध्वा तं अन्वेष्य तत्र गच्छतः। भीमः धृतराष्ट्रगान्धारीं दृष्ट्वा प्रणम्य व्यंग्यं करोति। तदर्थं दुर्योधनः भीमं भर्त्सयति। तस्मात् तयोः मध्ये वाचिकविवादः भवति। दुर्योधनः भीमं द्वन्द्वयुद्धाय आह्वानं करोति परन्तु अर्जुनः भीमं निवारयति। एतस्मिन्नन्तरे पृष्ठभूमितः युधिष्ठिरस्य भीम-अर्जुनयोः कृते आदेशः आगतः यत् इदानीं युद्धस्य समाप्तेः समयः इति। अतः सेनाः निवृत्ताः भवन्ति। युधिष्ठिरस्य आज्ञापालनार्थं तौ पुनः प्रत्यागच्छतः। यथा यथा भीम-अर्जुनौ प्रत्यागच्छतः तथा तथा अश्वत्थामा अपि तत्स्थानं प्राप्नोति। धृतराष्ट्रः दुर्योधनम् उत्थाय अश्वत्थामासदृशं वीरं अभिवादयितुं सूचयति। अश्वत्थामा तत्र आगत्य एव दुर्योधनस्य मित्रस्य अङ्गराजकर्णस्य निन्दनकार्यम् आरभते यस्मात् कारणात् दुर्योधनः तस्य उपरि क्रुद्धः भवति तथा च तेन अश्वत्थामा निन्दितः यत् सः (अश्वत्थामा) कर्णवधस्य एव प्रतिज्ञां किमर्थं

कृतवान् आसीत्। अश्वत्थामा अपमानितः सन् ततः दूरं गच्छति, परन्तु धृतराष्ट्रः सञ्जयद्वारा तस्मै स्वगान्धार्याः वासल्यप्रेम्णः, पितुः अपमानस्य च स्मरणं कारयति, भ्रातृशोकेन विचलितस्य दुर्योधनस्य वचनं सत्यं नास्ति इति सन्देशं ददाति।

षष्ठ अङ्कः

षष्ठाङ्कस्य प्रारम्भे युधिष्ठिरः चिन्तितावस्थायां दर्शितः। तस्य चिन्तायाः कारणं भीमेन कृता प्रतिज्ञा आसीत्। अद्य दुर्योधनस्य वधेन व्रतं पूर्णं करिष्यामि, अन्यथा आत्महत्यां करिष्यति इति भीमः प्रतिज्ञां कृतवान्। समाचारमिदं ज्ञात्वा दुर्योधनः शान्ततया तडागे गत्वा आत्मानं निगूहति स्म। युधिष्ठिरः बहु चिन्तितः जातः, यतो हि बहु अन्वेषणं कृत्वा अपि यदा तस्य विषये किमपि तथ्यं न लभ्यते। तस्मिन् एव काले कश्चन पुरुषः आगत्य सूचयति यत् अन्वेषणेन दुष्टः दुर्योधनः लब्धः तथा भीमदुर्योधनयोः मध्ये उग्रं गदायुद्धं प्रचलति इति। अस्मिन् युद्धे भीमस्य विजयः निश्चितः अस्ति। अतः भगवता श्रीकृष्णेन सन्देशः प्रेषितः यत् युधिष्ठिरः राज्याभिषेकस्य सज्जतां कुर्यात्, द्रौपदी अपि तस्याः वेणीसंहरणस्य उत्सवं पालयेत् इति।

पुरोहितादिभ्यः कर्मचारिभ्यः राज्याभिषेकस्य सज्जताय अनुमतिः दीयते किन्तु अस्मिन् क्षणे नूतना एका घटना समागच्छति। दुर्योधनस्य मित्रं चार्वाको नाम राक्षसः मुनिवेषं धारयन् युधिष्ठिरस्य समीपम् आगच्छति। भीमदुर्योधनयोः गदायुद्धं दृष्ट्वा सामन्तपञ्चकात् आगच्छतीति अभिनयं करोति। सः खेदं प्रकटयति यत् शरदः तीव्रसूर्यप्रकाशस्य कारणात् सः अर्जुनदुर्योधनयोः गदायुद्धं पूर्णतया न दृष्टवान्। अर्जुनस्य दुर्योधनस्य च गदायुद्धं श्रुत्वा युधिष्ठिरः स्तब्धः भवति। अग्रे जिज्ञासया युधिष्ठिरेण चार्वाकतः ज्ञायते यत् श्रीकृष्णस्य भ्रात्रा बलरामेन दुर्योधनं प्रति दत्तस्य गुप्तसंकेतस्य हेतोः गदायुद्धे भीमः हत अस्ति। एतत् श्रुत्वा द्रौपदी-युधिष्ठिरौ शोकग्रस्तौ सन्तौ आत्महननाय सज्जौ भवतः। चार्वाको ततः निर्गच्छति। तावत् पृष्ठभूमितः कोलाहलः श्रूयते। युधिष्ठिरः द्रौपदी च दुर्योधन आगच्छति इति अनुभवति। द्रौपदी निगूढाय प्रयतते। रक्तसिक्तशरीरः भीमसेनः मञ्चं प्रति आगत्य द्रौपदीं रक्तेन कलङ्कितहस्तैः तस्याः केशान् कङ्कणार्थं गृह्णाति। भीमस्य अपरिचयात् युधिष्ठिरः तं दुर्योधनं मन्यते, तेन सह युद्धं कर्तुम् इच्छति च। अन्ते वास्तविकता प्रकाशिता भवति। द्रौपदी सुखेन केशान् बध्नाति। श्री कृष्णः अर्जुनः च मञ्चं प्रति आगच्छति। चार्वाकः नकुलेन वन्दीकृतः। युधिष्ठिरः भीमम् अर्जुनं च आलिंगयन् प्रसन्नः भूत्वा श्रीकृष्णं प्रति कृतज्ञतां प्रकटयति। अन्ते भरतवाक्येन नाटकस्य समाप्तिः भवति।

१४.८ वेणीसंहारनाटकस्य प्रधानचरित्राणां परिचयः

नाटकीयचरित्राणां सजीवचित्रणे नाटककारः भट्टनारायणः अपूर्वं सफलताम् आप्नोति। केषाञ्चन प्रमुखपात्राणां चरित्रचित्रणम् अधः क्रियते —

(क) भीमसेनः - भीमसेनः धीरोद्धतप्रकृतेः नायकः। सः शरीरेण अतीव शक्तिशाली तथा स्वस्य सकल्पानां कृते दृढनिश्चय वर्तते। प्रथमाङ्कस्य आरम्थे एव सः क्रोधेन विस्फोटितः सन् मञ्चं प्रति आगच्छति। दुर्योधनेन पाण्डवानां विनाशाय लाक्षागृहे अग्निप्रहारः, विषमिश्रितभोजनाय

दुचेष्टा, छलेन राज्यं हृत्वा, जनसभायां केशवस्त्राणि च आकृष्य द्रौपद्याः अपमानं च इत्यादयः अनेकाः घटनाः सन्ति, येषां स्मरणेन तस्य वीरहृदयं सर्वदा उत्तेजितो भवति। तस्य मनसि कौरवैः कृतस्य दुष्कृतस्य प्रतिशोधाकांक्षा वर्तते एव। स्वस्य आत्मसम्मानस्य रक्षणाय सः शिष्टाचारं परित्यक्तुमपि सज्जः भवति। यदा तेन ज्ञायते यत् युधिष्ठिरः श्रीकृष्णद्वारा कौरवैः सह सन्धिं कर्तुं इच्छति तदा सः स्वस्य पूज्यम् अग्रजं युधिष्ठिरं प्रति क्रोधं प्रकटयति इत्थं – 'क्रुधा सन्धिं भीमो विघटयति यूयं घटयत' तथा 'अद्यैकं दिवसं ममासि न गुरुनहिं विधेयस्तव' इत्यादयः उक्तयः मर्यादाशिष्टाचारापेक्षया स्वाभिमानं अधिकं महत्त्वं ददाति।

प्रतिशोधस्य अग्निना दह्यमानः भीमः दुशासनस्य वक्षःस्थलात् रक्तं पिबन् दुर्योधनस्य ऊरुं भङ्गयित्वा द्रौपद्याः मुक्तकेशान् तस्य एव रक्तेन संहरणं करिष्यति इति प्रतिज्ञां कृतवान्। सः स्वप्रतिज्ञाद्वयं पूर्णमपि करोति। प्रस्तुतनाटकस्य नामकरणस्य महत्त्वं भीमेन पूरितया प्रतिज्ञया सिद्धं भवति, यत् नाटके तस्य अत्यन्तं प्रमुखा भूमिका अस्ति। वने निवसन् विविधविपत्तिनां सम्मुखीभूय, अत्यन्तशूरत्वेऽपि युधिष्ठिरस्य सच्चिदानन्दानुयायी भूत्वा, शौर्यप्रदर्शनाय अवसरेषु युधिष्ठिरेण नियन्त्रिते सति उत्तेजितहृदयस्य शमनम् इत्यादिषु अनेकेषु विषयेषु भीमस्य सहिष्णुता प्रकटिता भवति। भीमः वीरः शूरः शत्रुहन्ता तथापि शिष्टः दृश्यते। प्रथमे अङ्के क्रोधावस्थायाः कारणात् पार्श्वे स्थितां द्रौपदीं न पश्यति, किन्तु द्रौपदीसान्निध्यं ज्ञात्वा सः द्रौपदीं प्रति अनभिप्रेतस्य उपेक्षायाः पश्चात्तापं करोति। तस्य मनसि पूज्यस्य अग्रजस्य युधिष्ठिरस्य कृते महान् आदरः अस्ति। श्रीकृष्णस्य दिव्यत्वे तस्य पूर्णः श्रद्धा अस्ति। अस्मिन् नाटके भीमस्य चरित्रं वस्तुतः सर्वाधिकं प्रभावशालिनं च अस्ति यत् पाठकानां दर्शकानां च हृदयं गहनेन प्रभावयति।

(ख) दुर्योधनः – प्रस्तुते नाटके दुर्योधनः प्रतिनायकस्य भूमिकायां दृश्यते। दुर्योधनः वस्तुतः भीम इव औधत्य-पराक्रम-क्रोध-पौरुषेत्यादिगुणोपेतः परिलक्ष्यते। केषुचित् विषयेषु दुर्योधनः भीमात् सर्वथा भिन्नः अस्ति। दुर्योधनः विलासस्वभावस्य दम्थव्यक्तिः अस्ति। एकतः युद्धस्य समय चलति, अपरतः प्रियया भानुमत्या सह प्रणयव्यापारे लिप्तो वर्तते। सः मिथ्यादर्पपूर्णः अस्ति। दुर्योधने जीविते एव भीमः तदनुजस्य दुःशासनस्य वक्षःस्थलं विदारयित्वा प्रतिज्ञां पूरयति, परन्तु सः दुर्योधनः दुःशासनस्य रक्षणं कर्तुं असमर्थः अस्ति। परन्तु आरम्थे सः दर्पशुन्यः सोत्तेजेन उद्घोषयति यत् तस्मिन् जीविते सति तस्य अनुजस्य केशानपि दूषयितुं पाण्डवानां शक्तिः नास्ति इति। युधि आचार्यद्रोण-भीष्मपितामह-जयद्रथादीनां योद्धानां मृत्यौ अपि दुर्योधनः अतीव दुःखितः न दृश्यते। तस्य सङ्गतिः केवलं स्वार्थिभिः धूर्तैः सह एव भवति। धूर्तमातुलस्य शकुनि सहायेन पाण्डवान् द्युतक्रीडायां पराजित्य तेषां राज्यं स्वीकृत्य, तान् चिरकालं यावत् प्रव्रजितुं बाध्यं कृत्वा, निर्वासनकाले लाक्षागृहे अग्निप्रहारं कृत्वा, विषयुक्तभोजनप्रदानेन पाण्डवानां वधं कर्तुं प्रयत्नं कृतवान्। सभामध्ये द्रौपद्याः केशवस्त्राणि विच्छिद्य सर्वेषां पुरतः ऊरौ उपवेशनप्रयासः तस्य हृदयस्य कलङ्कं प्रकाशयति। धृतराष्ट्रगान्धार्योः अनुनये अपि सः शान्तिमार्गं न स्वीकृत्य स्वपरिवारस्य आत्मनः च विनाशं आह्वयति।

(ग) युधिष्ठिरः – वेणीसंहारे युधिष्ठिरस्य चरित्रं दृष्ट्वा इदं प्रतीयते यत् नाटककारेण

महाभारतस्य युधिष्ठिरस्य सम्पूर्णछायायां वेणीसंहारस्य युधिष्ठिरस्य चित्रणं कर्तुं प्रयत्नः कृतः। यद्यपि एतत् कथनं सर्वेषु पात्रेषु प्रवर्तते किन्तु युधिष्ठिरः अधिकः शान्तरूपेण प्रस्तुत अस्ति। प्रस्तुतनाटकस्य प्रथमे अङ्के षष्ठे च अङ्के युधिष्ठिरः मञ्चे अवतारितः अस्ति। युधिष्ठिरः स्वभावतः अत्यन्तः शान्तः, तथा च युद्धापेक्षया सन्धिपक्षे अधिकः इच्छुकः इति प्रकटितः भवति। दुर्योधनेन विहितया पाण्डवानां प्रलयप्रचेष्टया, दुःशासनेन विहितेन द्रौपद्याः केशवस्त्राणि आकृष्य सभायाम् उरौ उपवेशनकार्येण अपि प्रतिशोधस्य भावः युधिष्ठिरे विलुप्तः एव परिलक्ष्यते। युधिष्ठिरस्य चरित्रस्य एतानि लक्षणानि अवश्यमेव भिक्षोः एकान्तवासिनः वा प्रशंसनीयाः गुणाः भवितुम् अर्हन्ति, परन्तु वीरस्य क्षत्रियराजस्य कृते एतानि सर्वाणि लक्षणानि वस्तुतः दुर्गुणवर्गे एव आगन्तुं शक्नुवन्ति। युधिष्ठिरस्य हृदये भ्रातृन् प्रति गहनं प्रेम वर्तते। षष्ठे अङ्के यदा चार्वाकेण भीमबधस्य मिथ्यासूचना प्राप्नोति तदा दुर्योधनस्य प्रतिशोधस्य स्थाने सः शीघ्रमेव द्रौपद्या सह स्वयं चितारोहणाय सज्जताम् आरभते। एताः सर्वाः घटनाः युधिष्ठिरस्य भीरुप्रकृतिमैव प्रकाशयति।

यद्यपि प्राचीनकविभिः वेणीसंहारनाटकस्य नायकस्य नाम युधिष्ठिरस्य शिरसि स्थापितं, परन्तु वेणीसंहारम् इति वीररसप्रसिधनाटकस्य नायकः यदि एतावत् भीरुप्रकृतिको भवति तर्हि यथार्थतः तस्य नाटकस्य नायकोपाधेः अलङ्करणे अधिकारः नास्ति। वीरशौर्यस्य प्रचण्डा धारा सम्पूर्णे नाटके प्रवहति, यस्मिन् भीम, अर्जुन, दुर्योधन, कर्ण, अश्वत्थामा इत्यादयः योद्धारः कौरवविनाशाय प्रतिज्ञावद्धाः सोत्तेजिताः च दृश्यन्ते।

(घ) कर्णः- कर्णः अङ्गदेशराजस्य दुर्योधनस्य अनन्यमित्रम् अस्ति। नाटके सः अङ्गराजः, राधेयः, राधापुत्रः, सूतपुत्रश्चेत्यादिभिः विविधैः विशेषणैः अलङ्कृतो वर्तते। कर्णस्य वीरता, शौर्यता उत्साहः चेत्यादिगुणाः सन्ति किन्तु तस्य दम्भाहङ्काररूपदुष्टगुणाः अपि सन्ति। सः निश्चितरूपेण महान् योद्धा अस्ति किन्तु सः अहङ्कारी अपि प्रदर्श्यते। अहङ्कारप्रदर्शनसमये तस्य मुखे वाक्यनियन्त्रणमपि न भवति। द्रोणाचार्यसदृशं पूज्यं महापराक्रमशालिनमपि निन्दां करोति। दुर्योधनस्य कृते प्राणं परित्यज्य अपि दुर्योधने जीविते दुर्योधनं दुष्टमन्त्रणां दत्त्वा तस्य विनाशे महतीं भूमिकां पालयति। असाधारणं साहसं च अस्ति। सः नाटके केवलं चाटुकारिकं मित्रम्, कटुभाषी , योद्धा, घृणनीयः पुरुषः च इति रूपेण स्थानं प्राप्नोति।

(ङ) द्रौपदी - द्रौपदी 'वेणीसंहारम्' इति नाटकस्य नायिका अस्ति। तस्याः पात्रं वीरक्षत्राणीरूपेण चित्रितम् अस्ति। तस्य अपमानस्य कथा अस्य नाटकस्य आधारः अस्ति। शूरयोद्धायाः या तीक्ष्णता, दृढनिश्चया च अपेक्षिता, सा तस्यायां वर्तते। कौरवैः कृतस्य अपमानस्य प्रतिशोधार्थं भीममतेन सह ऐक्या वर्तते। भीम इव युधिष्ठिरस्य सन्धिप्रयासः तस्या कृते अपि असह्यः एव। सा स्वस्याः अपमानस्य प्रतिशोधं कर्तुम् इच्छति। सदा भीमस्य क्रोधाग्निप्रवर्धनेन सह सा एतदपि चिन्तयति यत् तस्याः पञ्च पतयः युद्धे स्वशरीराणां उपेक्षां न कुर्युः इति। एवं प्रकारेण भर्तुः सुरक्षाविषये स्त्रीसुलभा भीतिरपि तत्तत्स्थाने अपि प्रकाशिता भवति।

द्रौपदी पितृपक्षतः श्वशुरपक्षतः च श्रेष्ठा क्षत्राणी। क्षत्रण्याः तेजः सदा मुखमण्डले प्रदीप्तं तिष्ठति। दुर्योधनपत्न्याः भानुमत्याः व्यंग्योक्त्या सा स्तब्धा भवति। अपमानस्य समुचितप्रतिशोधाय

सा भीमस्य एव आश्रयं गृह्णाति। अत एव कारणं यत् सम्पूर्णे नाटके पञ्चसु पाण्डवेष्वपि भीमः यावद् तया इष्टः इति प्रतिबिम्बितः न कश्चित् अन्यः। षष्ठे अङ्के चार्वाकस्य भीमवधस्य मिथ्यावार्ता श्रवणमात्रेण सा चितारोहणार्थं युधिष्ठिरेण सह आत्मानं समर्पयितुम् उद्यता भवति। वीररसप्रधाने अस्य नाटकस्य नायिकायाः कृते अपेक्षितानि सर्वाणि लक्षणानि द्रौपद्यां विराजमानाः सन्ति।

(च) भानुमती - भानुमती नाटकस्य अस्य प्रतिनायकस्य दुर्योधनस्य पत्नी अस्ति। सा आदर्शभारतीयस्त्रीरूपेण चित्रिता अस्ति। सा अतीव सुन्दरी अस्ति! अत एव दुर्योधनः युद्धम् उपेक्षयन् अपि सर्वदा तया सह प्रणयकार्ये निरतः एव तिष्ठति। अशुभस्वप्नकारणात् अनिष्टस्य निवारयितुं भगवते पुष्पश्रद्धाञ्जलिनिवेदनं तस्याः धार्मिकस्वरूपस्य अभिव्यक्तिः अस्ति। एतत् सर्वं कृत्वा अपि सा दुर्जनस्य सङ्गतिजन्येभ्यः दोषेभ्यः आत्मानं त्रातुं न शक्नोति। दुर्योधनस्य पत्नी इति कारणतः दुर्योधनस्य दुर्गुणः तस्याः अन्तः अपि आगतः इव प्रतिभाति। द्रौपदीनां मुक्तकेशान् अवलोक्य तस्मिन् व्यंग्यप्रेक्षणं एतस्य एव प्रमाणम् अस्ति। परन्तु शत्रुपत्न्या सह एतादृशो व्यवहारः अस्वाभाविकोऽपि न मन्यते समाजे।



१४.९ अध्यायात् किमवगतम्

अस्य पाठस्य अध्ययनेन वयं ----

- नाटकस्य स्वरूपं ज्ञातुं शक्नुमः।
- वेणीसंहारकारस्य परिचयं जानीमः।
- वेणीसंहारनाटकस्य नायकपरिचयं जानीमः।
- वेणीसंहारनाटकस्य सारांशं जानीमः।
- वेणीसंहारनाटकस्य प्रत्येकाङ्कानां परिचयं जानीमः।
- वेणीसंहारनाटकस्य प्रधानचरित्राणां परिचयं जानीमः।



१४.१० ज्ञानाधिक्यम्

१) वेणीसंहार, शास्त्री शिबराज, साहित्य भण्डार, मेरणशठ, पञ्चम संस्करण, १९७९
२) संस्कृत नाट्यकला, शुक्ल रामलखन, मोतीलाल बनारसीदास, दिल्ली १९७१
३) संस्कृत नाटक समीक्षा, सिंह इन्द्रपाल, साहित्य निकेतन, कानपुर, प्रथम संस्करण, १९६०



१४.११ अग्रगत्याः निरूपणम्

प्रश्नः १ उत्तरम् : दुर्योधनः।

प्रश्नः २ उत्तरम् : षड् अङ्काः सन्ति।

प्रश्नः ३ उत्तरम् : आचार्यद्रोणस्य।

प्रश्नः ४ उत्तरम् : धीरोद्धतः नायकः।

प्रश्नः ५ उत्तरम् : महाभारतस्य उद्योगपर्वणः।

प्रश्नः ६ उत्तरम् : भीमः।

प्रश्नः ७ उत्तरम् : दुःशासनेन।

प्रश्नः ८ उत्तरम् : वीररसः।



१४.१२ अभ्यासप्रश्नाः

लघुप्रश्नाः

प्रश्नः १: वेणीसंहारम् कस्य रचना अस्ति ?

प्रश्नः २: वेणीसंहारस्य उपजीव्यम् किम् ?

प्रश्नः ३: वेणीसंहारं कीदृशं काव्यमस्ति ?

प्रश्नः ४: वेणीसंहारस्य नायिका का ?

प्रश्नः ५: भानुमती का ?

प्रश्नः ६: वेणीसंहारस्य नायकः कः ?

प्रश्नः ७: वेणीसंहारस्य प्रतिनायकः कः ?

प्रश्नः ८: वेणीसंहारनाटके कति अङ्काः सन्ति ?

प्रश्नः ९: अश्वत्थामा कस्य पुत्र अस्ति ?

प्रश्नः १०: भीमः कीदृशः नायकः अस्ति ?

प्रश्नः ११: वेणीसंहारस्य कथानकः कुतः गृह्यते ?

प्रश्नः १२: मथ्नामि कौरवशतं समरे न कोपात् – एषा उक्तिः कस्य अस्ति ?

प्रश्नः १३: द्रौपद्याः केशवस्त्रकर्षणं केन कृतम् ?

प्रश्नः १४: वेणीसंहारस्य अङ्गीरसः कः ?

प्रश्नः १५: दुर्योधनस्य पत्नी का ?

प्रश्नः १६: भट्टनारायणः कस्य रीतेः कविः अस्ति ?

प्रश्नः १७: वेणीसंहारस्य नान्दीपाठे कस्य स्तुतिः विधीयते ?

टिप्पणी

१. भट्टनारायणः
२. वेणीसंहारः
३. युधिष्ठिरः
४. भीमः
५. द्रौपदी
६. दुर्योधनः
७. भानुमती
८. अश्वत्थामा
९. वीररसः

दीर्घप्रश्नाः

१. वेणीसंहारम् इति नाटकस्य परिचयं सप्रपञ्चं व्याख्यायत।
२. नाटककारस्य परिचयं लिखत।
३. वेणीसंहारनाटकस्य अङ्कानां सारांशं लिखत।
४. वेणीसंहारनाटकस्य नायकस्य चरित्रं सप्रपञ्चं विश्लेषयत।
५. वेणीसंहारनाटकस्य भीम-द्रौपद्योः चरित्रं विश्लेषयत।
६. वेणीसंहारनाटकस्य दुर्योधन-भानुमत्योः चरित्रं विश्लेषयत।

*** ***** ***